भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-29

आचार्यो विश्वनाथः

योगेश्वरदत्तशर्मा

राष्ट्रिय-संस्कृत-संस्थानम्

भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-29

आचार्यो विश्वनाथः

योगेश्वरदत्तशर्मा

राष्ट्रिय-संस्कृत-संस्थानम्

साहित्यशास्त्रक्षेत्रे मम्मटाचार्यादनन्तरं विश्वनाथस्य सर्वोपरि प्रभावो वर्तते। अनेनाचार्येण साहित्यदर्पणं विरचय्य साहित्य-पाठकानां कृते सरलतमो मार्गः स्थापितः। अतोऽस्मिन् ग्रन्थे साहित्यलक्षणम्, साहित्यस्योद्भवः, विश्वनाथपूर्ववर्त्ति-परवर्त्ति-आलङ्कारिकाणां साहित्यमर्मज्ञानां परिचयात्मकं वर्णनं सम्यक् प्रदत्तम्। विश्वनाथस्य स्वकीयं योगदानमपि संक्षेपेण प्रदत्तम्। विश्वनाथस्य समालोचनायां महत्कार्यं कर्त्तुं शक्यते। तेषां शोधकानां कृते प्रबन्ध एष मार्गदर्शकः स्यादित्याशास्ते विनम्रो लेखकः।

भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-२९

आचार्यो विश्वनाथः

योगेश्वर दत्त शर्मा

राष्ट्रिय-संस्कृत-संस्थानम्

1999

प्रकाशकः
डॉ० कमलाकान्त मिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नई दिल्ली-११००५८
दूरभाष : ५५४०९९३, ५५४०९९५

© राष्ट्रिय-संस्कृत-संस्थानम्

प्रथमसंस्करणम् १९९९

मूल्यम् : रु० १००-००

मुद्रक



नाग प्रकाशक
११ए/यू० ए० जवाहर नगर,
दिल्ली-११०००७

प्राक्कथनम्

योऽनूचानस्स नो महान् इत्युद्दिश्य संस्कृतसंरक्षणसंवर्धनप्रचारप्रसारात्मकं स्वोद्देश्यं साधु निर्वहदिदं **राष्ट्रियसंस्कृतसंस्थानं** भारतस्वातन्त्र्यस्वर्णजयन्तीं विविधैश्शैक्षिककार्यक्रमैरायोजयदिति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च मनांस्यवश्यं मोमुद्येरन् ।

प्राचीनशास्त्राणां संरक्षणे, संवर्धने, संस्कृताध्ययनपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानेनानेन निरन्तरं विहितं सत्प्रयत्नं योगदानं च विद्वत्समवायस्सर्वथाभिनन्दतीति विश्वस्यते ।

भारतस्वातन्त्र्यस्वर्णजयन्तीमभिलक्ष्य प्रवर्तितायां योजनायां राष्ट्रस्यास्य विभिन्नेषु प्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः नानाशास्त्राणि, तत्र निहितानि वैज्ञानिकतत्त्वानि चाधिकृत्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च **भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमालात्वेन** तत्रभवतां समक्षमुपस्थाप्य महानानन्दस्सन्तोषश्चोपजायेते ।

तत्रेदम् आचार्यो विश्वनाथ इति ग्रन्थरत्नं विविधविद्याविद्योतमानमानसैर्लब्धप्रतिष्ठैर्विद्वद्भिः डॉ० योगेश्वरदत्तशर्म-महोदयैः प्रणीतं यत्र साहित्यदर्पणादिग्रन्थकर्तुः कविराजस्य आचार्यविश्वनाथस्य कर्तृत्वकृतित्वयोर्विषये विविधाः प्रामाणिकसामग्र्यः समाहिता विद्यन्ते । अस्मिन् समावेशितः काव्यशास्त्रविचारः जिज्ञासून् सर्वथोपकरिष्यतीत्याशास्यते ।

भारतस्वतन्त्र्यस्वर्ण-जयन्तीग्रन्थमालायै एतादृशं ग्रन्थरत्नं प्रस्तुतवद्भ्यः गुरुकुलकाँगडी-विश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षेभ्यः डॉ० योगेश्वर-दत्तशर्म-महोदयेभ्यः संस्थानं हार्दिकं कार्तज्ञ्यं ज्ञापयति ।

नागप्रकाशकाधिकारिणः स्वल्पीयसि काले ग्रन्थममुं सम्मुद्रय यथासमयं लोकार्पणाय च प्रस्तूय अस्माकं सङ्कल्पसिद्धौ विशिष्टं सहयोगं कृतवन्तः । एतदर्थं ते धन्यवादार्हाः ।

११.०९.१९९८
नवदेहली

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्

विषयानुक्रमणिका

प्राक्कथनम्	iii
आचार्यो विश्वनाथः	१-२
साहित्यलक्षणम्	३-८
साहित्यस्योद्भवः	९-१३
साहित्यस्योद्देश्यम्	१४-२४
विश्वनाथस्य समयादिनिरूपणम्	२५-२९
अलङ्कारशास्त्रस्योपयोगिता	३०-३२
अलङ्कारपदव्युत्पत्तिः	३३-३४
व्याकरणशास्त्रेऽलङ्कारशास्त्रम्	३५-३७
विश्वनाथपूर्वकालीनाः अलङ्कारशास्त्रप्रणेतारः	३८-६०
विश्वनाथस्योत्तरकालीनाः आचार्याः	६१-६६
अलङ्कारशास्त्रप्रणेतारः	६७-७२
अलङ्कारशास्त्रस्य सम्प्रदायाः	७३-१०४
साहित्यदर्पणकर्तृत्वम्	१०५-१२८
विश्वनाथस्य साहित्यक्षेत्रे योगदानम्	१२९-१३०
सहायकग्रन्थसूची	१३१-१३८

आचार्यो विश्वनाथः

आचार्यो विश्वनाथो रुय्यकमम्मटौ नाम्नाऽनुल्लिख्य तयोर्ग्रन्थानां ग्रहणं करोति। उपमेयोपमा-भ्रान्तिमतोरलङ्कारयोर्लक्षणे रुय्यककृते एव विश्वनाथेन सङ्कलिते, विकल्पविचित्रौ चापि रुय्यकाभिमतौ गृहीतौ। मम्मटस्य काव्यलक्षणालोचनमपि रुय्यकसम्मतमेव प्रतीयते। अनन्तरं जयदेवश्रीहर्षौ विश्वनाथेन स्वग्रन्थे उद्धृतौ। आत्मानं चन्द्रशेखरसुतमभिदधाति विश्वनाथः। काव्यप्रकाशटीकायां नारायणः पितामहः, साहित्यदर्पणे तु वृद्धपितामहः कथितोऽनेन। यत्र तत्र मम्मटाभिमतान् विचारान् खण्डयन्नपि विश्वनाथो तस्यानुचितमालोचनं कदापि न सहते। अतः तमेव स्वोपजीव्यमपि स्वीकरोति।

एतेन विरचितं साहित्यदर्पणं कामं मौलिकत्वं न दर्शयति तथापि सर्वेषां काव्यविषयाणां विशदं विवेचनं करोति।

एतस्य साहित्यदर्पणे परिच्छेदानुसारं विषया एते विवेचिताः—

प्रथमः परिच्छेदः	काव्यशास्त्रनिरूपकः
द्वितीयः परिच्छेदः	शब्दार्थ-तद्वृत्तिनिरूपकः।
तृतीयः परिच्छेदः	रसात्मकः
चतुर्थः परिच्छेदः	ध्वनिभेदनिरूपकः
पञ्चमः परिच्छेदः	व्यञ्जनानिरूपकः
षष्ठः परिच्छेदः	नाट्यनिरूपकः
सप्तमः परिच्छेदः	दोषनिरूपकः

अष्टमः परिच्छेदः	काव्यगुणात्मकः
नवमः परिच्छेदः	रीतिनिरूपकः
दशमः परिच्छेदः	अलंकारभेदात्मकः

साहित्यलक्षणम्

साहित्यशब्दस्य विषये सर्वप्रथमं काश्चिद् जिज्ञासाः प्रादुर्भवन्ति। तद् यथा— किं तावत्साहित्यम् एतच्च कदा एतत् प्रादुर्भूतम् तस्य किमुद्देश्यम् के च प्रधानतः तस्य प्रबन्धाः बन्धका वा।

साहित्यम्, तावत् सहितस्य भाव इति। 'गुणवचनब्राह्मणादिभ्यः—' (पा. सू.५/१/१२४) इति ष्यञ्। सहभावश्चाष्टादशप्रस्थानभिन्नानां विद्यानाम्। अथवा सहितस्य कर्म साहित्यम्, यस्मादत्र एव कविकर्मणि काव्ये सर्वा समाधीयन्ते विद्याः अस्मिन् विषये भामहेनैवं स्वमतं प्रकटितम्—

'न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः॥'

साहित्यदर्पणस्य विवृतिटीकासम्पादको दुर्गाप्रसादद्विवेदी अपि साहित्यसम्बन्धे कथयति—

'स्वस्वाभिलाषादिव यत्र सर्वे
विद्याविलासा मिलिता लुठन्ति।
तल्लोकवैदग्ध्यविधानयन्त्रं
साहित्यतन्त्रं कलयन्ति कल्याः॥'

तदेतत्साहित्यं कविकर्मणः शासकत्वात्साहित्यशास्त्रमिति कथ्यते। अतो व्याकरणस्य यथा शब्दानुशासननं तथैतस्य काव्यानुशासनमित्यपि नाम भवितुमर्हति। साहित्यस्य च यावदुपलब्धविषयरूपत्वाद् विषयाणां चानेकरूपत्वाद् वस्तुतः निरवधि गाम्भीर्यम्।

अतएवविक्रमाङ्कचरिते विल्हणः कथयति—

'साहित्य-पाथोनिधिमन्थनोत्थं
कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय
काव्यार्थचौराः प्रगुणीभवन्ति ॥'

साहित्यस्यैवापरं नाम वर्तते 'अलङ्कारशास्त्रम्' । तत्र 'अलंकरणमलंकारः इति 'भावे' (पा. सू. ३/३/१८) घञ्-प्रत्ययत्वादलंकारशब्दः सम्पद्यते । 'अलंक्रियतेऽनेन' इति 'अकर्तरि च कारके संज्ञायाम्' (पा. सू. ३/३/१९) इति करणे घञ्-प्रत्ययत्वादुपमादिषु अलङ्कारेषु प्रयुज्यते । अथवा 'प्रधानेन व्यपदेशा भवन्ति' इति करणव्युत्पन्नोऽपि अलङ्कारशब्दः शास्त्रवाची जायते । 'अलंकारान् सर्वानपि गलितगर्वान् रचयतु' इति कथयित्वा पण्डितराजो

जगन्नाथो लक्षणायाः स्थाने अपि अलङ्कारत्वयभिदधाति—

साहित्यस्य लक्षणं विधीयते स्वग्रन्थे वाग्भटेन

'अधीत्य शास्त्राण्यभियोगयोगा-
दभ्यासवश्यार्थपदप्रपञ्चः ।
तं तं विदित्वा समयं कवीनां
मनः प्रसत्तौ कवितां विदध्यात् ॥' इति ।

'कविर्मनीषी परिभूः स्वयंभूः—' (शुक्लय. सं. ४ व. ८) "जन्माद्यस्य यतः, शास्त्रयोनित्वात्" (वै. सू. १/१/२-३) इत्येवं पारमार्थिकस्य कवेः (जगत्कर्तुः परमेश्वरस्य) कर्मवद्, जगति व्यावहारिकस्य कवेः (वाल्मीकि-व्यास-गुणाढ्य-कालिदासादीनां) कर्म काव्यं शब्दार्थलक्षणं यथालक्ष्यं साहित्यमिति व्यवहारपदं प्रतिपद्यते ।साहित्योदाहृतमलङ्कारमधिकृत्य 'ईयुषी रागमुपमा शाश्वतीनाम्' (ऋग्वेद—१/११/५५) तदप्युपमास्ति (शतपथब्राह्मणम् -११-५-१-५) इत्यादिनाऽलङ्काराणां वेदब्राह्मणादिषु विद्यमानत्वादलङ्काराणां, साहित्यशास्त्राप्यन्यशास्त्रवत् वेदोपजीव्यत्वं प्राचीनत्वं चावम्यते ।

'नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्॥

भट्टश्रीतौतोक्तेनानेन मतेन

यथा—शब्दः, द्रव्यं वा गुणो वा स्यात्; अर्थः, पारमार्थिको वा व्यावहारिको वा प्रातिभासिको वा स्यात्; एतयोः संबन्धः, नित्यो वानित्यो वा स्यादित्यन्यदेतत्। परं स्वस्वसमयमर्यादया भिद्यमानोऽपि संज्ञासंज्ञ्यङ्गाङ्गिभावबन्धुरो विश्वजनीनो वाङ्मयप्रवाहः साहित्येनैव नीयते। साहित्येन कवयः सर्वेषामेव वेदाङ्गानां परिचयं ददति। अत एव आचार्यो विश्वनाथः काव्यस्य प्रयोजनानि स्फुटीकुर्वत, कथयति—**"चतुवर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेव"** तत्र शिक्षा तावत्—(१) शिक्ष्यतेऽनयेति, शिक्षणं वा शिक्षा; वेद इवात्राप्युच्चारणसौष्ठवद्वारेणैव गुण-रीतिभ्यां शिक्ष्यते। यामन्तरेण 'अविदित गुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्' इति **सुबन्धूक्ति** तिरोदधती **कालिदाससूक्तिरप्यात्मनो** नैसर्गिकीं श्रव्यतां जहती कर्णौ नन्दयति। तदेतदुक्तं भवगता **पतञ्जलिना** महाभाष्ये—'ग्रस्तं निरस्तमविलम्बितं—' इत्यादि (प.)। शिक्षया स्वरोच्चारणसाधुना जनः पतञ्जलिनोक्तान् दोषानपि प्रजहाति। अत एवोक्तं महाकविनाः—

विल्हणेन—

'जयन्ति ते पञ्चमनादमित्र-
चित्रोक्ति-संदर्भ-विभूषणेषु।
सरस्वती यद्वदनेषु नित्य-
माभाति वीणामेव वादयन्ती॥' (विक्रमाङ्क १/९-१०)

एषा शब्दात्मककाव्यशरीरस्वरूपपर्यवसिता विल्हणोक्तिः साधु कवीनां कवित्वं सूचयति।

शिक्षावदेव कल्पोऽपि काव्ये वर्ण्यते। कल्पलक्षणं च कल्प्यतेऽनेनेति कल्पः, कल्पसूत्रम्। स च श्रौतः स्मार्त इति द्विविधः। सोऽयं वेद इवात्रापि वेदोप-

जीविनि कविकर्मणि काव्ये देशकालपात्राण्यनुसरन्नेकधा वर्ण्यते । **तत्राग्निहोत्र-विषये**—

कालिदासेन रघुवंशस्य प्रथमसर्गे कथ्यते—

"दुदोह गां स यज्ञाय, सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥"

"प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहित-विरिब्धैः सामिधेनीरधीत्य ।
कृतगुरुदुरितौघध्वंसमध्वर्युवर्यै-
र्हुतमयमुपलीढे साधु सांनाय्यमग्निः ॥' (११/४१)

इति माघोक्तिः । श्रीहर्षेण नैषधयिचरिते पद्यमिदमुदाह्रियते स्मार्तशब्दस्य गृह्यार्थाधिकव्यापारे त—

'अवमावामार्धे सकलमुभयाकारघटनाद्
द्विधाभूतं रूपं भगवदभिधेयं भवति यत् ।
तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते सिध्यतु स ते ॥'

व्याक्रियते शब्दजातं येनतद् **व्याकरणम्** । नामरूपव्याकरणयोगतयैव व्युत्पाद्यते । उक्तं च 'तदधीते तद्वेद' (पा. सू. ४/२/५९) "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्" इत्येवमानन्दवर्धनाचार्योध्वनिमूल-मन्विष्यन् सगर्वमुदाहरति ।

'द्वन्द्वोऽस्मि द्विगुरस्मि च गृहे च मे सततमव्ययीभावः ।
तत्पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥'

इति षट्समासी विषये कथं भावपूर्णः श्लोकः सादरमुच्चार्यते । 'क्रियेत चेत्साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमामिधेया । या स्वौजसां साधयितुं विलासैस्तावत् क्षमा नामपदं बहु स्यात् (नैषक० ३-२३) श्रीहर्ष एवं

पाणिनीयशास्त्रस्यामिप्रायं सूचयद् राज्ञो नलस्य चरित्रं चित्रयति। **भारतीयानां** प्राथमिकशिक्षाशैलीमभिदधत् 'दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत्कोऽप्यधीती कपोतः—'(नैषध० १९/६१) इति वोदाहार्यम्॥

(४) निरुच्यतेऽनेनेति निरुक्तम्। तच्च यद्यपि निर्वचनयोगेनापाततो व्याकरणेऽन्तर्भवद् दृश्यते तथापि निर्वचनार्थं विशेषाभिधित्सया पृथगेव गण्यते। तदेतद् यास्केन भगवता **पाणिनिना**—'पृषोदरादीनि यथोपदिष्टम्' (पा. सू. ६/३/१०९) इत्येवं सूत्रितम्। तदनुगामिनाः यास्केन—'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥' इति निरवाचि। निघण्टुप्रभृतीनां शब्दानां निर्वचनं यास्केनैतदनुसृत्यैव कृतम्।

(५) छाद्यते छन्द्यते वाऽनेनेति **छन्द** इति यास्कः। छन्द्यतेऽनेनेति तु वैयाकरणाः। तच्च वेद इव काव्यशास्त्रेऽपि ऋग्यजुःसामभिरिव कविभिः पद्यगद्यगानैरुपकृतमिति यथालक्ष्यं लक्षणीयम्।

(६) द्योत्यतेऽनेनेति, द्योतनं वेति ज्योतिः। अन्ये तु 'ज्युत्' इति धातुरूपं पठित्वा निर्वचन्ति। अस्माद् अणि अचि प्रत्यये वा ज्योतिषम्। एतच्च वेद इव काव्यशास्त्रेऽपि सकलव्यवहारसाधननिमित्तस्य व्यङ्ग्यस्य कालस्य, तद्व्यञ्जकग्रहनक्षत्रादेश्च बोधनेनोपकारकमिति काव्याचार्याणां प्रत्यक्षम्। तत्र गणितविषये विज्ञानसम्मतानि भूयांसि श्रुतिस्मृतिलिङ्गानि। पौरुषाण्यपि—'हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' (रघु. ३/२२) 'प्रतिपच्चन्द्रनिभोऽयमात्मजः' (रघु. ८/६५) 'प्रतिपच्चन्द्रमिव प्रजा नृपम्' (किरात. २/११) इत्येवमादीनि बहूनि पद्यान्युपलभ्यन्ते। इह प्रथमेन पद्येन प्रतिपत्प्रारभ्य पौर्णमासीपर्यन्तं चन्द्रस्य वृद्धिरिष्यते; द्वितीयतृतीयाभ्यां तूद्यन्ती प्राथमिकी दशेति। यत्त्विह प्रतिपदायां चन्द्रादृश्यत्वं स्वीकृत्य द्वितीया गृह्यते, तन्न चतुरस्रम्। **लल्लादि**सूक्ष्मविधिना शुक्ले साधिते प्रायशः प्रतिपद्यपि चन्द्रदर्शनोपलम्भात्, दूरदर्शिनोः कवित्रोरुपमेययोरतिदुर्बलत्वापादनस्य प्रतिपादयितुमिष्टत्वाद् एवंविधशुक्लपक्षे द्वितीयायां चन्द्रबिम्बाधिक्यदर्शनात्। किंबहुना। १९७४ तमे **विक्रम**संवत्सरे **राजपूताना**ख्यपञ्चाङ्गानुसारं बहूनि चन्द्रदर्शनानि प्रतिपदासूपलभ्यन्ते। फलितविषये तु 'ग्रहैस्ततः

पञ्चभिरुच्चसंश्रयैः—' (रघु. ३/१३) इत्येवमादीन्युदाहरणानि विचारयितुं शक्यन्ते ॥

इत्थं शिक्षादिषडङ्गानां कविसूक्तिषु निरूपणमवलोक्य संप्रति दर्शनानि निरूप्यन्ते—

अथोपवर्ण्यमाणे कविकर्मणि समानतन्त्रयोर्न्यायवैशेषिकयोः संकीर्णोदाहरणं दुर्गाप्रसादद्विवेदिभिः **देवराज**चरिते इत्थं निरूप्यते ।

'न्यक्कुर्वन् स्फुटकोटिभङ्गिरचनैः प्राभाकरं मण्डलं
शक्तिं काञ्चनभास्वरां प्रकटयञ्जात्याकृतिव्यक्तिषु ।
अर्थापत्तिनिवारणैकनिपुणो व्याख्यातसर्वक्षणो
यस्यां तर्कवदैक्षि येन कृतिना श्रीविश्वनाथालयः ॥'

यथा वा **नैषधीय**चरिते—

'ध्वान्तस्य वामोरु विचारणायां
वैशेषिकं चारु मतं मतं मे ।
औलूकमाहुः खलु दर्शनं तत्
क्षमं तमस्तत्त्वनिरूपणाय ॥' (नैषध० २२/३६)

सांख्य-योगयोर्यथा—

एवमन्यान्यप्यास्तिकनास्तिकदर्शनानि यत्र तत्र कविकृतिषु बहुधा वर्णितानि ।

साहित्यस्योद्भवः

एतत् (साहित्यं) कदा कथं वा प्रादुर्भूतम् इति विचारणवसरे वेदाङ्गेपाङ्गानां तत्तद्दर्शनानां तदनुप्राणितानामितरेषां च बहूनां निबन्धानां वेदोपजीवकत्वेन विवेचकानां सम्मतत्वात् । वेदेषु यत्र तत्रांशत उपलब्धानां विषयजातानां गाम्भीर्यमादायैर्वार्जितज्ञानैर्लोकगुरुभिराचार्यैः प्रसादमधुराणि विविधानि शास्त्राणि रचितानि । यथा श्वेताश्वतरोपनिषदि मन्त्रोपनिषदा स्पष्टं ज्ञातुं शक्यते ।

'कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्या ।
संयोग एषां न त्वात्मभावा-
दात्माप्यनीशः सुखदुःखहेतोः ॥' (१/२)

एवमेव छान्दोग्योपनिषद्यपि महर्षिणा प्रत्यपादि—'इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या' इति । इत्थं वेदानां वेदाङ्गेपाङ्गानां सर्वेषामवगाहनेन स्पष्टमिदंभवति, यद् भगवता भरतेनापि सर्वानितान् विचारान् मनसि सम्यङ्निधाय साहित्यशास्त्रस्योद्भवोऽपि वेदेष्वेव स्वीकृतः । अत एव स नाट्यस्योद्भवं वेदेभ्य एव स्वीकृत्य नाट्यशास्त्रे कथयति—

'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान्रसानाथर्वणादपि ॥' (नाट्यशा. १/१७)

आग्नेयपुराणे तु श्रव्यदृश्ये उभे अपि काव्ये सम्यग् व्युत्पादिते । एतेनान्य-शास्त्रवत् साहित्यशास्त्रस्यापि वेदोपजीवकत्वम्, सिध्यति । अतः साहित्यमूलस्य वेदाङ्गोपाङ्गसमानकालिकत्वं स्वीकर्त्तव्यम् ।

राजशेखरस्य काव्यमीमांसायां साहित्यस्योद्भवः महतार्थवादेन प्रस्तुतः— "तद्यथा श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्य शिष्येभ्यः साहित्यमुपादिदेश । सोऽपि भगवान् स्वयंभूरिच्छाजनिभ्यः स्वान्तेवासिभ्यः । तेषु विदुषां वन्द्यः काव्यपुरुष आसीत् । तं च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थद्रष्टारं प्रजासु हितकाम्यया प्रजापतिः काव्यविद्याप्रवर्तनायै प्रैरयत् । सोऽष्टादशाधिकरणीं काव्यविद्यां काव्य-विद्यास्नातकेभ्यः प्रोवाच । तत्र ये येस्नातका यद्यच्छास्त्रं रचयामासुः तस्य परिचयः एवं तेन प्रदत्तः । कविरहस्यं सहस्राक्षः व्याचख्यौ औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेतनायनः, यमकानि—चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभया-लंकारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दि-केश्वरः, दोषाधिकरणं धिषणः, गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचमार इति । ततस्ते पृथक् पृथक् स्वशास्त्राणि विरचयांचक्रुः ।

अथैवं प्राच्येभ्यो गुरुभ्योः शृणुमो वयं यत्किल **धिषणं** शिष्याः पप्रच्छुः, कीदृशः पुनरसौ सारस्वतेयः काव्यपुरुषो युष्माकं गुरुः ? स सम्पूर्णां कथामेवं वर्णयति— पुरा पुत्रीयन्ती सरस्वती हिमालये (तपस्तेपे) प्रीतेन मनसा तां ब्रह्मदेव उवाचः— पुत्रं सृजामि । अथैषा काव्यपुरुषं जनयामास । जातः सन्नेव स सरस्वती-पुत्रः वाचमेवमूचे—

यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥

तस्य वाणीमुपलभ्य भाषाविषये नवीनां प्रकृतिं परिज्ञाय देवी उवाच । वत्स, छन्दोमय्याः वाण्याः प्रणेतोऽसि त्वयैतत् 'पुत्रात्पराजयो द्वितीयं पुत्रजन्म' इति । त्वत्तः पूर्वे विद्वांसो गद्यं रचयामासुर्न पद्यम् । त्वत्तोऽधुना छन्दः प्रवर्त्स्यति । अहो

प्रशस्योऽसि। शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्, प्राकृतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम्। समः प्रसन्नो मधुर उदार ओजस्वी चासि। प्रशस्यतमं च ते वचः, रस आत्मा, रोमाणि च्छन्दांसि, प्रश्नोत्तरप्रवह्लकादिकं च वाक्केलिः, अनुप्रासोपमादयश्च त्वामलंकुर्वन्ति। भविष्यतोऽर्थस्याभिधात्री श्रुतिरपि एवं प्रवर्तते—

चत्वारि श्रृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्या आ विवेश॥ (ऋ. सं. ३ अष्ट. ८ अ. १० व.)

कविशब्दश्च 'कवृ वर्णे' इत्यस्य धातोः काव्यकर्मणो रूपम्। काव्यैकरूपत्वाच्च **सारस्वतेयोऽपि** काव्यपुरुष इति भक्त्या प्रयुज्यते। ततश्च विनिवृत्ता वाग्देवी तत्र पुत्रमपश्यन्ती मध्येहृदयं चक्रन्द। प्रसङ्गतश्च **वाल्मीकिर्मुनिश्रेष्ठः** सप्रश्रयं तमुदन्तमुदाहृत्य भगवत्यै भृगुसूतेराश्रमपदमदर्शयत्। सापि प्रस्नुतस्तनी पुत्रायाङ्कपालीं ददाना शिरसि च आजिघ्रन्ती स्वस्तिमता चेतसा प्राचेतसायापि महर्षये निभृतं सच्छन्दांसि वचांसि प्रायच्छत्। अनुप्रेषितश्च स तया निषादनिहतपत्नीकं क्रौञ्चयुवानमनिशं क्रन्तमुदीक्ष्य श्लोकमिममुज्जगाद—

'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥'

ततो दिव्यदृष्टिर्देवी तस्मा अपि कवित्वे वरमदात्। यदुतान्यदनधीयानो यः प्रथममेनमध्येष्यते स सारस्वतः कविः संपत्स्यत इति। स तु महामुनिः प्रवृत्तवचनो रामायणमितिहासं विरचयमास। **द्वैपायनस्तु** तत्प्रभावेण शतसाहस्रीं संहितां भारतम् समरचयत्। एकदा तु ब्रह्मर्षिवृन्दारकयोः श्रुतिविवादे देवः स्वयंभूस्तामिमां निर्णेत्रीमुद्दिदेश। मातरं व्रजन्तीं काव्यपुरुषः सोऽनुवव्राज। वाग्देवी तु वत्स, स्वयंभुवाऽननुमतस्य ते न ब्रह्मलोकयात्रा निःश्रेयसायेति वदन्ती हठान्न्यवर्तयदे-

नंस्वयं तु प्रववृते । ततः स काव्यपुरुषो रुषा निश्चकाम प्रियं मित्रमस्य च कुमारः साक्रन्दं रुदन्नभ्यधीयत गौर्या—तात, तूष्णीमास्स्व, प्रायः प्राणभृतां प्रेमाणमन्तरेण नान्यद्बन्धनमस्ति तदेतस्य वशीकरणं कामपि स्त्रियं सृजामीति विचिन्तयन्ती साहित्यविद्यावधूमुदपादयदादिशच्चैनामेष ते धर्मपतिः पुरः प्रतिष्ठते तदनुवर्तस्वैनं निवर्तय च। भवन्तोऽपि हन्त मुनयः काव्यविद्यास्नातकाश्चरितमेतयोः साहित्यविद्याकाव्यपुरुषयोः स्तुध्वमेतद्धि वः काव्यसर्वस्वं भविष्यतीत्यभिधाय जोषमासिष्ट । तेऽपि तथा कर्तुमवतस्थिरे ।

अथ ते सर्वे प्रथमं प्राचीं दिशं प्रतिजग्मुः, यत्राङ्गवङ्गाद्या प्रदेशाः । तत्राभियुञ्जाना तमौमेयी यं वेषं यथेष्टमसेविष्ट, स तत्रत्याभिः स्त्रीभिरसेव्यत । सा प्रवृत्ती रौद्रमागधी । तां च ते मुनयोऽभितुष्टुवुः । यदृच्छयापि यादृङ्नेपथ्यः स सारस्वतेय एव आसीत् । सापि तमनुसरती साहित्यविद्या सैव प्रवृत्तिः । यदपरं नृत्तवाद्यादिकमेषा चक्रे, सा भारती वृत्तिः । तां ते मुनयोऽभितुष्टुवुः । तथाविधया तया समासवदनुप्रासवद्योगवृत्तिपरम्परागर्भं यदगद्यत, सा गौडीया रीतिः । तां ते मुनयोऽभितुष्टुवुः । ततश्च स पाञ्चालान् प्रदेशान् प्रत्युज्जगाम यत्र पाञ्चालशूरसेनहस्तिनापुरकाश्मीरवाहीकबाह्लीकबाह्लवेयादयो जनपदाः । तत्राभियुञ्जाना तमौमेयी यं वेशमसेविष्ट, स तत्रत्याभिरन्वाक्रियत । सा प्रवृत्तिः पाञ्चालमध्यमा । तां ते मुनयोऽभितुष्टुवुः । किंचिदार्द्रितमना यन्नेपथ्यः स सारस्वतेय आसीत्, तद्वेषाः सुचारिताः पुरुषा बभुवुः । सापि यन्नृत्तगीतवाद्यविलासादिकं दर्शयांबभूव, सा सात्त्वती वृत्तिः । आविद्धगतिमत्त्वात्सा चारभटी । तां ते मुनयोऽभितुष्टुवुः । तथाविधाकल्पयापि तया सारस्वतेयः ईषदसमासमीषदनुप्रासं च जगाद, सा पाञ्चाली रीतिः । तां ते मुनयोऽभितुष्टुवुः । ततः सोऽवन्तीन् प्रत्युच्चचाल, यत्रावन्तीवैदिशसुराष्ट्रमालवार्बुदभृगुकच्छादयो जनपदाः । तत्राभियुञ्जाना तमौमेयी यं वेषमसेविष्ट स तत्रत्याभिरन्वाक्रियत । सा प्रवृत्तिरावन्ती । पाञ्चालमध्यमादाक्षिणात्ययोरन्तरचारिणी हि सा । अत एव सात्त्वतीकैशिक्यौ तत्र वृत्ती । तां ते मुनयोऽभितुष्टुवुः । ततश्च स दक्षिणां दिशमाससाद, यत्र मलयमेकलकुन्तलकेरलपालमङ्गरमहाराष्ट्रवङ्गकलिङ्गादयो जनपदाः । तत्राभियुञ्जाना तमौमेयी यं वेषमसेविष्ट, स तत्रत्याभिरन्वाक्रियत । सा दाक्षिणात्या प्रवृत्तिः । तां ते मुनयोऽभितुष्टुवुः । तामनुरक्तमना यन्नेपथ्यः स

सारस्वतेयस्तद्वेषाः पुरुषाः । सापि यद्विचित्रनृत्तगीतवाद्यविलासादिकमाविर्भावयामास, सा कैशिकी वृत्तिः । तां ते मुनयोऽभितुष्टुवुः यदत्यर्थं च स तया स्थानानुप्रासवदसमासं योगवृत्तिगर्भं च जगाद, सा वैदर्भी रीतिः । तां ते मुनयोऽभितुष्टुवुः । तत्र वेषविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः । चतुष्टयी गतिर्वृत्तीनां प्रवृत्तीनां च, देशानां च पुनरानन्त्यं तत्कथमिव कात्स्न्येंन परिग्रह इत्याचार्या अनन्तानपि च देशांश्चतुर्धैव कल्पयन्ति । चक्रवर्तिक्षेत्रं सामान्येन तदवान्तरविशेषैः पुनरनन्ता एवेति **यायावरीयः** । दक्षिणात्समुद्रादुदीचीं प्रति योजनसहस्रं चक्रवर्तिक्षेत्रम्, तत्रैव नेपथ्यविधिः । ततः परं दिव्याद्या अपि यं देशमधिवसेयुस्तद्देशीयं वेषमाश्रयन्तो निबन्धा निबन्धनीयाः । स्वभूमौ तु कामचारः । द्वीपान्तरभवानां तदनुसारेण वृत्तिप्रवृत्ती । रीतयस्तु तिस्रस्तास्तु पुरस्तात् । तत्रास्ति मनोजन्मनो देवस्य क्रीडावासो विदर्भेषु वत्सगुल्मं नाम नगरम् । तत्र **सार**स्वतेयस्ता**मौ**मेयीं गन्धर्ववत्परिणिनाय । ततस्तद्वधूवरं विनिवृत्य तेषु प्रदेशेषु विहरमाणं तुषारगिरिमेवाजगाम, यत्र च गौरी सरस्वती च मिथः संबन्धिन्यौ बभूवतुः । तौ च कृतवन्दनौ दम्पती दत्वाशिषं गौरवान्वितेन शरीरेण कविमानसनिवासिनौ चक्रतुः । तयोश्च कविलोकस्वर्गसर्गं तमकल्पतां, यत्र काव्यमयेन शरीरेण पृथिव्यां निवसन्तः काव्यमयेन दिव्येन देहेन कवय आकल्पं मोदन्ते" इति ॥

साहित्यस्योद्देश्यम्

साहित्यस्य उद्देश्यविषये तत्रभवान् भाम्ह इत्यमाह—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्॥'

आचार्यदण्डी एवं विषये वदति—

'इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम्।
तेषामसंनिधानेऽपि न स्वयं पश्य नश्यति॥'

आचार्यमम्मटः काव्यस्य साहित्यस्य वा प्रयोजनत्वेन

साहित्यस्योद्देश्यमेवं वर्णयति

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे॥'

चतुर्वर्गमूलका हि लोकयात्रा साहित्योपज्ञातेन मनोहारिणा शब्दवैभवेन संस्क्रियमाणा संपद्यमाना कल्पलतेव व्यवहारभूमिमलंकुरुते।

साहित्यस्य प्रधानतः प्रबन्धेषु वर्तमाने काले कालकवलनावशिष्टं नाट्यशास्त्रं तत्रभवता भरतेन मुनिना प्रणीतं स्वीक्रियते । ततश्च महापुराणमाग्नेयं भगवता कृष्णद्वैपायनेन प्रणीतं इति द्वितयं समालोचकानां विचारभूमौविद्यमानं वर्तते ।

तत्र **भरतो** मुनिर्महेन्द्रविजयोत्सवे पितामहमहेश्वरकथनानुसारं **नाट्यवेदं** प्रथमं निर्ममे । ततो भरतान्तेवासिन ऋषीणां तिरस्कुर्वन्तस्तैरभिशप्ताः । ततो राज्ञो **नहुष**स्याभ्यर्थनया भरतोपदिष्टास्ते भूमौ तस्य च गृहेषु नाट्यप्रयोगमकार्षुः । इत्यादि **नाट्यशास्त्र**स्याद्यान्त्योपान्त्याध्यायैर्निश्चीयते । तथा चोक्तम् दशरूपकरचयित्रा धनञ्जयेन—

'उद्धृत्योद्धृत्य सारं यमखिलनिगमान्नाट्यवेदं विरञ्चि-
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः ।
शर्वाणी लास्यमस्य प्रतिपदमपरं लक्ष्म कः कर्तुमीष्टे
नाट्यानां किंतु किंचित्प्रगुणरचनया लक्षणं संक्षिपामि ॥'

दुष्यन्तपुत्रस्य । भरतेन कृतं नाट्यशास्त्रं तद्वंशजाश्च लक्षणया भरतनाम्ना सर्वत्र साहित्यशास्त्रे व्यवह्रियन्ते ।यथा च खलु दुष्यन्तपुत्रस्य शाकुन्तलेयस्य राज्ञो **भरतस्यो**त्तरकालीना राजानः क्षत्रियाश्च भरताः कथ्यन्ते । नाट्यशास्त्रतः पूर्वमन्येऽपि नाट्याचार्या उपलभ्यन्ते—

'यथोक्तं मुनिभिः पूर्वं स्वातिनारदपुष्करैः ।'

(३४ अ. २ श्लो.)

'न शक्यं चान्यथा कर्तुं वचनं पार्थिवस्य हि ।
अस्माकं चैव सर्वेषां नहुषस्य महात्मनः ॥

आत्मोपदेशसिद्धं हि नाट्यं प्रोक्तं स्वयंभुवा ।
शेषं प्रस्तारतन्त्रेण कोहलः कथयिष्यति ॥'

(३७ अ. १७—१८ श्लो.)

'भरतानां च वंशोऽयं भविष्यंश्च प्रवर्तितः ।
कोहलादिभिरेवं तु वत्सशाण्डिल्यधूर्तितैः ॥'

(३७ अ. २४ श्लो.)

साहित्यविषयोऽय **भामह**ादिग्रन्थेभ्यस्तत्पूर्वेभ्यो वा यत्रपि संक्रमितः, तद्विषये प्रतीयते यद् वेदार्थोपबृंहकेभ्य आग्नेयादिभ्य एव भामहादिग्रन्था साहित्यमूलं स्वीकुर्वते । अपरत्र च **बृहत्क**थारघुवंशादिपर्यालोचनेन तत्कर्तृकालेऽपि कविकर्मपद्धतेरवश्यंभावाद्, यत्प्रयातान्येतानि **गुणाढय**कालिदासादिसूक्तान्यस्माकमवलम्बनानीति । आलंकारिकेषु भामहातिरिक्तो नान्यः कश्चन संप्रत्यपि संभावनामारूढ इति समालोचकाः । भामहग्रन्थस्तन्मूलक एवेत्यपि न सिद्ध्यति । यस्मात्तस्मादेव—

'रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितानन्म् ॥ १३ ॥

रूपकादिमलंकारं बाह्यमाचक्षते परे ।
सुपां तिङ्गां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥ १४ ॥

तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकारभेदमिष्टं द्वयं तु नः ॥ १५ ॥ (१ परिच्छे.)

इत्येतेन; तथा—

'इति निगदितास्तास्ता वाचामलंकृतयो मया
बहुविधकृतीर्दृष्ट्वाऽन्येषां स्वयं परितर्क्य च ।
प्रथितवचसः सन्तोऽभिज्ञाः प्रमाणमिहापरे
गुरुतरधियामस्वाराधं मनोऽकृतबुद्धिभिः ॥ १६ ॥"

(१५ परिच्छे)

इत्येवमादिना च तदीयेन सूक्तेन प्राचां कतिपयेषामन्येषामपि काव्यानुशासनानां ज्ञापनात् । नाट्यशास्त्रे हि—

'उपमा दीपकं चैव रूपकं यमकं तथा।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः ॥'

(१६ अ. ४१ श्लो.)

इत्येवमलंकारानुद्दिश्य—

'गूढार्थमर्थान्तरमर्थहीनं
भिन्नार्थमेकार्थमभिप्लुतार्थम्।
न्यायादपेतं विषमं विसंधि।
शब्दच्युतं वै दश काव्यदोषाः ॥'

(१६ अ. ८४ श्लो.)

'श्लेषः प्रसादः समता समाधि-
र्माधुर्यमोजः पदसौकुमार्यम्।
अर्थस्य च व्यक्तिरुदारता च
कान्तिश्च काव्यार्थगुणा दशैते ॥'

(१६ अ. ९२ श्लो.)

इत्येवं दश दोषास्तावन्तो गुणा उद्दिष्टा यथोद्देशं लक्षिताश्च। एत एव **काव्यालंकारसूत्रे** — 'ओजप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थ व्यक्तिकान्तयो बन्धगुणाः' (३ अधिकर. १ अध्या. ४ सू.) इति **वामनेनोक्ताः**; 'माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश' इति **प्रकाशकारादिभिः** प्रयुक्ता व्याख्यातृभिर्वामनोक्ततया साधिताश्च। परमेते (दश गुणा) वामनतः प्राचीनत्वेन संभावितस्य **दण्डिनः काव्यादर्शेऽपि सन्ति**। दण्डिवामनयोर्ग्रन्थतो गुणानां **भरताद्युपज्ञत्वं** न ज्ञायते। भरतेन स्मृतानां **स्वातिनारदपुष्करादीनां** ग्रन्थेषु पारम्पर्येषु वा त एतेऽधिका वा काव्यालंकारविषया इति को निर्णयेत्। इतः 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। कर्मन्दकृशाश्वादिनिः' (४/३/११०—१११) इति **पाणिनिसूत्राभ्यां शिलालिकृशाश्वप्रणीतानां** केषांचन नटसूत्राणां दर्शनात्। दण्डिनः प्राचीनत्वेन संभावितस्य **भामहस्य** काव्यालंकारे तु भरतोक्तेभ्यो दोषगुणेभ्यः कति-

पय एव दर्शिताः । एवं समासव्यासवर्णनाभिप्रायतो भामहो भरतात्पूर्व इति कथमपि स्वीक्रियते यतो भामहादिभिर्भरतादेव नाट्यविषय उद्धृत इति ।

नाट्यशास्त्रस्येवार्षस्याग्नेयस्यापि यथाऽन्ये प्रतिपाद्यास्तत्र तत्र शब्दतोऽर्थतस्तात्पर्यतो वा गृहीता दृश्यन्ते, तथैतेऽलंकारविषया अपीति काव्यशास्त्रिणां प्रत्यक्षम् । तदेतदालोकावकाशे दर्शनवैचित्र्येण शुक्तिखण्डेषु रजतखण्डवद्, मरीचिमालिनो मरीचिनिचयेषु पानीयपूरवदुत्तरकाले बाधाभावान्न प्रत्याख्येयम् । आग्नेयस्य विशुद्धमूलपाठालाभेऽपि तदीयस्य विषयजातस्य तत्प्रभवत्वं तु **नारदीय**वाक्यबलेन संवादान्तरेण च विश्वसितव्यमेव । आग्नेयपुराणे त्वेवं पठ्यते । नारदीये पूर्वभागे ९९ ततमेऽध्याये । तत्र '—छन्दः शास्त्रमतः परम् । साहित्यं च ततः पश्चात्—' इदमपि । इत्थं च खलु यथा नामग्राहमगृहीतमपि भामहादिप्रोक्तं काव्यादर्शादिषूपलभ्यते तदीयतया च परिगृह्यते तथैवाग्नेयप्रोक्तमपि स्वीक्रियताम् ।

भामहदण्डिनोर्विषयाणां तुलनात्मकानि स्थलानि च इत्थं प्रतिपाद्यन्ते ।

'अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते ।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥'

इति भामहः (१ परिच्छे. २९ श्लो.)

'नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः ॥'

इति दण्डी (१ परिच्छे. २४ श्लो.)

'अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसंधि च ॥

देशकालकलालोकन्यायागमविरोधि च ।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते ॥'

इति भामहः (४ परिच्छे. १-२ श्लो.)

'अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसंधिकम्॥

देशकालकलालोकन्यायागमविरोधि च।
इति दोषा दशैवैते वर्ज्याः काव्येषु सूरिभिः॥'

इति दण्डी (३ परिच्छे. १२५-१२६ श्लो.)

'कर्तृवंशप्रशंसा स्याद् यत्र गद्येन विस्तरात्।
कन्याहरणसंग्रामविप्रलम्भविपत्तयः॥

भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः।
उच्छ्वासैश्च परिच्छेदो यत्र सा चूर्णकोत्तरा॥

वक्रं वाऽपरवक्रं वा यत्र साऽऽख्यायिका स्मृता।
श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसयति॥'

(इत्याग्नेयम् ३३७ अ.)

'प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना
गद्येन मुक्तोदात्तार्था सोच्छ्वासाऽऽख्यायिका मता॥

वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।
वक्रं चापरवक्रं च काले भाव्यार्थशंसि च॥

कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता॥'

(इति भामहः १ परिच्छे.)

'संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली॥'

(इत्याग्नेयम् ३३७ अ.)

'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥'

(इति दण्डी १ परिच्छे.)

"काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते ।
अलंकरिष्णवस्ते च शब्दमर्थमुभौ त्रिधा ॥"

(इत्याग्नेयम् ३४२ अ.)

'काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कात्स्न्येंन वक्ष्यति ॥'

(इति दण्डी २ परिच्छे.)

'अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथा वै रोचते विश्वं तथैतत्परिवर्तते ॥

शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् ।
स चेत्कविर्वीतरागो नीरसं व्यक्तमेव तत् ॥'

(इत्याग्नेयम् ३३९ अ.)

तथा चेदमुच्यते—

'अपारे काव्यसंसारे कविरेव(रेकः) प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥

शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् ।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥'

(इति ध्वन्यालोकः ३ उद्यो.)

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥
व्युत्पत्तिर्दुर्लभा तत्र विवेकस्तत्र दुर्लभः ॥ ४ ॥'

'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् ।
पृथक्प्रयत्ननिर्वर्त्यं वाग्वक्रिम्णि रसाद्वपुः ॥ ३६ ॥

त्रिवर्गसाधनं नाट्यमित्याहुः करणं च यत् ॥ ७ ॥'

इत्याग्नेयं (३३७-३३८ अ.) स्वनाम्नैव साहित्यदर्पणस्य प्रथमपरिच्छेदे न्यस्तम् (५, १९,६ पृ.)

एतेन यावद् भामहात्प्राचीनः कश्चन साहित्यसंदर्भो न प्रतीयते, समालोचकैर्वान समालोच्यते तावद् भरताग्नेयादिभ्य एव भामहादिग्रन्था निर्मिता इत्येवं स्वीकर्त्तव्यम् ।

भारतीयैरैतिह्यकारकैः भरतादीनां मुनीनां कालावधिरेवं प्रमाणीक्रियते— भरतमुनिस्त्रेतायुगे नाट्यशास्त्रं प्राणैषीदिति । अतः स स्वोक्त्यैव त्रेतायुगीय इति एवं **पाराशर्यो** व्यासो द्वापरयुगे पुराणान्यरचयदिति यत्र तत्र प्रसिद्धम् । एष एव काल देवीभागवते पुराणे प्रतिपाद्यत एवम्—

अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ।
भारताख्यानमतुलं चक्रे तदुपबृंहितम् ॥

मन्वन्तरेषु सर्वेषु द्वापरे द्वापरे युग ।
प्रादुष्करोति धर्मार्थी पुराणानि यथाविधि ॥'

(१ स्कं. ३ अ. १७-१८ श्लो.)

तेन प्रतिमन्वन्तरं द्वापरे द्वापरे युगे महापुराणानां रचना स्वीकृता ।

किं बहुना साहित्यारम्भविषये प्रायशः इदमेव निर्णीयते यद् भामहो भरताद् आग्नेयपुराणाद्वा मौलिकान् विचारान् संगृह्यैव साहित्यशास्त्रस्योद्भावनां कृतवान् ।

साहित्यशास्त्रविषये प्रायशो मौलिकत्वेन ये ग्रन्थाः प्राप्यन्ते ते सन्ति निर्दिष्टानीत्थम्—

तत्र ध्वनिग्रन्थाः ।

(१) ध्वनिकारिका । (२) आलोकः । (३) लोचनम् । (४) हृदयदर्पणः । (५५) व्यक्तिविवेकः । एते पञ्चापि कश्मीरजन्मानोऽत्यन्तप्रौढा ।

वृत्तिप्रकरणानि ।

(१) कश्मीरवास्तव्स्य भट्टकल्लटसूनोर्मुकुलस्य अभिधावृत्तिमातृका । (२) सुप्रसिद्धराजानक—मम्मटस्य शब्दव्यापारविचारः । (३) दाक्षिणात्यस्य अप्पयदीक्षितस्य वृत्तिवार्तिकम् ।

अलंकारग्रन्थाः ।

(१) काश्मीरकस्य राजानक—रुय्य (च)कस्य **अलंकार**सर्वस्वम् । (२) काश्मीरकस्य राजानक—जयरथस्य अलंकारविमर्शिनी । (३ काश्मीरकस्य भट्टशोभाकरमित्रस्य **अलंकार**रत्नाकरः । (४) दाक्षिणात्यस्य अप्पयदीक्षितस्य चित्रमीमांसा । (५) दाक्षिणात्यस्य पण्डितराज—जगन्नाथस्य **चित्रमीमां**साखण्डनम् ।

नायिकारसप्रकरणानि ।

(१) रुद्रस्य शृङ्गारतिलकम् । मैथिलस्य भानुदत्तमिश्रस्य (२-३) रसमञ्जरीरसतरङ्गिण्यौ । (४) शिवरामत्रिपाठिनो रसरत्नाहारः ।

कतिपयविचारप्रकरणानि ।

(१) काश्मीरिकस्य राजानक—रुय्यकस्य **सहृदय**लीला । (२-४) काश्मीरिकस्य व्यासदासापरनाम्नः क्षेमेन्द्रस्य **कविकण्ठा**भरणसुवृत्ततिलकौचित्यविचारचर्चा । (५) राजशेखर**स्य** **काव्य**मीमांसा । (६) जैनयोररिसिंहामरचन्द्रयोः **काव्यकल्प**लतावृत्ती । (७) देवेश्वरस्य **कविकल्प**लता । (८) पर्वतीयस्य विश्वेश्वरपण्डितेन्द्रस्य **कवीन्द्र**कर्णाभरणम् ।

साहित्यग्रन्थाः ।

(१) धारापतेर्भोजदेवस्य सरस्वतीकण्ठाभरणम् । (२) महामाहेश्वर**स्य** विद्याधरपण्डितस्य **एकावली**शास्त्रम् । (३) दाक्षिणात्यस्य विद्यानाथस्य प्रतापरुद्रीयम् । (४) केशवमिश्रस्य **अलंकार**शेखरः । (५) जैनस्य आचार्यहेमचन्द्रस्य स्वोप-

ज्ञालंकारचूडामणिवृत्तिसहितं **काव्यानु**शासनम् । (६) जैनस्य वाग्भटस्य **काव्यानु**-शासनम् । (७) जैनस्य वाग्भटस्य **वाग्भटालंकार**: । (८) दाक्षिणात्यस्य अच्युतरायस्य स्वोपज्ञसरसामोदसहित: **साहित्यसार**: । (९) दाक्षिणात्यस्य कृष्णकवे**र्मन्दार**मरन्द: ।

रूपकप्रकरणानि ।

धनंजयस्य **दशरू**पकं धनिककृतालोकसंवलितम् । भारतीयस्य नाट्यशास्त्रस्य अष्टादश एकोनविंशो विंशश्चतुस्त्रिंशश्चाध्याया: अनेके रूपकग्रन्था: सर्वतन्त्रस्वतन्त्रस्य अभिज्ञानशाकुन्तलार्थयोतनिकाताऽवधेया इति ॥ अथ प्रसङ्गान्साहित्यस्य । राघवभट्टपादस्य लक्ष्यभूता: प्राच्योदीच्यप्रतीच्यदाक्षणात्या: कतिपये कविकर्मण: श्रव्यदृश्यग्रन्था निरूप्यन्ते—

तत्र काव्यग्रन्था: ।

(१-३) कालिदासस्य **रघु**वंश-कुमारसंभव—मेघदूतानि । (४) छत्र-भारवे: **किरा**तार्जुनीयम् । (५) घण्टा-माघस्य **शिशु**पालवधम् । (६) श्रीहर्षस्य **नैषधी**यचरितम् । (कव्यशास्त्रम्) (७) काश्मीरिकस्य ताल—रत्नाकरस्य **हरविजय**म् । (८) काश्मीरिकस्य बिह्लणस्य **विक्रमाङ्क**देवचरितम् । (९) काश्मीरिकस्य जगद्धरस्य स्तुतिकुसुमाञ्जलि: । (१०) शालिवाहनस्य **गाथास**प्तशती (गाहासत्तसई) । (११) प्रवरसेनस्य **सेतु**बन्धम् (दसमुहवहो) । (१२) वाक्पतिदेवस्य गउडवहो (गौडवधम्) ।

आख्यानग्रन्था: ।

(१) दण्डिनो दशकुमारचरितम् । (२) सुबन्धो**र्वासव**दत्ता । (३-४) बाणभट्टस्य **हर्षच**रित-कादम्बर्यौ । (५) विष्णुशर्मण: **पञ्च**तन्त्रम् । (६) नारायणस्य **हितो**-**पदेश**: ।

चम्पूग्रन्थाः ।

(१) यमुना-त्रिविक्रमस्य **दमयन्ती**कथा । (२) भोजदेवस्य **रामायण**चम्पूः । (३) अनन्तस्य **भारत**चम्पूः ।

नाटकग्रन्थाः ।

(१-३) कालिदासस्य **अभिज्ञानशा**कुन्तल-विक्रमोर्वशीय-मालविकाग्नि-मित्राणि । (४-६) श्रीहर्षस्य **रत्ना**वली-प्रियदर्शिका—नागानन्दानि । (७-९) भवभूतेर्**महा**वीरचरित-मालतीमाधवोत्तररामचरितानि । (१०-१२) राजशेखरस्य **बाल**रामायण-विद्धशालभञ्जिका-कर्पूरमञ्जर्यः । (१३) भट्टनारायणस्य **वेणी**संहारम् । (१४) मुरारे**रनर्घ**राघवम् । (१५ विशाखदत्तस्य **मुद्रा**राक्षसम् । (१६) श्रीकृष्णमिश्रस्य **प्रबोध**चन्द्रोदयम् ।

साहित्यदर्पणस्य च किमितिवृत्तम् ? इत्यस्मिन् विषये विचार्यत इत्थम् अयं दर्पणो यावदुपयुक्तकाव्यशिक्षाधायकत्वात् साहित्यशास्त्रमिति कथ्यते । यदयं न **सरस्वती**कण्ठाभरणवद् अनतिप्रयोजनीयविषयविस्तीर्णो नवीनविचारहितश्च; न **काव्यप्रदी**पवद् रूपकप्रकरणरहितोऽतिलघुविषयः न **साहित्य**सारवद् विषयसंकलनैकतात्पर्यो दुरूहविषयश्च । एकदेशीयैः सह तु तुलनावकाश एवास्य नास्ति । सोऽयं कारिकावृत्त्युदाहृतिभिस्त्रिधा विभज्यते । तत्र कारिका वृत्तयश्च स्वकीया एव, उदाहृतयस्तु क्वचिदेव स्वकीयाः । विषयाणामुपपादनशैली प्रायेण सर्वत्र प्राञ्जलैव, यत्र क्वापि गभीरा सा तावद् विषयस्वरूपात्समुद्भूता । शास्त्रकारेण तु सर्वत्र बालानामपि सुखावबोधायैव यतितम् । उक्तं च विश्वनाथेन स्वग्रन्थस्यान्ते—'साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त ।' इति ॥

विश्वनाथस्य समयादिनिरूपणम्

नहि खलु धीरधुरीणस्य महाकवेर्विश्वनाथस्य जातिकालादिनिरूपणे किमपि विस्पष्टं प्रमाणमुपलभ्यते। तथापि तु तन्निरूपणं नातिदुष्करमिव प्रतिभाति। तथा च देशविशेषस्थहस्तलिखितदर्पणपुस्तके प्रथमपरिच्छेदे— "अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम्" इत्यनन्तरम् "अत्र जयन्तभट्टेनोक्तम्—" इत्याद्यधिकपाठो दृश्यते। जयन्तभट्टश्च १३५० संवहर्षे (१२९३ खष्टाब्दे) काव्यप्रकाशदीपिकां नाम कामपि काव्यप्रकाशटीकां विरचय्य समाप्तिं निनाय। खृष्टीयत्रयोदशशताब्दीसमुत्पन्नस्य च आलाउद्दीननाम्नो यवनराजस्य चरित्रपरिचायकः कश्चन श्लोको दर्पणनिर्मात्रा स्वयमेव चतुर्थपरिच्छेदे समुपन्यस्तः। अतस्तयोः परवर्त्ती दर्पणकार इति निःसन्देहमेव। खृष्टीयचतुर्दशशताब्दीसमुद्भूतेन मल्लिनाथेन च दर्पणकारात् पूर्ववर्त्तितया तत्समसामयिकतया वा कुत्रापि दर्पणप्रमाणं नोल्लिखितम्। खृष्टीयञ्चदशशताब्दीसञ्जातेन (४) गोविन्दठक्कुरेण च काव्यप्रदीपे "तददोषौ शब्दार्थौ—" इत्यादिकारिकाव्याख्यानावसरे—"अर्वाचीनास्तु" इत्यादिना दर्पणकारमतमेवोद्धृतमिति।

अतश्च खृष्टीयचतुर्दशशताब्दीमध्यभाग एव साहित्यदर्पणकर्तुः विश्वनाथस्य आविर्भावकाल इति ध्रुवं प्रतीयते।

प्रथमपरिच्छेदसमाप्तौ "परमाचार्य्य-सान्धिविग्रहिक-महापात्र" इति विशेषणत्रयेण राजविशेषस्य मन्त्रिपदस्थितो ब्राह्मण एवायमित्यवधार्य्यते। आचार्य्यताया ब्राह्मण एव विद्यमानत्वात्। राज्ञः सन्धिविग्रहाधिकारे ब्राह्मणविशेषनियोगस्यैव स्मृतिप्रतिपादितत्वात् उत्तमसम्प्रदानपात्रत्वावगमाच्च।

कविराजेत्युपाधिस्तु कवीनां राजा प्रधान इत्यात्मनः कविष्वपि मूर्धन्यप्रतिपादनपरतयैव निश्चीयते, कलापव्याकरणीयकलापचन्द्रकर्तुः सुषेणशर्म्मणः कविराजोपाधिवत्। वैद्यजातिबोधकं कविराजपदमिति तु नोपपद्यते, तथात्वे कातन्त्रपरिशिष्टे "वैद्य महामहोपाध्याय-श्रीपतिदत्त—" इतिवत् निःसन्देहार्थं 'वैद्य' इत्येव निर्द्दिश्येत, कविराजपदस्य साधारणचिकित्सकार्थे व्यवहारेण केवलवैद्यबोधकत्वाभिधानस्यान्याय्यत्वाच्च।

एवम् अयमुत्कलदेशीयो वैष्णवश्चेत्यवगम्यते। तथा च उत्कलेषु अण्डकोषार्थे 'पेल' शब्दो व्यवह्रियते, न पुनरन्यत्र संस्कृतसाहित्ये। अयञ्च सप्तमपरिच्छेदे "पेलशब्दस्य आद्याक्षरेअश्लीले" इत्याह स्म, प्रथमपरिच्छेदे च—"इति श्रीमन्नारायणचरणारविन्दमधुव्रत—" इत्यभिधत्ते स्म इति।

अथास्य समयः—

अथैवं विद्वत्कुलललामभूतस्य सर्वतन्त्रस्वतन्त्रस्य कविवृषभस्य विश्वनाथस्य यद्यपि जन्मसमयादिनिरूपणे स्फुटतरं तादृशं किमपि प्रमाणं नोपलभ्यते तथापि तन्निरूपणं नातिकठिनमिव प्रतिभाति। तथाहि पूर्वोक्तप्रकोरण चायं विद्वद्विभूतेर्मम्मटादर्वाचीनः, पण्डितराजजगन्नाथकृतरसगङ्गाधरोक्तेन—'यत्तु रसवदेव काव्यमिति साहित्यदर्पणे निर्णीतं तन्न' इतिपंक्त्यंशेन पण्डितराजात्प्राचीन इति निर्णीयते। अनयोर्मध्ये कः काल इति विचिकित्सायां चतुर्द्दशशताब्द्या १४०० ई० पूर्वभाग एव पर्यालोचनेन निर्णीतो भवति। तथाहि साहित्यदर्पणस्य चतुर्थपरिच्छेदे यवनाधिपतेरल्लावुदीनस्य स्मारकः—

'सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
अल्लावुदीननृपतौ न सन्धिर्न च विग्रहः॥'

इत्येवं श्लोको वर्त्तते। स च यवनाधिपतिः 'सुल्तान अल्लाउद्दीन महम्मद खिल्जी' इत्यभिधेयेन तत्समये प्रख्यात आसीत्। गौडदेशमाक्रम्य तत्रत्यं शासनं शशासायं खिल्जी। कलिङ्गराज्यशासकेन नरसिंहभूपतिना चायं परास्तः। अनन्तरं

विषप्रयोगेण खिष्टाब्दीयषोडशाधिकत्रयोदशशतके (१३१६) वर्षे चायं यवनाधिपतिर्व्यापादितः केनचित्प्रच्छन्नयोद्धा। अस्यैव विश्वनाथस्य नरसिंहविजयाख्यमेकं खण्डकाव्यमस्ति। तत्रत्यं च पद्यमेकमित्थं वर्त्तते—

'आहवे जगदुद्दण्डराजमण्डलराहवे।
श्रीनृसिंहमहीपाल! स्वस्त्यस्तु तव बाहवे॥'

नरसिंहनामानो भानुदेवनामानश्च बहवो राजान उत्कलराज्यसिंहासनं शोभयामासुः। नरसिंहाख्यनृपतेरेव सान्धिविग्रहिको विश्वनाथस्तथा तत्पितामहो नारायणदासः मुख्यसभास्थ आसीत्। तत्रैको नरसिंहः सप्तदशोत्तरद्वादशशतकसंवत्सरे (१२१७) तद्देशराज्यसिंहासनमलञ्चकार। द्वितीयो नरसिंहः षडधिकत्रयोदशशतकसंवत्सरे (१३०६) राज्यसिंहासनमलंचकार। एवञ्च द्वितीयो यो नरसिंहस्तमधिकृत्यैव विश्वनाथेन खण्डकाव्यं लिखितमिति निर्णयन्त्यैतिहासिकाः। त्रयोदशशतकात्पूर्वं स्थितो यो नरसिंहस्तस्यैव सभापण्डितो विश्वनाथपितामहो नारायणदासः। स्वपितामहस्य नरसिंहनृपतिसभापण्डितत्वं स्वयमेव काव्यप्रकाशदर्पणटीकायां विश्वनाथेनोद्धृतम्। तथाहि—

'यदाहुः—श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराज श्रीनरसिंहदेवसभायां धर्मदत्तं स्थगयन्तः सकलसहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीमन्नारायणदासपादाः' इति।

विश्वनाथपिता चन्द्रशेखरो हि भानुदेवनृपतेः सान्धिविग्रहिक आसीदिति साहित्यदर्पणद्वितीयपरिच्छेदोद्धृतेनावगम्यते। तथाहि—

'यथा मम तातपादानां महापात्रचतुर्दशभाषाभुजङ्गममहाकवीश्वरश्रीचन्द्रशेखरसन्धिविग्रहिकाणाम्—'दुर्गालङ्घितविग्रहो...राजत्युमावल्लभः'

इत्यत्र प्रकरणेनाभिधेये उमावल्लभशब्दस्य उमानाम्नी महादेवी तद्वल्लभ-भानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो गम्यते । भानुदेवनृपतेः प्राकरणिकत्वात्तस्यैव राज्ञः प्रशस्तिपरमिदं पद्यम् । द्वितीयनरसिंहात्मजो निःशंकोपाधिको भानुदेवभूपतिर्विश्वनाथपरिपोषक आसीत् । प्रथमश्च यदा नरसिंहो राजा तदा 'सुल्तान अल्लाउदीन महम्मद खिल्जी' गौडदेशमधिकृत्य यः समासीत् स एवोक्तराज्ञः प्रतिपक्षी । निःशङ्कोपाधिना भानुदेवभूपतिनैव 'गियास उद्दीन' यवनाधिपतिः पराजितस्तत्समये स एव गौडेन्द्र आसीत् । गौडेन्द्रविजयं समुद्दिश्यैव 'राजा गौडेन्द्रं कण्टकं शोधयति' इति तत्सामयिकप्रवादः प्रसिद्धत्वमुपगतः । अस्य राज्ञः प्रशस्तिवर्णनाभिप्रायेणैवैतद्ग्रन्थे द्वितीयपरिच्छेदे रूढौ सारोपगौण्याः लक्षणलक्षणया उदाहरणत्वेनोक्तवाक्यमुपनिबद्धं प्रस्तुतग्रन्थकारेण । कलिङ्गनृपतेर्निःशङ्कोपाधिकस्य भानुदेवस्य गौडेन्द्रविजयं निर्धार्यैव हि 'कलिङ्गःसाहसिकः' इत्यपि प्रवादस्तदानीन्तनसमयतः प्रचलितः ।

इत्थञ्च यदि निष्कर्षरूपेण विविच्यते तदा एकादशद्वादशत्रयोदशशताब्दीसम्भूताः मम्मट-श्रीहर्ष-जयदेवप्रभृतयः साहित्यसमीक्षकाः । तेषां वाक्यानि साहित्यदर्पणे 'तददोषौ शब्दार्थौ' 'धन्यासि वैदर्भि !' 'कदली कदली"हृदि विलसिताहारो नायं भुजङ्गमनायकः' इत्यादिना स्पष्टमेवोद्धृतानि सन्ति । पञ्चदशशतक (१५००) समुद्भूतेन काव्यप्रदीपकृता गोविन्दठक्कुरेण 'तददोषौ शब्दार्थौ' इति विवरणावसरे 'अर्वाचीनास्तु' इत्यादिना विश्वनाथमतमेवोपस्थापितम् । पञ्चदशशताब्दाः (१५००) प्रारम्भकाले समुद्भूतेन कुमारपालेन च नामोल्लेखनपूर्वकं साहित्यदर्पणात्पाठः समुद्धृतः । १६२८ खिष्टाब्दीयतः १६५७ खिष्टाब्दं यावद्राज्यसिंहासनेरेजे: शाहजहान आसीत् । शहाजहानपुत्रस्य 'दारा' भिधानस्य जगदाभरणे प्रशस्तिमुपरचयित्रा रसगंगाधरकृता 'यत्तु रसवदेव काव्यमिति निर्णीतं तन्न' इत्यादिना विश्वनाथ एव परिगृहीतः । तथा सति निश्चप्रचमेव यच्चतुर्दशशताब्दाः पूर्वभागे विश्वनाथकविराजोऽभूदिति ।

अथैतदुपाधिविषये किञ्चिद्विचार्यते—

विश्वनाथस्य नाम्नोऽन्ते 'कविराज' इत्युपाधिश्च कवीनां राजा-प्रधानः इति व्युत्पत्त्या स्वस्य कविष्वपि मूर्धन्यप्रतिपादनपरत्वमेवाभिव्यनक्ति। अयञ्चोपाधिरस्य विलक्षणं काव्यं समीक्ष्य सुप्रीतमनसा त्रिकलिङ्गेश्वरेण प्रदत्तः—

'धम्मिल्ले नवमल्लिकासमुदयो हस्ते सिताम्भोरुहम्
हारः कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घनः।
एकोऽपि त्रिकलिङ्गभूमितिलक ! त्वत्कीर्त्तिराशिर्यथौ
नानामण्डनतां पुरन्दरपुरीवामभ्रूवां विग्रहे॥'

इत्यनेन श्लोकेन निश्चीयते। वैद्यजातिबोधकं कविराजपदमिति तु भ्रमेणापि न विचारणीयम्, तथासति प्रसिद्धत्वाद् 'वैद्य' इत्येव निर्दिर्दशेत्। सामान्येऽपि चिकित्सकार्थे कविराजेत्युपाधिनेदानीन्तनमपि व्यवहारात्तस्य च प्रकृतेऽन्याय्यत्वात्।

काव्यप्रकाशदर्पणे विश्वनाथपितामहनारायणनाम्नोऽन्ते दासपदोपलम्भात् साहित्यदर्पणादिषु विश्वनाथनाम्नोऽन्ते तदनुपलम्भाद् व्यक्तिभेदो न शङ्कनीयः, विश्वनाथात्मजस्यैवानन्तदासेति नामोपलम्भात्। एतत्पितामहानुजस्यापि चण्डीदासेति नामोलम्भात्पितामहादयो दाससंज्ञका एव आसन्। काव्यप्रकाशदर्पणे तु विश्वनाथनाम्नि 'संगीतविद्याविद्याधर-कलाविद्यामालतीमधुकरविविधविद्याविद्यार्णवकर्णधार' इत्यादिविशेषणान्यधिगम्यन्ते। चन्द्रकलानाटिकायां तु 'नाट्यशास्त्रदीक्षागुरुः' इत्युपाधिरस्य महानुभावस्य। एवञ्चैतन्नाम बहुविशेषणघटितमवलोक्यते। तत्र 'श्रीमन्नारायणचरणारविन्दे'त्यादि त्वास्तिक्यप्रदर्शनार्थम्। मुख्यमन्त्रित्वद्योतनाय-'सान्धिविग्रहिके'ति विशेषणम्।

अलङ्कारशास्त्रस्योपयोगिता

साहित्यदर्पणोऽयमलङ्कारशास्त्रग्रन्थेस्वेकतमो निबन्धः। यस्मिन् खल्ववगते काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादीनामवधारणे च शक्तिरुन्मिषति तदलङ्कारशास्त्रम्। भाषायां व्युत्पत्तिवर्धनाय यथा व्याकरणशास्त्रमपेक्ष्यते तथैव काव्ये नैपुण्यायालङ्कारशास्त्रमपि। अलङ्कारशास्त्रं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यतेऽपि तु वाक्यदोषदृष्टिरपि नोत्पद्यते। यः खल्वलङ्कारशास्त्रज्ञानरहितो व्याकरणादिकं जानन्नपि जघनकाञ्च्यादिपदकर्णावतंसपदयोः (५६४ पृ.) अविशिष्टेऽपि पौनरुक्तये पूर्वं दुष्टं न परमिति कथं जानीयात्? तस्मादेतदपि शास्त्रं व्याकरणादिवदवश्यमध्येतव्यकोटावन्तर्भावमर्हति। एतच्च शास्त्रं वैदिकलौकिकग्रन्थानां पूर्णज्ञानायातीवश्यकम्। एवद् विना पूर्णरूपेणार्थावगतिः सम्भवत्येव न। अत एव राजशेखरेणास्य वेदाङ्गत्वमुररीकृतम्। तन्मते न स्वतन्त्ररूपा साहित्यविद्या अपि तु तर्कत्रयीवार्ता-दण्डनीतीनां निष्यन्दरूपा। तथा **चोक्तं** काव्यमीमांसायाम्—

'उपकारकत्वादलङ्कारः सप्तममङ्गमिति **यायावरीयः**, ऋते च तत्स्वरूपपरिज्ञानादेवार्थानवगतिः। पञ्चमी साहित्यविद्येति यायावरीयः, सा हि चतसृणामपि विद्यानां साररूपा।' इति।

अलङ्कारशास्त्रमिति नामव्यपदेशस्त्वतिप्राचीन एव। प्रतीयते च तत्समयेऽलङ्काराणामत्यधिकं बाहुल्यमासीदिति। राजशेखरेण तु स्पष्टमेव 'साहित्यविद्या' इति **नाम्नालङ्कारशास्त्रं** व्यपदिश्यते।

अलङ्कारशास्त्रस्य प्राचीनता

साहित्यप्रतिपाद्यमलङ्कारमधिकृत्य 'ईयुषी रागमुपमा शाश्वतीनाम्' (ऋग्वेदे १/११/५५), 'तदप्युपमाऽस्ति' (शतपथ ब्राह्मणम् १२/५/१/५) इत्यादिनालङ्काराणां वेदे विद्यमानत्वादन्यशास्त्रवत् साहित्यस्यापि वेदोपजीवकत्वम्, तत एव साहित्यमूलस्य वेदाङ्गोपाङ्गसमानकालिकत्वं च प्रतिपत्तव्यम् ।

अस्मिन विषये प्रथमपरिच्छेदेऽपि साहित्योद्भवप्रसङ्गे निर्दिष्टम् ।

आग्नेये तु श्रव्यदृश्ये उभे अपि काव्ये सम्यग् व्युत्पादिते, किन्त्वेतत्प्राचीनतायामाधुनिकसमीक्षकसमीक्षया पर्याप्तसन्देहः समुद्भवति ।

नाट्यस्योत्पत्तिर्ब्रह्मणा त्रेतायुगे अकारि, यतो हि सत्ययुगे जनानां मनोरञ्जनसाधनस्यावश्यकतैव नासीत् । त्रेतायुगे देवा ब्रह्माणमुपगम्य तं प्रार्थितवन्तो यत्तादृशवेदस्य रचनां कुरु यया शूद्रा अपि अनुशीलिताः सन्तो मोक्षभागिनो भवेयुरिति एतन्निशम्य चतुर्भ्यो वेदभ्यः सारमादाय पञ्चमनाट्यवेदं रचितवान् प्रजापतिः । इत्थमेव भगवता भरतेन तु स्पष्टमाम्नातम्—

'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥'

राजशेखरेण काव्यमीमांसायामेतच्छास्त्रस्योत्पत्तिकथा सविस्तरं प्रदर्शिता । तदनुसारेण शास्त्रमेनमुपदिष्टवान् सर्वप्रथमं भगवान् शङ्करो ब्रह्मणे । तदनन्तरं ततो देवादय ऋषयश्च शिक्षिताः । अष्टादशोपदेशकद्वारा चैतस्य शास्त्रस्याष्टादशाधिकरणेषु रचना सञ्जाता । तत्र दृश्यकाव्यस्य निरूपणं भरतेन कृतम् । नन्दिकेश्वरेण रसस्य, धिषणेन दोषस्य, उपमन्युना गुणस्य निरूपणं कृतमिति । काव्यादर्शात्पूर्वं काश्यप-वररुचिभ्यामलङ्कारग्रन्था निर्मिता इति तद्धृदयङ्गमानामकटीकातो बुध्यते । श्रुतानुपालिनीटीकायामपि दण्डिनः पूर्वालङ्कारिकेषु काश्यप-ब्रह्मदत्त-नन्दस्वामिनां नामान्युद्धृतानि । परन्त्वेतैर्निर्मिता ग्रन्था वर्त्तमाने काले न समुपलभ्यन्ते समालोचकाना पुरतः । द्वितीयशतकशिलालेखतः स्पष्टं प्रतीयते यदस्मिन् समयेऽलङ्कारशास्त्रस्योदयः संजात एव । रुद्रदामन् शिलालेखे तु भाषालङ्कारपूर्णा

नास्ति किन्त्वलङ्कारशास्त्राणां कतिपयसिद्धान्तानामुल्लेखस्तत्र विद्यत एव । पाणिनिना 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' 'कर्मन्दकृश्वादिनिः इति सूत्राभ्यां शिलालिकृशाश्वद्वारा निर्मितनटसूत्रविषये निद्र्देशो विद्वद्भिः स्वीकृतः । एतत्पूर्वकालिना यास्केन स्वनिरुक्ते विविधोपमानां निरूपणमध्ये कर्मोपमाया लक्षणं विहितम्—'यथा वासो यथा वनं यथा समुद्रं सृजति' (निरुक्त ५/७८/८) । पूर्ववर्तिनाऽपि गार्ग्येण उपमाया वैज्ञानिकं लक्षणमेवं प्रतिपादितम् उपमा यत् अतत् तत्सदृशम्' इति । निरुक्ते चोपमाविषये बहून्युदाहरणानि प्रदर्शितानि सन्ति । अत एव सिद्ध्यत्यस्य शास्त्रस्य नितरां प्राचीनत्वमिति ।

अलङ्कारपदव्युत्पत्तिः

यद्यप्यस्मिन् शास्त्रे काव्यस्वरूपरस-दोष-गुणरीत्यलङ्काराणामपि निरूपणीयत्वेस्यालङ्कारामिधानस्य बीजं तत्त्वतो वयं न विद्मस्तथापि, अलङ्क्रियतेऽनेनेतिकरणव्युत्पत्तिनिष्पन्नो ऽलङ्कारशब्दो यमकोपमादिबोधको न किन्तु 'अलङ्कृतिरलङ्कारः' इति भावव्युत्पन्नो दोषापगमगुणालङ्काररसंरचनकृतसौन्दर्यमिमुखः, तत्प्रतिपादकत्वादेवास्यालङ्कारनाम्ना व्यपदेश इति संभावयामः । अत्र मानं तु—'काव्यं ग्राह्यमलङ्कारात्' 'सौन्दर्यमलङ्कारः' (अलङ्कृतिरलङ्कारः) 'सदोषगुणालङ्कारहानोपादानाभ्याम्' इत्यादिवामनप्रतिपादितमतमेव ।

केचित्तु—'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद जल्पवितण्डाहेत्वाभासच्छल- जातिनिग्रहस्थानरूपाणां षोडशपदार्थानां प्रतिपादकमपि गोतमशास्त्रं परार्थानुमानपर्यायस्य न्यायस्य सकलविद्यानुग्राहकतया सर्वकर्मानुष्ठानसाधकतया च तत्र शास्त्रे प्रधानत्वेन न्यायशास्त्रमिति व्यपदिश्यते 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायात् तद्वत् दोषगुणादीनां प्रतिपादकमपीदं शास्त्रं यमकोपमादीनामलङ्काराणां भूयो व्याख्यानेन काव्यव्यवहारप्रयोजकतया चात्र शास्त्रे प्रधानत्वेन तत्प्रतिपादकत्वादेवालङ्कारशास्त्रमिति व्यपदिश्यते अलङ्काराणां काव्यव्यवहारप्रयोजकत्वं च 'काव्यवृत्तेस्तदाश्रयात्' इति ग्रन्थेन ध्वनिकारोक्तं पञ्चमोल्लासे मम्मटभट्टैरेव प्रतिपादितम् ।'

परमार्थतस्तु—अलङ्कारशास्त्रमिति व्यपदेशे बीजं वयं वस्तुतोऽनेन प्रकारेण प्रस्तुतं कुर्मः । तथाहि—ये दण्डि-भामह-भट्टोद्भट-रुद्रट-वामनान्ता प्राचीनालङ्कारशास्त्रनिर्मातारो बभूवुस्तैर्ध्वन्यमानमर्थं वाच्योपकारकतयालङ्कारपक्षस्वीकृतं मन्यमानैः 'अलङ्कारा एव काव्ये प्रधानम्' इति सिद्धान्तं प्रतिपादितम् ।

अतस्तत्समये 'प्राधान्येन व्यपदेशा भवन्ति' इतिन्यायेन तच्छास्त्रस्यालङ्कारशास्त्रमित्यभिधानं सप्रमाणरमेवासीत् । ततस्तेभ्योऽर्वाचीनैरन्तस्तत्त्वगहनाविमर्शशालिभिरानन्दवर्धनाचार्यैर्ध्वन्यालोकाख्यस्वरचितग्रन्थे ध्वन्यमानस्यैवार्थस्य गुणालङ्कारोपस्करत्वेन मुख्यत्वे व्यवस्थापिते अलङ्काराणां मुख्यत्वाभावेऽपि तत्प्रबन्धस्य चिरन्तनव्यपदेशप्रणाल्यनुसारेणालङ्कारनाम्नैव व्यपदेशः प्रचलित आसीत् ।

यद्यपि—साहित्यदर्पणकृता प्राचीनानां मतमुन्नमय्य—'उक्तं हि-काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्' इति प्रतिपादयता महामहिमशालिमम्मटोपाध्यायेन च स्वरचितकाव्यप्रकाशस्याष्टमोल्लासे 'ये रसस्याङ्गिनो धर्माः' इत्यादिना 'शब्दार्थौ काव्यस्य शरीरम्, गुणा रसस्य साक्षादुत्कर्षकाः, अलङ्कारास्तु शब्दार्थरूपकाव्यशरीरोत्कर्षद्वारा रसस्यैवोत्कर्षकाः रसश्चात्मसस्वरूपः' इति सिद्धान्तयता रसः शरीरेष्वात्मवत्काव्ये प्राधान्येन स्थित इति प्रागुक्तन्यायेनास्य शास्त्रस्येदानीं रसशास्त्रमित्यभिधानं युक्तन्तथापि तदेव प्राक् प्रचारमुपग तमभिधामिदानीं यावत्तथैव व्यवहृतं भवतीति । तदेतत्प्राचीनानामलङ्काराचार्याणां मतमलङ्कारसर्वस्वे राजानकरुय्यकेण सम्यक् प्रतिपादितम् ।

व्याकरणशास्त्रेऽलङ्कारशास्त्रम्

तदिदमलङ्कारशास्त्रं व्याकरणशास्त्रेणैवोद् भावितमिति तत्र तत्र ग्रन्थदर्शनेन निश्चीयते । तथाहि-अस्यैव ग्रन्थस्य द्वितीयपरिच्छेदे 'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च' इतिकारिकया तद्वृत्तिग्रन्थेन च वैयाकरणसम्मतो जात्यादिरिति पक्षः स्वप्रतिपाद्यत्वाद्ग्रन्थकृता प्रदर्शितः । किञ्च दशमपरिच्छेदे विद्यमानं विरोधालङ्कारविभाजकं 'जातिश्चतुर्भिर्जात्याद्यैः' इति कारिकया जात्यादिरिति पक्ष एव मूलकर्त्रा प्रदर्शितः । यदिदमलङ्कारशास्त्रं वैयाकरणमतानुसारि न स्यात् किन्तु मीमांसकमतानुसारि नैयायिकमतानुसारि वा स्यात्तदा मीमांसकादिमते पदार्थचतुष्टयाभावेन दशानां विभागानामनुपपत्तौ 'असौ दशाकृतिः' इति दशत्वसंख्याकथनपूर्वकं तत्कारिकोद्धरणमेवासङ्गतं स्यात् । 'क्षीरोदजा वसतिजन्मभुवः प्रसन्नाः' इत्यादि सप्तमपरिच्छेदीय-क्लिष्टपदोदहरणमपि वैयाकरणमतानुसार्येव, अन्यथा 'सुप्तिङन्तं पदम्' (१/४/३४) इति पाणिनिमुनिप्रणीतं पदलक्षणमस्वीकृत्य 'शक्तं पदम्'इति पदलक्षणं स्वीकुर्वतां समासे शक्त्यभावं च वदतां नैयायिकादीनां मते 'क्षीरोदजा' इत्यादौ शक्त्यभावात् पदत्वाभावेन तस्य पदत्वोदाहरणत्वमसंगतमेव स्यात् । एवं ख्यातिविरुद्धत्वादिकमपि"आजघ्ने विषमविलोचनस्य वक्षः' इत्यादि । दशमपरिच्छेदे उपमायाः पूर्णालुप्ताविभागो विश्वनाथेन वैयाकरणमतमाश्रित्य वाक्यसमासक्विप्वय्च्क्यङ्णमुलादिप्रत्ययविशेषवत्तया पञ्चविंशतिविधो व्युत्पादितः । न केवलमिदमेवलङ्कारशास्त्रं व्याकरणमतानुसारि किन्तु भामह-भट्टोद्भटप्रभृतिरचितमप्यलङ्कारशास्त्रं व्याकरणमतानुसार्येव । काव्यप्रकाशोऽप्याद्यन्तं व्याकरणमतमेव स्वीकरोति । तथाहि तत्प्रथमोल्लास एव 'बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यपदेशः कृतः, ततस्तन्मतानु-

सारिभिरन्यैरपि (आलंकारिकैरपि) तिरस्कृतवाच्यव्यङ्ग्यव्यञ्जनसमर्थस्य शब्दार्थ-युगलस्य' इति प्रतिपादितं मम्मटेन । किंच विश्वनाथेन 'लिम्पतीवतमोऽङ्गानि' इत्यु-दाहरणे क्रियास्वरूपोत्प्रेक्षास्थापनपूर्वकं लेपनकर्तृतादात्म्योत्प्रेक्षाया वर्षणकर्तृतादात्म्योत्प्रेक्षायाश्च यत् खण्डनं कृतं तदपि वैयाकरणानां सिद्धान्त इवालङ्कारिकाणां सिद्धान्तेऽपि क्रियामुख्यविशेष्यकशाब्दबोधमेव प्रकटीकरोति न तु नैयायिकसिद्धान्त इव कर्तृमुख्यविशेष्यकशाब्दबोधम् । अत एवास्मिन्नेवोदाह-रणे तिङ्गपदवाच्यस्य कर्तुः उपमायामुपमानतयान्वयः दण्डिना काव्यादर्शे—

'कर्त्ता यद्युपमानं स्यान्न्यग्भूतोऽसौ क्रियापदे ।
स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितुम् ॥'

इत्येवं खण्डितः । आकाङ्क्षावादोक्तवैयाकरणसिद्धान्तमञ्जूषाग्रन्थोऽपि वैयाकरणानामालङ्कारिकाणाञ्च मतस्यैक्यमेव प्रतिपादयति । अत एव हि व्याकर-णशास्त्रेण साधुत्वेऽन्वाख्यातानामपि पदानां प्रयोगनियमः प्रयोगनिषेधश्चा-नेनैवालङ्कारशास्त्रेण विधीयते । तत्र प्रयोगनिषेधो यथा—'कार्त्तार्थ्यं यातु तन्वङ्गी' इत्युदाहरणे कार्त्तार्थ्यमिति श्रुतिकटुः शब्दः रौद्रादिरस एव प्रयोज्यः न तु श्रृङ्गारादौ रसे इति । एवं रणितक्वणितशिञ्जितगुञ्जितादिशब्दाः यथाक्रमं मञ्जीररशनाघण्टा-भ्रमरादिध्वनिष्वेव वाच्याः नान्यत्र । तथा रवादिशब्दाः मण्डूकादिशब्देष्वेव प्रयोज्याः न तु सिंहनादादाविति । तथा अश्लीलादिशब्दाः सुरतारम्भगोष्ठ्यादावेव प्रयो-क्तव्याः न क्वाप्यन्यार्थे । एवं ग्राम्यादिशब्दा विदूषकाद्युक्तावेवानुगुणा नान्यत्रेति यथायथं प्रयोगाभिप्रायः । प्रयोगनिषेधो यथा—'भाति पद्मः सरोवरे' इत्युदाहरणे पद्मशब्दः पुंस्यामातोऽपि विदग्धैर्न स्वीकृतः इति । एवं कर्णावतंसादिशब्दानां जघनकाञ्च्यादिशब्दानाञ्च साम्येऽपि पौनरुक्तये कर्णावतंसादय पण्डितैः प्रयोक्तुं योग्याः न तु जघनकाञ्च्यादय इति यथायथं प्रयोगनिषेधो ज्ञातव्यः । अत एव च शाब्दिकमूर्धन्येन भट्टिकविना निजनिर्मितभट्टिकाव्ये तृतीयं प्रसन्नकाण्डं निर्मितम् । तथाहि भट्टिकाव्यस्य द्वाविंशतिः सर्गाः । ते प्रकीर्णाधिकारप्रसन्नतिङन्तकाण्डैश्च-तुर्धा प्रयुक्ताः । तत्र प्रथमे प्रकीर्णकाण्डे व्याकरणशास्त्रानुसारेण सामान्यविशेषका-र्याण्युल्लिखितानि । द्वितीयेऽधिकारकाण्डे पाणिनीयाष्टकान्तर्गताधिकरणानुसारेण

कार्याण्युदाहृतानि । तृतीये प्रसन्नकाण्डे साहित्यशास्त्रानुसारतः अनुप्रासयमकादि-शब्दालङ्कारा माधुर्यादिगुणाश्च प्रदर्शिताः । चतुर्थे तिङन्तकाण्डे सर्वेषु लकारेषु नियतान्यपोहितानि च धातुरूपाणि सङ्कलितानि । तद्यदीदमलङ्कारशास्त्रं व्याकरण-शास्त्रान्तःपाति न स्यात्तदा व्याकरणार्थनिरूपणैकतात्पर्येऽस्मिन् काव्ये व्याकरणशा-स्त्रानुसार्युदाहरणप्रस्तारप्रदर्शनप्रसङ्गेऽनुप्रासादीनामलङ्काराणां माधुर्यादीनां गुणानां च प्रदर्शनं किंकृतं स्यात् ? प्रसन्नकाण्डारम्भे भट्टिकाव्यटीकाकर्त्रा जयमङ्गलेनापि 'शब्दलक्षणमुक्तमपि लक्षयन् काव्यलक्षणार्थं प्रसन्नकाण्डमुच्यते काव्यस्य प्रसन्न-त्वात्' इत्युक्तम् । स्वयं भट्टिकविनाऽपि द्वाविंशे सर्गे—

'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तामर्श इवान्धानां भवेद्व्याकरणादृते ॥'

इति पद्येन स्वीयकाव्यस्य साहित्यशास्त्रानुसार्यलङ्कारादिदर्शकस्यापि व्याकरणाभियुक्तत्वमेव प्रदर्शितम् । तदेतत्सर्वमभिप्रेत्यैव सर्वे साहित्यशास्त्रिणः 'इदमलङ्कारशास्त्रं व्याकरणशास्त्रस्यैव परिशिष्टो भागः' इति व्याकरणशास्त्रस्यैवाङ्ग-भूतमिदं शास्त्रं न तु न्यायादेर्मीमांसादेर्वा शास्त्रस्य' इति च वदन्ति । अत एव न्यायादिशास्त्रे सामान्येनैव खण्डिताया मीमांसादिशास्त्रे नामतोऽप्यनिर्दिष्टाया व्यञ्जनायाः खपुष्पायमाणतया व्यञ्जकशब्दस्य व्यङ्ग्यार्थस्य चाभावेनात्र 'शब्दोऽपि वाचकस्तद्वल्लक्षकश्च त्रिधा मतः' इति त्रिविधस्य शब्दस्य 'अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः' इति त्रिविधस्यार्थस्य 'तिस्रः शब्दस्य शक्तयः' इति त्रिविधायाः शक्तेश्च प्रतिपादनं विधीयते ।

अतः "बुधैर्व्याकरणैः" इति बहुभिः काव्यशास्त्रकारैः प्रतिपादितत्वादिदमेव सम्यङ्निर्दिश्यते यत्काव्यशास्त्रस्य बीजतत्त्वं व्याकरणशास्त्र एव स्फुटितम् । सर्वैश्च भामहदण्डिप्रभृतिविश्वनाथपर्यन्तादिभिः साहित्यशास्त्रनिर्मातृभिर्विकासितम् ।

विश्वनाथपूर्वकालीनाः अलङ्कारशास्त्रप्रणेतारः

अलङ्कारनिबन्धकर्त्तारः प्राचीना अर्वाचीनाश्चार्या बहवो हि सञ्जाताः। ते च यथायथं क्रमेण भरत-भामह-दण्डि-वामन-भट्टोद्भट- रुद्रट-भट्टनायक-मुकुल-प्रतीहारेन्दुराज-आनन्दवर्धन-महिमभट्ट-वक्रोक्तिकार-अभिनवगुप्त-शौद्धोदनि-व ाभट-वाग्भट-रुय्यक-भोजराज-मम्मट-हेमचन्द्र-केशवमिश्र-पीयूषवर्ष-विद्यनाथ-विश्वनाथ-गोविन्दठक्कुर-अप्पय्यदीक्षित-जगन्नाथप्रभृतयः सप्तविंशतिः (२७) मुख्यतमाः। तत्र तेषामतिसंक्षिप्तपरिचयस्त्वित्थम्—

(१) भरतः

अयं महानुभावो हि रससम्प्रदायस्य प्राचीनतम आचार्यः। एतत्सम्मत्या नाटके रसस्यैव प्राधान्यं तिष्ठति। कविकुलचक्रचूडामणिना महाकविकालिदासेन तु आचार्य एष देवतानां नाट्याचार्यरूपेणोल्लिखितः तथा च विक्रमोर्वश्याम्—

'मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयः प्रयुक्तः।
ललिताभिनयं तमद्य भर्त्ता मरुतां प्रष्टुमनाः स लोकपालः॥'

अनेनास्य समयः ईस्वीयप्रथमशताब्द्याः पूर्वमेवासीदिति स्वीकुर्वन्ति बहवो ह्यैतिहासिकाः। एतस्यैव महामुनेरभिधानान्तरं वृद्धभरत इति वा आदिभरत इति वा। सर्वस्वीकृतं वर्त्तते यदयं प्राचीनतमोऽलङ्कारशास्त्री रसशास्त्री नाट्यशास्त्री च। एतन्निर्मितं सर्वपरिचितमस्ति नाट्यशास्त्रम्। ग्रन्थोऽयं साम्प्रतं द्विविधरूपेण प्राप्यते नाट्यवेदागमः नाट्यशास्त्रञ्चेति नाम्ना। प्रथमस्यैव ग्रन्थस्य नामान्तरं द्वाद-

शसाहस्री द्वितीयस्य षट्साहस्रीति। शारदातनयमतानुसारेण प्रथमग्रन्थस्यैव षट्साहस्रीति संक्षिप्तरूपं वर्त्तते। एतदेव भावप्रकाशेऽप्युक्तम्—

'एवं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः।
षड्भिः श्लोकसहस्रैर्यो नाट्यवेदस्य संग्रहः॥' इति।

नाट्यशास्त्रमिदं भारतीयललितकलायाः विश्वकोशः, यतो ह्यत्र नाट्यस्य प्राधान्यत्वेऽपि तदुपकारकछन्दोऽलङ्कारसंगीतशास्त्राणां मूलसिद्धान्तस्यापि प्रतिपादनं वयमवलोकयामः। ग्रन्थेऽस्मिन् त्रयोंऽशाः कारिकासूत्रभाष्यानुवंश्यश्लोकाः। तत्र मूलग्रन्थे सूत्रभाष्ययोरेव समावेश आसीत्। अन्येंऽशाश्च विकासक्रमेण सम्मिलिताः। मूलग्रन्थाभिप्रायस्य बोधनाय विस्तरेण कारिकाया निर्मितिः सञ्जाता। गुरुशिष्यपरम्परया समागतानि आर्यानुष्टुब्छन्दयोरुपनिबद्धानि प्राचीनपद्यानि आनुवंश्यश्लोकेषु विद्यमानानि सन्ति। अभिनवगुप्तटीकानुसारेणानुवंश्यश्लोका हि प्राचीनतराचार्यनिर्मिताः सन्तीति प्रतीयते। तथाचोक्तमभिनवभारत्याः षष्ठाध्याये—'ता एता ह्याचार्या एकप्रघट्टकतया पूर्वाचार्यैर्लक्षणत्वेन पठिताः। मुनिना तु सुखसंग्रहाय यथास्थानं निवेशिताः।' इति। नाट्यशास्त्रमेनमभिनवगुप्तटीकाकारः भरतसूत्रमितिनाम्ना निर्दिशति—'षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्' इति। नान्यदेवस्तु भरतं 'सूत्रकृत्'शब्देन परामृशति—'कलानामानि सूत्रकृदुक्तानि यथा' इत्यादिना। साम्प्रतिकं नाट्यशास्त्रं सप्तत्रिंशदध्यायेषु विभक्तम्, क्वचिच्च षट्त्रिंशदध्यायकम्।

(२) भामहः

भरतादनन्तरं भामहात्पूर्वं बह्व्यः शताब्दो रहितकाव्यशास्त्रा एव व्यतीताः यतो हि समयेष्वेतेषु आलङ्कारिकाणां नामानि तत्कार्याणि चेदानीं पर्यन्तमप्यपरिचितान्येव। एतन्महानुभावस्य 'काव्यालङ्कार' एव भरतपश्चाद्वर्ती सर्वप्रथमो मान्यग्रन्थश्चकास्ति। यत्र नाट्यशास्त्रपारतन्त्र्यान्नैजं रूपमुन्मुच्यालङ्कारशास्त्रं स्वतन्त्रशास्त्ररूपेणास्माकं पुरतो विलसति। एतस्मात्पूर्ववर्त्तिनो मेधाविरुद्रस्याचार्यत्वेन नाम श्रूयते परन्तु नाद्यावधि लोचनगोचरीभूतो विद्यते चैतन्निर्मितप्रबन्धः।

काश्मीरदेशनिवासी रक्रिलगोमीपुत्रः खल्वयम् । प्रसिद्धबौद्धाचार्यदिङ्नागमतानुसारेणैवायं प्रत्यक्षलक्षणं चकार स्वग्रन्थे न तु धर्मकीर्त्त्यनुसारेण, अतश्चोभयोराचार्ययोर्मध्ये षष्ठशतकोऽयमिति प्रतीयते । प्राचीनतरोऽयमिति बहुभिः प्रमाणैर्निर्णयो भवति । तथाहि प्रतापरुद्रयशोभूषणे विद्यानाथः—

'पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः ।
वक्ष्ये सम्यगलङ्कारशास्त्रसर्वस्वसंग्रहम् ॥'इति ।

अलङ्कारसर्वस्वे रुय्यकः—'भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः ।' इति । अपि च ध्वन्यालोकलोचनस्य द्वितीयोद्योते 'ध्वन्यात्मभूते श्रृङ्गारे इति २१ कारिकाया वृत्तिव्याख्यानावसरे 'उक्तः' इति प्रतीकमुपादायाभिनवगुप्तपादाचार्या अप्याहुः—'भामहादिभिरलङ्कारलक्षणकारैः' इति । किञ्च चिरन्तनकाव्यप्रकाशटीकाकारोऽपि काव्यप्रकाशवृत्तिग्रन्थस्थे 'समाम्नासिषुः' इति पदे 'प्राञ्चो भामहादय इति शेषः' इत्युक्तवान् । भामहस्य प्राचीनतरत्वादेव स्वयमेव काव्यप्रकाशमूलकारोऽपि स्वोक्ते सम्मतिं दर्शयितुं 'रूपकादिरलङ्कारः' इत्यादिः 'सैषा सर्वत्र वक्रोक्तिः' इत्येवं भामहग्रन्थमुपन्यस्तवान् ।

आचार्योऽयं स्वकीयकाव्यालङ्कारग्रन्थेन विधिवत् साहित्यशास्त्रं निर्मितवान् । तत्रालङ्काराणामेव प्राधान्यमुररीकृत्य ३८ अष्टत्रिंशदलङ्कारान् लक्षितवान् । तथा चोक्तम्—

'न कान्तमपि निर्भूषं विभाति वनितामुखम् ।' इति ।

पञ्चमशताब्द्यां निर्मितभट्टिकाव्यस्य प्रसन्नकाण्डेऽप्येत एवालङ्कारा अङ्गीकृताः सन्ति सर्वेष्वलङ्कारेषु वक्रोक्तेरेव मुख्यत्वमिति कोऽलङ्कारोऽनया विना' इत्यनेन स्पष्टमेवाभिव्यक्तीचकार । वक्रोक्तेश्चरमसीमाया विकासः कुन्तकस्य 'वक्रोक्तिजीविते' स्पष्टमेव दरीदृश्यते । काव्यालङ्कारे रीति-गुण-दोष-वक्रोक्ति-रसवदलङ्काराणामाश्रयीभूतस्य रसस्य विवेचनं विद्यते । काव्ये दोषगुणादिभिः सहैव रसस्य विद्यमानत्वमत्यावश्यकमिति प्रतिपादितम्—

'युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्'

इत्यादिना एतस्य कतिपयविशिष्टसिद्धान्ताः—

(१) शब्दार्थौ काव्यम् । (२) भरतप्रतिपादितदशगुणानां माधुर्य्यादिगुणत्रये एवान्तर्भावः । (३) वक्रोक्तेः समस्तालङ्कारमूलत्वम् । (४) दशविधदोषाणां सम्यग् विवेचनम् ।

(३) दण्डी

अलङ्कारसम्प्रदायस्यायं द्वितीय आचार्यः काव्यादर्शस्य रचयिता। सिंघाली-भाषायां 'सिय-वस-लकर'ग्रन्थेनिर्मातुः 'राजासेन' प्रथमस्य नवमशताब्द्या मध्यभागेऽस्य समयो विद्यते । ग्रन्थोऽयं काव्यादर्शस्याधारेण निर्मितो विद्यत इति डाक्टर वार्नेटेन 'जर्नल आफ दी रायल एशियाटिक सोसाइटी' नाम्नि पुस्तके प्रतिपादितम् । अस्मात्पूर्वमेव कन्नडीभाषायां 'कविराजमार्गा'ख्योऽलङ्कारग्रन्थः काव्यादर्शच्छायया नवमशताब्द्याः पूर्वभागे 'अमोघवर्षेण निर्मित उपलभ्यते । हेत्वतिशयोक्त्यादिषु तु पूर्वरूपेण दण्डिन एव साम्यमवलोक्यतेऽतो नवमशताब्द्याः पूर्ववर्त्त्येवायमित्यत्र न कश्चन सन्देहावसरः । काव्यादर्शोद्धृते—

'अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥'

इति पद्ये बाणभट्टकृतकादम्बर्यां चन्द्रापीडाय शुकनासोपदेशे विद्यमानगद्यस्य छाया समापतति । अपि चाग्रे तथैव—

'भिन्नस्तीक्ष्णमुखेनापि चित्रं बाणेन निर्व्यथः ।
व्यवहारेषु जहौ लीलां न मयूर.... ॥'

इति पद्येन मयूरभट्टेन सह बाणस्यापि प्रशस्तप्रशंसा कृता । सप्तमशतकपूर्वार्द्धे विद्यमानस्य वाक्यपदीयकर्त्तुः भर्तृहरेरनुसारेण काव्यादर्शे दण्डिना प्राप्यनिर्वर्त्त्य-विकार्यहेतूनां विभागः कृतः । एवञ्च सप्तमशताब्द्याः पूर्वार्द्ध एव वर्त्तमानस्य महाकवेर्बाणस्यानन्तरं सप्तशतकान्ते तथाऽष्टमशतकप्रारम्भ एव दण्डिनः समयः ।

महाकविनानेन निजग्रन्थस्य 'काव्यादर्श' इति नाम विधाय भामहापेक्षयाऽधिकचमत्कारः प्रदर्शितः। एतेन हि काव्यशोभोत्पादकानेवालङ्कारान्('काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते') मत्वा गुणानां काव्ये विशेषमहत्ता प्रदर्शिता। यद्यपि भामहोऽपि गुणानङ्गीकरोत्येव परन्तु दण्ड्यपेक्षया स्वल्पमेव प्रदर्शितवान् स्वग्रन्थे। अनेन हि यत्र तत्र भामहसिद्धान्तस्य खण्डनमपि कृतं दृश्यते अलङ्कारशास्त्रस्यानुयायी ह्ययम्। भामहेन तु गौडीवैदर्भीरीत्योर्विभाजनं गतानुगतिकन्यायेन समर्थितम्, किन्तु गौडीवैदर्भीरीत्योः पारस्परिकभेदसम्बन्धः सर्वप्रथमं स्पष्टतया प्रदर्शनस्य श्रेय अस्मै विद्वद्वरेण्यायैव प्रदीयते

काव्यादर्शस्य प्रथमपरिच्छेदे—काव्यलक्षणम्, तस्य विस्तृतभेदाः, गौडीवैदर्भीरीत्योर्दशगुणानां विस्तृतं वर्णनम्। द्वितीयपरिच्छेदे—सुन्दररूपेण पञ्चत्रिंशत् ३५ अलङ्काराणां लक्षणोदाहरणानि, तत्रोपमालङ्कारस्यानेकभेदा निरूपिताः। तृतीयपरिच्छेदे—शब्दालङ्काराणां मध्ये विशेषतया यमकालङ्कारस्य व्यापकरूपेण वर्णनम्। चतुर्थपरिच्छेदे—दशविधदोषाणां लक्षणोदाहरणानि। 'दशकुमारचरितम्' 'छन्दो विचितिश्चे'ति द्वावपरावपि ग्रन्थावेतन्निर्मितौ स्वीक्रियते।

(४) वामनः

वामनोऽयं काश्मीरनरेशस्य सचिव आसीत्। जयापीडस्य समयोऽष्टमशतकस्यान्तिमो भागः। तथा चोक्तम्—

'मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः॥'

एवञ्च वामनस्याप्ययमेव समयो निर्णीयते। अपरञ्चैतत्सूत्रवृत्तौ तृतीयाधिकरणे द्वितीयाध्याये 'शूद्रकादिरचितेषु प्रबन्धेषु' इत्यादिना मृच्छकटिककर्तुः शूद्रकस्य कवेर्नाम समुपलभ्यते, दृश्यते च 'दृष्ट्वैकासनसंगते (स्थितौ) प्रियतमे' इत्याद्यमरुशतकपद्यम्। मृच्छकटिके वराहमिहिरसिद्धान्तोल्लेखो नास्ति। ५८९ ईस्वीयशतके वराहमिहिरस्य मृत्युरतः षष्ठशतकात्पूर्ववर्त्ती एव मृच्छकटिककर्त्ता शूद्रक इत्यैतिहासिकानां मतम्। तत्रैवामरुकवेरपिनाम विद्यते। अष्टसप्तत्यधिक-

सप्तमशतकवैक्रमे (७७८) काल्पीनामकग्रामे ('जिल्हा' कडपा) द्रविडकुले शिवगुरुशर्मणो भार्यायां लब्धजन्मा शारीरकभाष्यादिकर्त्ता भगवान् शङ्कराचार्यः परकायप्रवेशविद्यया कस्यचिन्मृतस्यामरुनाम्नो राज्ञः शरीरं प्रविश्य 'अमरुशतकम्' काव्यं चकारेति लोकप्रसिद्धम्। उक्तं चामरुशतकटीकां कुर्वता गुर्जरदेशीयेन रानेपुरवासिना (राधेरग्रामवासिना) पुरोहितोपनाम्ना देवशङ्करेणापि—

'क्व मे मन्दा बुद्धिः क्व च रसमयं शङ्करवचः
स्तथापि व्याख्यातुं तरलमनसः शङ्करकृतिम्॥'इति।

एतेनाप्युक्तसमय एव वामनस्येति स्वीकारे न काचन विप्रतिपत्तिः।

आचार्योऽयं रीतिसम्प्रदायस्य संस्थापकः। काव्यस्यात्मा रीतिरितिविषये 'रीतिरात्मा काव्यस्य' (काव्याल. १/२/६) इति सूत्रमेव निर्मितवान्। एतस्य विशिष्टसिद्धान्ताः—

(१) गुणालङ्काराणां परस्परविभेदः। (२) वैदर्भीगौडीपाञ्चालीति त्रिविधरीतयः। (३) वक्रोक्तेर्विशिष्टलक्षणम्। (४) विशेषोक्तेर्विचित्रलक्षणम्। (५) आक्षेपस्य द्विविधकल्पना। (६) समस्तार्थालङ्कारा उपमाया एव भेदविभेदाः।

एतन्महानुभावरचितः 'काव्यालङ्कारसूत्रम्' इति नाम्ना प्रसिद्धो ग्रन्थः। अत्रालङ्कारशास्त्रस्य समस्तसिद्धान्तानां विवेचनं सूत्रेषु कृतं वर्त्तते। एतत्सूत्रोपरि वृत्तिरपि ग्रन्थकृन्निर्मिता विद्यते। समस्तग्रन्थे पञ्च परिच्छेदा अधिकरणानि वा। प्रथमे शरीराधिकरणे काव्यस्य प्रयोजनं त्रिविधरीतीनां वर्णनञ्च। द्वितीये दोषदर्शनाधिकरणे पदवाक्यवाक्यार्थदोषाणां प्रतिपादनम्। तृतीये गुणविवेचनाधिकरणे दशगुणानां शब्दार्थगतत्वेन विंशतिभेदप्रदर्शनम्। चतुर्थेऽलङ्काराधिकरणे शब्दार्थालङ्काराणां लक्षणोदाहरणानि। पञ्चमेऽन्तिमाधिकरणे कतिपयप्रयोगाणां शुद्धीकरणरीतीनां तथा तत्प्रयोगकरणप्रकाराणां निरूपणम्।

(५) उद्भटः

अयं हि भट्टोद्भट इति उद्भटभट्ट इति उद्भटाचार्य इति च व्यपदिश्यते। काश्मीरदेशीयस्य जयापीडाख्यराज्ञः सभापतिश्चासीदयम्। तस्य राज्ञः राज्यकालः खिस्त ७७९ वत्सरादरभ्य ८१३ वर्षपर्यन्त इति तत्कालभवत्वं तत्सभापतेरस्य भट्टोद्भटस्येति राजतरङ्गिणीतो निर्णीयते। तस्मिन् काले विदुषां सत्कारः कीदृश आसीदिति तत्र प्रतिदिनं चास्य वेतनं दीनारशतलक्षणम् (एककोटिस्वर्णमुद्रा) आसीदिति तत एव ज्ञायते। तथा चोक्तम्—

'दीनारशतलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः॥' (राजत. ४/४९५)

यदीदं पूर्णतस्तथ्यं तदाऽयं महान् धनाढ्यो भाग्यशाली चेति निर्विवादम्। अवगतानेकशास्त्रतत्त्वोऽपि मुख्यतयाऽयं वैयाकरणः। अत एवानेन—

'क्रियायाः प्रतिषेधेऽपि यत् फलस्य विभावनम्। ज्ञेया विभावना।'

इति विभावनालङ्कारलक्षणे 'कारणस्य निषेधेऽपि' इति प्रयोक्तव्ये कारण-पदस्थाने क्रियापदं प्रयुक्तम्।

एकस्यैव राज्ञ आश्रये विद्यमानयोरपि वामनोद्भटयोः साहित्यक्षेत्रे प्रतिस्पर्धित्वं विलसति। यदि वामनो रीतिसम्प्रदायस्योन्नायकस्तदा चोद्भटोऽलङ्कारसम्प्रदायस्य पृष्ठपोषक आसीत्। लोचनादिप्रामाणिकग्रन्थपर्यालोचनया महानुभावेनानेन भामहग्रन्थोपरि 'भामहविवरण' नाम्नी व्याख्याऽप्यकारि, परन्त्वद्यावधि बहुधा गवेषणेनापि न तदुपलभ्यते।

एतस्यैव मुख्यतमः 'काव्यालङ्कारसारसंग्रह' नामकः प्रबन्ध उपलभ्यते। ४१ एकचत्वारिंशदलङ्कारणाम् ७९ एकोनाशीतिकारिकया वर्णनं विहितवानेषः। भामहवदलङ्कारसम्प्रदायानुयायी भूत्वाऽप्ययं भामहात् कतिपयसिद्धान्तेषु मतैक्यं न प्रदर्शयति। तथाहि विशिष्टसिद्धान्ता ह्यस्य—

(१) अर्थभेदेन तावत् शब्दा भिद्यन्त इति । (२) श्लेषस्य शब्दार्थभेदेन द्वौ भेदौ, किन्तूभयोरप्यर्थालङ्कारत्वम् । एतस्यैव विशिष्टरूपेण खण्डनं मम्मटेन काव्यप्रकाशनवमोल्लासे विश्वनाथेन दर्पणदशमपरिच्छेदे च कृतम् । (३) अन्यालङ्कारयोगे श्लेषस्य प्रबलता । (४) वाक्यस्य त्रिप्रकारेणाभिधाव्यापारः । (५) विचारितसुस्थाविचारितरमणीय इत्येवं रूपेणार्थस्य द्विविधं स्वरूपम् । (६) गुणानां सङ्घटनाधर्मत्वम् ।

(६) रुद्रटः

काश्मीरवास्तव्य एवायमपि महानुभावः । ९०० नवमशताब्द्यां सम्भूतेन राजशेखरेण काव्यमीमांसायां काकुवक्रोक्तेः शब्दालङ्कारस्वीकारावसरे 'काकुवक्रोक्तिर्नाम शब्दालङ्कारोऽयमिति रुद्रटः' इति स्पष्टमेवैतस्य नामोल्लेखः कृतः, अतो नवमशताब्दीतः पूर्वं विद्यतेऽस्य कालः । एतद्रचितग्रन्थस्यापि नाम 'काव्यालङ्कार' एव । विषयदृष्ट्याऽतीवव्यापकस्तथात्रालङ्कारशास्त्रस्य समस्तसिद्धान्तानां विस्तृतसमीक्षा कृताऽस्ति । काव्यस्य प्रयोजनोद्देश्यकविसामग्र्यादिप्रतिपादनान्तरमलङ्काराणां विस्तृतं सुव्यवस्थितञ्च वर्णनं कृतमस्त्यत्र ग्रन्थे । यद्यपि भाषा-रीति-रस-वृत्तीनामपि सम्यग् विचारस्तथाप्यलङ्कारसमीक्षणमेव ग्रन्थस्य मुख्योद्देश्यम् । सर्वाणि चोदाहरणानि रुद्रटेन स्वयं रचितानि । अयमेव हि सर्वप्रथमं नवरसातिरिक्तं प्रेयो (वात्सल्य) नामकं रसमङ्गीकृतवान् ।

अलङ्कारसम्प्रदायानुयायी चायं रुद्रटः । अलङ्काराणां व्यवस्थाकरणमेव ग्रन्थस्य मुख्योद्देश्यम् । सर्वप्रथममलङ्काराणां वैज्ञानिकं रूपमनेनैव प्रदत्तम् । अलङ्काराणां वास्तवौपम्य (औदार्य) अतिशय-श्लेषाख्यानि चत्वारि मूलतत्त्वानि । ये च भामहोद्भटादिभिरलङ्काराः व्याख्यातास्तेष्वनेकानलङ्कारान् परित्यज्य तदर्थं नूतननामानि ग्रन्थे निर्दिष्टानि । यथा भामहस्य यो 'व्याजस्तुतिः' अलङ्कारः स रुद्रटस्य 'व्याजश्लेष' इति । अभिनवालङ्कारोद्भावनमप्येतेन कृतम् । यद्यपि रसानामतिविस्तारेण निरूपणं वर्त्तते तथाप्यलङ्कारोपर्येव ग्रन्थकृत आग्रहो दृश्यते ।

(७) भट्टनायकः

विशेषरूपेण परिचयस्तावन्नोपलभ्यतेऽस्य महानुभावस्य। रुय्यक-जयरथ-महिमभट्ट-अभिनवगुप्तादिद्वारा भट्टनायकस्य मतमुद्धृतमस्ति। एतैश्च विद्वद्भिः स्वीक्रियते च यद् 'हृदयदर्पण' इति नामकः कश्चन ग्रन्थ आसीद्भट्टनायकस्य। पाश्चात्यगवेषकः डा० 'एस-के. दे' मतानुसारेण हृदयदर्पणो हि न स्वतन्त्रो ग्रन्थः किन्तु कस्याप्यलङ्कारशास्त्रस्य विस्तृता टीकैव। महद्दौर्भाग्यं यदद्यापि न लभ्यते गवेषकैस्तत्। अयं हि भट्टनायकः प्रधानतः लोल्लट-शङ्कुक-कुन्तक-महिमभट्टवदभिधावाद्येव। रसविषये चायं भुक्तिवादी, साधारणीकरणसिद्धान्तस्य सर्वप्रथमप्रवर्त्तकश्च। एतस्यैव विस्तारोऽभिनवगुप्तेन कृतः। रससम्बन्धिसिद्धान्ते चानेन स्वकीयसांख्यदर्शनस्यैवाधारो गृहीतः। (८५५-८८४) ई० स्थितस्य काश्मीरराजावन्तिवर्मसभापण्डितस्यानन्दवर्धनस्य समकालीन एवायमिति स्वीकर्तुं शक्यते।

(८) मुकुलभट्टः।

काश्मीरनिवासी चायं (९२० ई०) कल्लटपुत्रः 'अभिधावृत्तिमातृका' इत्येकमात्रस्य ग्रन्थस्य रचयिता। स्वयमेवोक्तं ग्रन्थान्ते—

'भट्टकल्लटपुत्रेण मुकुलेन निरूपिता।
सूरिप्रबोधनायेयमभिधावृत्तिमातृका॥'

ग्रन्थेऽस्मिन् अभिधालक्षणयोर्विस्तृतेन समीक्षा कृतास्ति। एतस्य खण्डनं यत्र तत्र काव्यप्रकाशकोरण मम्मटेन कृतमस्ति।

(९) प्रतीहारेन्दुराजः

मुकुलभट्टस्यायं शिष्यः, काश्मीरनिवासी उद्भटालङ्कारसारसंग्रहलघुवृत्तिकर्त्ता। तदुक्तं ग्रन्थारम्भे—

'विद्वद्ग्र्यान्मुकुलकादधिगम्य विविच्यते।
प्रतीहारेन्दुराजेन काव्यालङ्कारसंग्रहः॥'

ग्रन्थेऽस्मिन् दण्डिवामनादीनां नामानि अमरुशतकविद्यमानानि पद्यानि च दृश्यन्ते। ग्रन्थान्ते चोक्तम्—'महाश्रीप्रतिहारेन्दुराजविरचितायामुद्भटालङ्कारसंग्रहलघुवृत्तौ षष्ठोऽध्यायः।

मीमांसासारमेघात् पदजलधिविधोस्तर्कमाणिक्यकोशात्
साहित्यश्रीमुरारेर्बुधकुसुममधोः सौरिपादाब्जभृङ्गात्।
श्रुत्वा सौजन्यसिन्धोर्द्विजवरमुकुलात् कीर्त्तिवल्ल्यालबालात्
काव्यालङ्कारसारे लघुविवृतिमधात् कौङ्कणः श्रीन्दुराजः॥' इति।

एतेनायमानन्दवर्धनात्प्राचीन एवेति निर्धार्यते

(१०) आनन्दवर्धनः

अयं हि काश्मीरदेशस्य राज्ञोऽवन्तिवर्मणः (८५५-८८३ ई०) सभापतिरासीत्। तथा चोक्तं राजतरङ्गिण्याम्—

'मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः॥'

एतस्य महाकवेर्नाम साहित्यशास्त्रेतिहासे सुवर्णाक्षरैर्महता समादरेण लिख्यते। रसगङ्गाधरकृता तु सत्यमेवेदं कथितं यदयमानन्दवर्धनः साहित्यशास्त्रस्य मार्गं परिशोधितवान्। तथाहि 'ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात्' इति तत्र दृश्यते। एतत्समयपर्यन्तम् अमरुकशतक-आर्यासप्तशत्यादिमुक्तककाव्यानामेव रचनायाः प्रचार आसीत्। प्रबन्धरसेषु यथा रसपरिपाको भवति न तथा मुक्तककाव्येषु। मुक्तककाव्येषु प्रायशः व्यञ्जनायाः प्राधान्येन वर्णनं तिष्ठति। अत एवोक्तम्—'अमरुककवेरेकः श्लोकः प्रबन्धशतायते' इत्यादि। अमरुककवेर्नामोल्लेखनं कृतमानन्दवर्धनेन, अमरुककाव्यनिर्माणसार्द्धमेव ध्वनेरपि विवेचनमत्यावश्यकमासीत्। आनन्दवर्धनात्पूर्वं ध्वनिविषये केचिदभाववादं केचिद् भाक्त (लक्षणा) वादं केचिच्चानिर्वचनीयवादमङ्गीकुर्वन्तिस्म। आनन्दवर्धनेन तु काव्यस्यात्मा ध्वनिरिति स्वीकृत्य व्यञ्जनायाः स्वतन्त्रसत्तां स्वीकुर्वता ध्वनिप्रकाराणां सर्वप्रथमं विवेचनं निजनिर्मितध्वन्यालोके कृतम्। तथा च तत्रत्यमाद्यपद्यम्—

'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्॥' (ध्वन्यालोकः १/१)

एतद्ग्रन्थस्य प्रभावोऽवान्तरग्रन्थकाराणामुपरि सर्वथा प्रेरकत्वेन विहितः।

ध्वनिशब्दो हि व्याकरणादेव गृहीतो वर्त्तते न तु स्वतन्त्रः, केवलमिदमेव वैशिष्ट्यं यद् वैयाकरणैः स्फोटात्मकस्य शब्दस्यैव ध्वनिरिति व्यवहारः कृतः, परन्त्वालङ्कारिकैस्तु शब्दार्थयुगलस्य।

आनन्दवर्धनस्य विरोधिनोऽपिः सन्ति समर्थकाश्च। तत्र विरोधिष्वेको वक्रोक्तिजीवितकारः कुन्तलः, यो हि वक्रोक्त्यन्तर्गतमेव ध्वनिमङ्गीकृतवान्। द्वितीयो महिमभट्टः, अयं हि 'व्यक्तिविवेक'नामकग्रन्थेऽनुमान एव ध्वनेरन्तर्भावाय प्रयासं कृतवान्। तृतीयश्च रसवादी दशरूपककारो धनञ्जयः।

ध्वनिकारसमर्थकेषु सर्वशक्तिशाली ध्वन्यालोकस्य काव्यालोकलोचनाख्याव्यख्याकृन्नवमशताब्द्या मध्यवर्त्ती श्रीमदभिनवगुप्तपादाचार्यः। अनेन टीकाकर्त्रा रसनिष्पत्तिप्रसङ्गस्य सम्यक्तया विस्तरेण प्रतिपादनं कृतम्। ध्वनिकृता यद्यपि ध्वनावेव रसस्यान्तर्भावः प्रदर्शितस्तथापि प्रधानत्वेन रसध्वनिरेवाङ्गीकृतः। एवञ्चालङ्कारवादेन तिरोहितं रससम्प्रदायवादं प्रकाश्य ध्वनिसम्प्रदायोद्धारे स्वप्रभावः प्रदत्तः। ध्वनिसम्प्रदायस्योत्पत्तिस्त्वित एवेति स्वीकुर्वते सर्वे।

ध्वन्यालोके सन्ति त्रयोऽशाः—कारिकावृत्त्युदाहरणरूपाः। तेषु नानाविधेभ्यः प्राचीनग्रन्थेभ्य उदाहरणान्युद्धृतानि सन्त्यत्र। केचित्तु कारिकाकारं वृत्तिकारं च भिन्नत्वेनामनन्ति, परन्तु वास्तविकविचारणायामयमेवोभयोः कर्त्तेतीतिहासकाराः वदन्ति। अस्यैकस्यैव ग्रन्थस्योपरि ग्रन्थकृतो विपुलकीर्त्तिरवलम्बिताऽस्ति। उक्तं च राजशेखरेण—

'ध्वनिनाऽतिगभीरेण काव्यतत्त्वनिवेशिना।
आनन्दवर्धनः कस्य नासीदानन्दवर्धनः॥'

अत्र च चत्वार उद्योताः। तत्र प्रथमे ध्वनिविरोधिमतसमीक्षा। द्वितीये तृतीये च ध्वनिप्रकाराणां विवेचनम्। चतुर्थे ध्वनेरुपयोगिताया वर्णनम्। नैष महानुभावः साहित्यशास्त्रस्यैव ग्रन्थनिर्माता किन्तु कविकर्मस्वपि महान् कुशलः। दृश्यते चैतस्यैव महानुभावस्य 'अर्जुनचरितम्, देवीशतकम्, विषमबाणलीला' इत्यभिधेयानि काव्यानि यानि विदुषां मनांसि प्रमोदयन्ति।

(११) महिमभट्टः

अयं हि काश्मीरनिवासी (११) एकादशशतकस्यारम्भे आसीत्। ध्वनेः स्थापनायाः प्रबलविरोधी एषः एतन्महानुभावस्य ग्रन्थो 'व्यक्तिविवेक' नाम्ना प्रसिद्धः।

ग्रन्थेऽस्मिन् त्रयो विमर्शाः। ग्रन्थस्य मुख्योद्देश्यमिदमेव यद्ध्वनेरनुमान एवान्तर्भावः स्वीकर्त्तव्यः। तथाचोक्तमारम्भ एव—

'अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥'

स्वकीयं सिद्धान्तमेनं द्रढीकर्त्तुं सर्वथा प्रयासान्वितं पाण्डित्यं प्रदर्शितं ग्रन्थकृताऽस्मिन् ग्रन्थे। ध्वनिनामकः कश्चन पदार्थो नास्ति, यद्यस्ति तर्हि अनुमानएव तस्यान्तःपात इति हि तन्मतम्। तत्र प्रथमे विमर्शे ध्वनेर्लक्षणं तस्यानुमानेऽन्तर्भावो वर्णितः। द्वितीये विमर्शेऽन्तरङ्गबहिरङ्गानौचित्यमर्थविषयकं विवेचनं कृतम्। अन्तरङ्गानौचित्येनाभिप्रायो रसदोषस्य, बहिरङ्गानौचित्येन च पञ्चप्रकाराणां पदपदांशादिदोषाणाम्। यद्यपि काव्यप्रकाशकृता मम्मट्टेन महिमभट्टस्य यत्र तत्र खण्डनं कृतम्, किन्तु स्वकीयदोषपरिच्छेदविवेचनावसरे तदीयानौचित्यविषयकसर्वसिद्धान्त एव गृहीतः।

(१२) वक्रोक्तिजीवितकारः—(कुन्तलः) (कुन्तकः)

अयमप्याचार्यो ध्वनिविरोधी काश्मीरनिवासी महिमभट्टसमकालीन एवासीत्। एतद्रचितं 'वक्रोक्तिजीवितम्'। अद्यावध्यपि समस्तग्रन्थो नोपलभ्यते।

यावानेवांशो लोचनगोचरीभूतस्तावतैव कवेः सूक्ष्मविवेचनशैल्याः परिचयः प्राप्यते। ग्रन्थेऽस्मिन् चत्वार उन्मेषास्सन्ति यत्र वक्रोक्तेरेव साङ्गोपाङ्गविवेचनं दृश्यते। ग्रन्थकर्त्रा हि काव्यस्य व्यापको गुणो वक्रोक्तिरिति स्वीकृतम्। साधारणपुरुषमार्गात् कविमार्गो भिन्नरूपेणैव भवतीति नाविदितं केषाञ्चिदपि। कविशब्दावल्यां कल्पनायाः पुटः संलग्नस्तिष्ठति। स हि कमलं कमलरूपेण न वर्णयति किन्तु सरसीनेत्ररूपेण। एवमुषसमपि नोषो रूपेण वर्णयति किन्तु भगवच्चरणरक्तिमरूपेण। अत एव कुन्तलेन वक्रता वैचित्र्यरूपेण तथा वैदग्ध्यभङ्गीभणितिरूपेण वर्णिता। वक्रोक्तेर्व्यापकताप्रदर्शनाय कविना षड्विधा वक्रोक्तिरङ्गीकृता। तथाहि (१) वर्णविन्यासवक्रता (२) पदपूर्वार्धवक्रता, (३) परार्धवक्रता, (४) वाक्यवक्रता, (५) प्रकरणवक्रता (६) प्रबन्धवक्रतेति।

ग्रन्थकृता हि सर्वेषामलङ्काराणां वाक्यवक्रतायामेवान्तर्भावो दर्शयितुं प्रयत्नः कृतः।

तथा चोक्तम्—

'वाक्यस्य वक्रभावोऽन्यो विद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥' (व. जी. १/२१)

रसस्यान्तर्भावस्तु प्रेयसोर्जस्विन्नलङ्कारयोर्मध्ये। किन्तु रसप्राधान्यमनङ्गीकुर्वताऽपि नितान्तगौणत्वं रसस्य न स्वीकृतम्। अन्यालङ्कारापेक्षया रसवदलङ्कारस्यालङ्कार्यत्वन्तु स्वीकृतमेव। यत्र च कविः स्वकल्पनयेतिवृत्तौ परिवर्त्तनं कृत्वा सरसतामापादयति तत्कविकर्मणः प्रकरण-प्रबन्धवक्रतयोरन्तर्भावो बोध्यः। वक्रोक्तेर्बीजं तु भामहेनैव 'वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः (का. ल. १/१६) कोऽलङ्कारोऽनया विना' (का. ल. २/८५) इत्यादिसूत्रेणोपन्यस्तम्। एवञ्च या मूलकल्पना वक्रोक्तेर्भामहेन प्रदर्शिता तस्या एव व्यापकसाहित्यिकतत्त्वरूपेण विकासः कुन्तकस्य स्वकीयं वैशिष्ट्यं वर्तते। समस्तसाहित्यिकतत्त्वानि सम्मिलितानि कृत्वा कुन्तकेनैतादृशविदग्धतायाः परिचयो दत्तः, येन समीक्षकाः साहित्यिकाः सर्वदा अनुरक्ता एव भविष्यन्तीति।

(१३) अभिनवगुप्तः

अयं हि भरतमुनिरचितनाट्यशास्त्रस्य अभिनवभारताख्यव्याख्याया आनन्दवर्धनकृतध्वन्यालोकस्य लोचनाख्यव्याख्यायाः शैवशास्त्रस्य नाट्यलोचनस्य च प्रणेता। अभिनवगुप्तपादानां विषये त्विदं रहस्यमवगन्तव्यम्—'पुरा किल क्वचिद् बलभीपठतां बहूनां-ब्राह्मणबालकानामध्ययनस्थानमासीत्। तत्र पठन् कश्चिद् गौडबालोऽतिसौबुध्यान्मुखरत्वाच्च निखिलबालानां भयप्रदत्वेन बालवलभीभुजङ्ग इति गुरुणा अभिहितः। स चाचार्यतामुपगत इति सकलरहस्याभिज्ञः श्रीवाग्देवतारो (मम्मटः) गूढमेतन्नामाभिनवगोपानसीगुप्तपाद इति वैदग्ध्यमुखेनाभिव्यनक्तीति। एतस्याभिनवभारती अलंकारशास्त्रेषु, ध्वन्यालोकलोचनश्च रसशास्त्रेषु प्रतिष्ठितौ ग्रन्थौ। तृतीयो ग्रन्थः साहित्यशास्त्रीयः 'काव्यकौतुकविवरण' नामक आसीद्यो ऽद्यावध्यप्यनुलब्ध एव।

अयमाचार्यो यद्येकतः शैवदार्शनिकस्तर्ह्यपरतः साहित्ये व्यञ्जनावादी ध्वनिवादी च। अत एव रसपरकसिद्धान्तो ह्यस्य शैवदर्शनव्यञ्जनावादयोराधारभित्तौ प्रतिष्ठितो विद्यते। रसो हि व्यङ्ग्य इत्येतन्मतम्। भरतरससूत्रस्थ 'संयोगात्' इत्यस्य 'व्यङ्ग्यव्यञ्जकभावरूपात्' इति 'निष्पत्तिः' इत्यस्य 'अभिव्यक्तिः' इत्यर्थ इत्येवंरूपेण प्रतिपादयत्येषः। एतदतिरिक्तं शान्तरसस्य स्थापनाऽप्यभिनवरूपेणैव कृता। नाट्यशास्त्रे हि यद्यप्यष्टरसानामेव निर्द्देशो वर्त्तते किन्त्वयमभिनवगुप्तः स्वकीयभारत्यां भरताधारेणैव नवमं शान्तरसमपि स्थापितवान्। रसविषयकसमीक्षा चैतस्य वैज्ञानिकी युक्तियुक्ता च। यद्ययमाचार्यो नाभविष्यत्तदा नूनं नाट्यशास्त्रध्वन्यालोकयो रहस्यानामिदानीन्तनसमयेऽवबोधः कथमपि न भवेदिति सर्वत्र स्फुटम्। एतत्प्रदर्शितरससिद्धान्तस्यैव मम्मटादारभ्य सर्वोत्तरवर्त्तिसाहित्याचार्यपर्यन्तं मान्यतास्ते। नाट्यशास्त्रालङ्कारशास्त्रयोर्मध्येऽभिनवगुप्तस्य आचार्येषु प्रतिमा गणनास्तीति सर्वमनवद्यम्।

अस्य पिता नरसिंहगुप्तोऽथवा चुखुलकः। तथा चैतत्कृततन्त्रालोके—

'तस्यात्मजश्चुखुलकेति जने प्रसिद्धश्चन्द्रावदातधिषणो नरसिंहगुप्तः ।
यं सर्वशास्त्ररसमज्जनशुभ्रचित्तं माहेश्वरी परमलंकुरुतेऽस्म भक्तिः ॥'

एतस्य गुरुर्भट्टेन्दुराजो भट्टतौतश्च । एतदेव प्रतिपादितं ध्वन्यालोकलोचने—

भट्टेन्दुराजचरणाब्जकृताधिवासहृद्यश्रुतोऽभिनवगुप्तपदाभिधोऽहम् ।'

एतत्कृता 'तन्त्रालोक-ईश्वरप्रत्यभिज्ञाकारिकयोः' उपरिविमर्शिनीटीकाऽतिप्रशस्ता। १०१५ ई. वर्षे ४०९० कलिसंवत्सरे चोक्तटीका पूर्णतामगादिति लिखितं तत्रैव—

'इति नवतितमेंऽशे वत्सरान्ते युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने ।
जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णा प्रेरितः शम्भुपादैः ॥'

अत एष एव अभिनवगुप्ताचार्यस्य समयः ।

(१४) शौद्धोदनिः

अयं जैनोऽलङ्कारशास्त्रप्रणेता। कारिकारूपाणि सूत्राणि अलंकारशेखराख्ये स्वग्रन्थे मूलत्वेनोपसंगृह्य तेषामुपरि वृत्तिं रचयामास केशवमिश्रः। तथाचोक्तं ग्रन्थारम्भे 'अलङ्कारविद्यासूत्रकारो भवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रं रचयन् प्रथमं काव्यस्वरूपमाह—'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्' इति ।' अयमास्ते हेमचन्द्रात् प्राचीनः ।

(१३) वाग्भटः

वाभटो वाभटालङ्कारत्वेन प्रसिद्धो यो ग्रन्थस्तत्कर्त्ता । वाभटमेव वाग्भट इति नाम्ना केचिद् प्रथयन्ति। वस्तुतस्तु द्वावपि पृथक्। अयमपि हेमचन्द्रात्प्राचीनः ।

(१४) वाग्भटः

एतन्निर्मितं 'नेमिनिर्वाणकाव्यम्'। एतन्महाकाव्यस्य पञ्चदशसर्गेषु जैनतीर्थङ्करनेमिनाथस्य चरित्रवर्णनमस्ति। एतत्कविता माधुर्य-प्रसादैः-गुणैः। हेमचन्द्रस्य (११४० ई०) समकालिकोऽयम्। एतस्यैव वाग्भटालङ्काराख्यो ग्रन्थः, यत्र दोष-गुण-वृत्ति-रसालङ्काराणाम् विवेचनं सरलतया लेखकेन कृतं समुल्लसति।

(१७) रुय्यकः

अयं हि अलङ्कारसर्वस्वाख्यग्रन्थप्रणेता। जयरथकृतया विमर्शिन्याख्यया व्याख्यया सहितोऽयं ग्रन्थः पुण्यपत्तनस्थदक्षिणकालेजाख्यविद्यामन्दिरे पाण्डुलिपि रूपेण विद्यते। ग्रन्थेऽस्मिन् पञ्चसप्तत्यर्थालङ्काराणां षट्शब्दालङ्काराणां च पाण्डित्यपूर्णं वर्णनमस्ति। मम्मटकृतसमीक्षातोऽत्यधिकव्यापकरूपेण विस्तृतरूपेण चात्र समीक्षा कृताऽस्ति। रुय्यकस्यालङ्कारसर्वस्वाख्यनिबन्धकर्तृत्वादेव रसगङ्गाधरे विषमालङ्कारे जगन्नाथेन 'अरण्यानी क्वेयं धृतकनकसूत्रः क्व स मृगः' इत्यलङ्कारसर्वस्वस्थोदाहृतं पद्यमुपक्रम्य 'इत्यलङ्कारसर्वस्वकृतोदाहृतमपि प्रत्युक्तम्' इतिग्रन्थेन रूय्यकोदाहरणं खण्डितम्। एवमुद्योतकारनागेशभट्टेनापि 'एतेन—'व्यङ्ग्यस्य प्रकारान्तरेणाभिधानासम्भवात् कार्यमुखेन कारणाभिधानं पर्यायोक्तम्, उदाहरणे राहुबधूकुचनैष्फल्यरूपेण कार्येण राहुशिरश्छेदकारणरूपो गम्यते' इत्यलङ्कारसर्वस्वोक्तम् (अलङ्कारसर्वस्वेऽप्रस्तुतप्रशंसालङ्कारप्रकरणे रुय्यकेणोक्तमित्यर्थः) खण्डितम्' इत्युक्तम्।

एष हि काश्मीरराज्ञः जयसिंहस्य (११२८-४९ ई०) सान्धिविग्रहिकमहाकविमङ्खकस्य गुरुरासीत्। अतश्चैतस्य समयो द्वादशशताब्द्या मध्यभागः। अत एव मम्मटापेक्षयायं किञ्चित्प्राचीनः। अत एव 'राजति तटीयम्' इति सङ्करालङ्कारोदाहरणपद्ये काव्यप्रकाशे मम्मटेन रूय्यकमतं खण्डितम्। अत एव च व्यतिरेकालङ्कारस्य द्वितीयं लक्षणं तदुदाहरणं च रुय्यकोपन्यस्तं तेनैव (मम्मटेन) खण्डितम्। किंच 'योऽलङ्कारो यदा श्रितः' इति संकरालङ्कारग्रन्थेनाऽपि रुय्यकस्यैव खण्डनं कृतं वर्त्तते। अत एव च 'ननु

स्वरितादिगुणभेदात्' इत्यादिकं 'कथमयं शब्दालङ्कार' इत्यन्तं काव्यप्रकाशग्रन्थमलङ्कारसर्वस्वग्रन्थखण्डनपरतयैव योजयन्ति शब्दालङ्कारप्रकरणे काव्यप्रदीपकारा अपि।

(१८) भोजराजः

अयं सरस्वतीकण्ठाभरण-रामायणचम्पू-शृङ्गारप्रकाशादिकर्त्ता मालवदेशे धारानगरीमधिवसतिस्म। शृङ्गारप्रकाशसरस्वतीकंण्ठाभरणौ विशालकायौ साहित्यशास्त्रग्रन्थौ। तत्र शृङ्गारप्रकाशे व्यापकतया मार्मिकतया च रसनिरूपणम्। शृङ्गाररस एव सर्वरसानां मूलभूत आदिमः प्रकृतरसः, अन्ये च रसा एतद्विकाररूपा एव इति विद्यते भोजराजमतम्। रसस्य वैज्ञानिकरूपप्रस्तुतकरणे भोजेन हि स्वकीया सूक्ष्मविवेचनशक्तिः प्रदर्शिता ग्रन्थेऽस्मिन्। द्वितीये सरस्वतीकण्ठाभरणे च गुणदोषालङ्काराणां विवेचनं सम्यक् कृतं विद्यते। वस्तुतोऽयं ग्रन्थो विदुषां कण्ठाभरण एवास्ति।

भोजराजस्य स्थितिकालस्तु खिस्त ९९६ वत्सरादाभ्य १०५१ वत्सरपर्यन्त इति सकलविद्वज्जनप्रसिद्धमेव। तथा काश्मीरिककह्लणकविकृतायां काश्मीरेतिहासराजतरङ्गिण्यां सप्तमे तरङ्गे प्रस्तूयमानः—

'स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ।

सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ॥'

इति श्लोकोऽपि १०२९ मिते खिस्ताब्दे काश्मीरदेशे राज्यपदाधिष्ठितस्य अनन्तराजस्य मालवाधीशस्य भोजरास्य च समकालत्वं दानशूरत्वं विद्वत्त्वं च स्फुटयन् भोजराजस्य स्थितिकामेकादशशताब्द्यामेव घोषयति। एवं भोजराजीयहस्ताक्षरसहितं खिस्त १०२२ मिते वत्सरे भट्टगोविन्दसुताय धनपतिभट्टाय ब्राह्मणाय दत्तं दानपत्रमपि भोजराजस्य पूर्वोक्तमेव स्थितिकालं सम्यगवेदयति। मम्मटेन च दशमोल्लासे उदात्तालङ्कारोदाहरणतयोपन्यस्तः 'मुक्ताः केलि.....। 'यद्विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम्' इति पद्ये भोजराजनाम स्पष्टमेवोल्लेखितम्। अतोऽस्य स्थितिकालः मम्मटात्प्राचीन एव।

(१९) मम्मटः

अयमपि काश्मीरनिवासी एव जैयटपुत्रो वाराणसीमागत्याधीतविद्यः। श्रूयते चास्य मम्मटस्य पतञ्जलिप्रणीतव्याकरणमहाभाष्यटीकाकर्त्ता कैयटः वेदचतुष्टयभाष्यकर्त्ता उवटापरनामा औवटश्चेति द्वावपि कनिष्ठसहोदरावास्ताम्। काव्यप्रकाशदशमोल्लासे उदात्तालङ्कारोदाहरणतयोपन्यस्त...भोजनृपतेस्तत्त्यागलीलायितम्' इति पद्यांश एव मम्मटस्य भोजराजादर्वाचीनत्वं स्पष्टं प्रकट्यति। एतत्कृतकाव्यप्रकाशस्य टीका सर्वप्रथमं माणिक्यचन्द्रेण कृता। तेन च खिस्त ११६० वर्षे संकेताख्या काव्यप्रकाशव्याख्या व्यरचि। तथा चोक्तं तट्टीकायाम्—

'रसवक्त्रग्रहाधीशवत्सरे (१२१६ वैक्रमे) मासि माधवे।
काव्ये काव्यप्रकाशस्य सङ्केतोऽयं समर्थितः॥'इति।

एवञ्चास्मात्कालात्पूर्व एव मम्मट इति निर्णीयते। ध्वनिविरोधिनां मतं खण्डयित्वाऽयमाचार्यः पुनः तत्स्थापनारूपेण ध्वनिनिरूपणं तथा कृतवान् यथा तत्परवर्त्तिनः सर्वेऽप्याचार्याः पुनः कथमपि ध्वनिविरोधं कर्तुं न विमृष्टवन्तः। अतएव हि मम्मटो 'ध्वनिप्रस्थापनपरमाचार्य' इत्युपाधिनाऽलङ्कृतोऽवान्तरविद्वद्भिः। अयं खलु बंहुश्रुतोऽपि मुख्यतया वैयाकरण एव वैयाकरणानां सरणेरेवानुसरणात्। सूत्रात्मिका चास्य लेखनशैली। अत एव साम्प्रतमुपलब्धास्वपि काव्यप्रकाशटीकासु ग्रन्थाभिप्रायो दुर्गम एवास्तीति न तत्प्रत्यक्षगोचरवतां विदुषां मनाक् सन्देहलेशः।

काव्यप्रकाशस्य त्रयोंऽशाः कारिकाः वृत्तिरुदाहरणं चेति। कारिकैव सूत्रनाम्ना व्यपदिश्यते। अत एव काव्यप्रदीपविषमालङ्कारे गोविन्दठक्कुरादिभिः 'सूत्रे विभाग उपलक्षणपरः' इत्याद्युक्तम्। तत्र कारिकावृत्त्युदाहरणेषु मध्ये सर्वासामपि कारिकाणां परिकरालङ्कारपर्यन्ताया वृत्तेस्तत्पर्यन्तोदाहरणोपन्यासस्य च कर्त्ता मम्मट एव। परन्तूदाहरणानि प्रायोऽन्यदीयान्येव गृहीतानि न तु स्वकृतानि। अवशिष्टभागस्य राजानकजयानकसूनोः रत्नाकरकविप्रणीतस्य हरविजयाख्यका-

व्यस्य यत् विषमद्योताभिधं टिप्पणं तत्कर्त्ता अल्लट (अलक) सूरिणा पूरितः। तथा चोक्तमानन्दकविना काव्यप्रकाशपरिकरालंकारटीकायाम्—

'कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा॥' इति।

काव्यप्रकाशस्योल्लासाभिधेया, दश विभागाः। ते च 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यलक्षणं विधाय तदनुरोधेनैव निर्मिताः। तथापि प्रथमे उल्लासे मङ्गलाचरणानन्तरं यथाक्रमं काव्यस्य फलं कारणं 'तददोषौ' इत्यादिना स्वरूपं च निरूपितम्। अनन्तरं काव्यभेदस्य जिज्ञासितत्वात् उत्तममध्यमाधमरूपत्रिविधभेदोऽपि प्रतिपादितः। ततः 'शब्दार्थौ काव्यम्' इत्युक्तत्वात् शब्दार्थभागादेरपि जिज्ञासितत्वेन द्वितीये उल्लासे शब्दार्थविभागः आर्थीव्यञ्जनावाचकः शब्दः मतभेदेन सङ्केतितार्थः अभिधा लक्षणामूलाव्यञ्जना अभिधामूलाव्यञ्जना च प्रतिपादिताः। ततोऽर्थस्य व्यञ्जकता कथमिति जिज्ञासायां तृतीये उल्लासे अर्थस्य व्यञ्जकता प्रतिपादिता। ततः उत्तमकाव्यप्रभेदानामाकांक्षितत्वात् चतुर्थे उल्लासे १०४५५ संख्याका ध्वनिकाव्यप्रभेदाः रसभावादयश्च प्रतिपादिताः। ततो मध्यमकाव्यप्रभेदानां जिज्ञासितत्वात् पञ्चमे उल्लासे-४५१५८४ संख्याका गुणीभूतव्यङ्ग्यकाव्यप्रभेदाः प्रसङ्गात् व्यञ्जनावृत्तिसंस्थानयुक्तयश्च प्रतिपादिताः।

ततोऽधमकाव्यप्रभेदजिज्ञासायां षष्ठे उल्लासे चित्रकाव्यप्रभेदयोः स्वरूपं प्रतिपादितम्। ततः काव्यलक्षणे दोषाणां पूर्वं प्रतिपादनात् सप्तमे उल्लासे सप्ततिसंख्याकाः(१६ पददोषाः २१ वाक्यदोषाः २३ अर्थदोषाः १०) दोषाः प्रतिपादिताः। कुत्रचित्तेषां प्रतिप्रसवोऽपि (अदोषताऽपि) प्रतिपादितः। ततः 'सगुणौ' इति विशेषणाद्गुणनिरूपणस्य जिज्ञासिततया अष्टमे उल्लासे गुणलक्षणम् 'गुणालङ्कारयोर्नास्ति भेदः' इति प्रतिपादयतां केषाञ्चिन्मतं निराकर्त्तुम् अलङ्कारलक्षणम् माधुर्यौजः प्रसादाख्यास्त्रयो गुणाः वामनोक्तदशविधगुणानां स्वोक्तगुणेष्वन्तर्भावश्चेत्येतानि प्रतिपादितानि। ततः काव्यलक्षणे 'अनलङ्कृती' इत विशेषणात् अलङ्काराणां जिज्ञासितत्वात् तत्रापि शब्दस्य प्राथम्यात् काव्यलक्षणे पूर्वग्रहणाच्च नवमे उल्लासे वक्रोक्त्यादयो रीतिसहिताः षट् शब्दालङ्काराः प्रतिपादिताः। ततोऽर्थालङ्काराणामु-

पस्थितत्वात् दशमे उल्लासे उपमादयः ६१ एकषष्टिसंख्याकाः अर्थालङ्काराः प्रतिपादिताः वामनाद्युक्तानामलङ्कारदोषाणां स्वोक्तेषु दोषेष्ववन्तर्भावश्च प्रतिपादित इति ।

(२०) हेमचन्द्रः

गुर्जरदेशस्थोऽयं जैनोऽलङ्कारचूडामणिसंज्ञकवृत्तिसमेतकाव्यानुशासनयोगशासनद्वयाश्रयमहाकाव्यदेशीनाममालादिबहुग्रन्थानां कर्त्ता । कुमारपालनृपसमकालिकः (१०८८-११७२ ई०) इति तत्तद्ग्रन्थावलोकनेनावधार्यते । एतत्कृतकाव्यानुशासनेऽष्टौ परिच्छेदाः । यत्रालङ्कारतत्त्वानां तथ्यस्य विस्तृतेन विवेचना समुल्लसति । प्राचीनग्रन्थात् सङ्कलनमेवाधिकं मौलिकता तु नाममात्रमित्यादिविवेचकानां मतम् ।

(२१) केशवमिश्रः

अयमुत्तर (मिथिला) देशीयो माणिक्यचन्द्रनृपकारितस्यालंकारशेखराख्यग्रन्थस्य कर्त्ता । अनेन हि अलङ्कारसूत्रकारशौद्धोदनिकृतानि कारिकारूपाणि सूत्राणि स्वग्रन्थे मूलत्वेनोपसंगृह्य तेषामुपरि वृत्तिरुपनिबद्धा । तदुक्तमलङ्कारशेखरग्रन्थारम्भे—'अलङ्कारविद्यासूत्रकारो भगवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्त्तयिष्यन् प्रथमं काव्यस्वरूपमाह—'काव्यं रसादिमद्वाक्यं श्रुतं सुखकृत्' इति । अयं षोडश (१६) शताब्द्यां समुपस्थित आसीत् ।

(२२) पीयूषवर्षः

पीयूषवर्षापरनामधेयोऽसौ कविरनेकदिनसाध्यसत्रविद्याप्रवीणाद् याज्ञिकान्महादेवात्सुमित्रायां जन्म लेभे इतितत्कृतचन्द्रालोकग्रन्थादवगम्यते । तथाहि—

'चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ।' (चन्द्रा. १ म.२)

'महादेवः सत्रप्रमुखमखविद्यैकचतुरः ।
सुमित्रातद्भक्तिप्रणिहितमतिर्यस्य पितरौ ॥' (चन्द्रा० १ म. १६)

मातापित्रोर्नामसादृश्यात्प्रसन्नराघवरचयिताऽप्ययमेव बाधकप्रमाणभावान्निश्चीयते । अयं हि कौण्डिन्यगोत्रसमुत्पन्नो विदर्भदेशान्तर्वर्त्तिकुण्डिनपुरनिवासीत्यपि ज्ञायते । तथा हि—

'कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ।'
'लक्ष्मणस्येव यस्यास्य सुमित्राकुक्षिजन्मनः'
'रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥' (चन्द्रा० १/१४,१५)

गीतगोविन्दकारो जयदेवस्तु भोजदेवरमादेवीपुत्र इत्यस्त्युभयोः पार्थक्ये साधकं प्रमाणम् । पक्षधरापरनामा जयदेवोऽप्यस्माद्भिन्न एव । अथास्य समयः— अनेन धीमता काव्यलक्षणावसरे—

'अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ॥' (चन्द्रा० १/८)

इत्यनेन श्रीमम्मटाचार्यमतं खण्डितम् । लक्षणनिरूपणप्रस्तावे च काव्यप्रकाशोक्तलक्षणायाः षड्भेदा अपि प्रदर्शिता इति सिद्ध्यत्यस्यैकादशशताब्द्याश्चरमभागस्थितश्रीमम्मटाचार्यानन्तरभावित्वम् । चन्द्रालोके च सर्वत्र प्रथमं १०५० शताब्दीवर्त्तमानेन रुय्यकेणालङ्कारसर्वस्वे विकल्पविचित्रालङ्कारयोर्ये लक्षणे स्वीकृते त एवात्र परिष्कृत्य प्रतिपादिते । मम्मटाचार्येणैकषष्टिः रुय्यकेणैव सप्ततिः, जयदेवेन तु शतमलङ्काराः स्वीकृता इति विकासक्रमेणाऽप्यस्य मम्मटरुय्यकाभ्यां पश्चाद्भावित्वं निश्चीयते ।

चन्द्रालोकस्य सर्वतः प्राचीना शरदागमाख्या व्याख्या प्रद्योतभट्टाचार्येण निर्मिता । असौ शरदागमकारः (१५७७ ई. वर्षे) रीवाँनरेशवघेलावंशशिरोमणिश्रीवीरभद्रदेवसमाश्रित आसीदीति व्याख्या प्रारम्भतः स्फुटं प्रतीयते एवञ्च सिद्ध्यति चन्द्रालोकस्य प्राचीनता । १४०० चतुर्द्दशशताब्दीस्थितसाहित्यदर्पणकारविश्वनाथद्वारा हि साहित्यदर्पणचतुर्थपरिच्छेदे प्रसन्नराघवीय 'कदली कदली' इति पद्यस्य समुद्धरणेन चतुर्द्दशशताब्दीपूर्वभाविता समायाति जयदेवस्य १६३० ई०

वर्षे शिङ्गभूपालेन रसार्णवसुधाकरे प्रसन्नराघवनाटकस्य नामतो ग्रहणात् प्रायस्त्रयोदशशताब्द्येव जयदेवस्य सत्ताकालो निश्चीयते ।

एतद्विरचितौ चन्द्रालोक-प्रसन्नराघवाख्यौ द्वौ ग्रन्थौ स्तः । तत्र चन्द्रालोकशब्दो हि चन्द्रस्यालोक इवालोकः प्रकाशः काव्योपयोगिविषयाणां यस्मिन्निति व्युत्पत्त्या सिद्ध्यति । इह काव्यप्रकाशादिवत्सर्वेऽपि काव्यविषया अलङ्कारध्वन्यादयः सन्निवेशिताः । अत्र दशमयूखाः २९४ श्लोकाश्च । प्रथमे मयूखे—काव्यलक्षणम्, रूढियौगिकादयः शब्दस्य भेदाः, वाक्यखण्डवाक्यादीनि दर्शितानि । द्वितीये—शब्दार्थवाक्यादिदोषास्तत्परिहाराश्च प्रदर्शिताः । तृतीये—अक्षरसंहत्यादीनि काव्यज्ञापकानि लक्षणानि । चतुर्थे—श्लेषादयो गुणाः । पञ्चमे—शब्दालङ्काराः शतमर्थालङ्काराश्च । षष्ठे—रसादयो वृत्तयश्च निरूपिताः । सप्तमे—ध्वनिभेदाः । अष्टमे—गुणीभूतव्यङ्ग्यानां वर्णनम् । नवमे—लक्षणायाः, दशमे—अभिधायाश्च वर्णनमस्ति ।

एतेष्वधो लिखितविषयाः काव्यप्रकाशादिभ्योऽधिकाः—

प्रथमे मयूखे—रूढियौगिकानां शब्दानां नव भेदाः । तृतीयेऽक्षरसंहत्यादीनि काव्यज्ञापकलक्षणानि । सप्तमे—वक्तृस्यूतस्वाङ्कुरितादयो व्यङ्ग्यभेदाः । नवमे—तटस्थगतार्थगतत्वादयो लक्षणाभेदाः । दशमे चाभिधायाः षड्भेदे वस्तुयोगनिर्देशाख्यौ द्वौ भेदौ चेति । अपि च काव्यप्रकाशादस्य बहुस्थलेषु मतभेदोऽप्यवलोक्यते यथालङ्कारप्रकरणे । अस्य ग्रन्थस्य महदुपयोगित्वादेव चिरन्तनकालादध्ययनाध्यापनादिषु प्रचुरप्रचार आसीत् । यश्च परवर्त्ती कुवलयानन्दाख्योऽलङ्कारग्रन्थोऽप्पय्यदीक्षितविरिचतः सोऽपि चन्द्रालोकालङ्कारप्रकरणस्य व्याख्यारूप एव । तथा चोक्तं तत्रैव—

'येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः ।
प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यते ॥' इति ।

'चन्द्रालोको विजयतां शरदागमसंभवः ।
रम्यः कुवलयानन्दो यत्प्रसादादभूदयम् ॥' इति च ।

किं बहुना, श्री योधपुराधीशेन १६८३-१७३५ ई० वर्षेषु वर्त्तमानेन प्रथमेन यशवन्तसिंहमहाराजेन हिन्दीभाषायां छन्दोनिबद्धो भाषाभूषणाख्योऽलङ्कार-ग्रन्थोऽपि चन्द्रालोकाश्रयेणैव प्रणीत इति व्यक्तमेव। तुलसीदासादीनामुपर्यपि यत्र तत्र चन्द्रालोकस्य पूर्णरूपेण प्रभाव आसीत्।

अपरश्च यो ग्रन्थः प्रसन्नराघवाख्यः स हि रामायणकथाधारेण निर्मितः। अत्र सप्ताङ्का, ३९३ श्लोकाश्च सन्ति।

(२३) विद्यानाथः।

अयं खलु तैलङ्गदेशीयः। प्रतापरुद्रयशोभूषणस्य कर्त्ता। प्रायः पीयूषवर्ष-समकालिक एव।

एवं विश्वनाथात्प्राचीनानामाचार्याणां कवित्वं कर्तृत्वं च विचार्य विश्वनाथीयः संक्षिप्तः परिचयोऽपि दीयते।

(२४) विश्वनाथः।

अयमुत्कलदेशीयः साहित्यदर्पणादिशास्त्रीयनिबन्धप्रणेता श्रीचन्द्रशेखरात्मजो नारायणदासस्य पौत्रः। उत्कलदेशीयत्वे—काव्यप्रकाशपञ्चमोल्लासे, कुरु-रुचिमिति पदयोर्वैपरीत्ये' इति प्रतीकमुपादाय प्रकाशदर्पणे 'वैपरीत्ये रुचिङ्कुरु' इति पाठः। अत्र चिङ्कुपदं काश्मीरादिभाषायामश्लीलार्थबोधकम्, उत्कलादिभाषायां 'धृतवांडकद्रव' इत्यादिविश्वनाथोक्तमेव प्रमाणम्। श्रीचन्द्रशेखरात्मजत्वे तु—

'श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम्।
साहित्यदर्पणममूं सुधयो विलोक्य
साहित्यतत्त्वमखिलं सुखमेव वित्त॥'

एष विश्वनाथरचितः श्लोकः एव प्रमाणम्।

विश्वनाथस्योत्तरकालीना आचार्याः

(२५) गोविन्दठक्कुरः।

अयं गोविन्दः ठक्कुरोपनामकः केशवात्मजः रुचिकरकवेः सापत्नभ्रातुः कनीयान् श्रीहर्षाख्यकवेर्ज्येष्ठो भ्रातेति ज्ञायते। अयं हि उदाहरणदीपिकाख्यमुदाहृतश्लोकव्याख्यानग्रन्थं काव्यादिग्रन्थं च रचयामासेति निश्चीयते। काव्यप्रकाशस्योपरि सर्वतो मूर्द्धन्या प्रदीपाख्या व्याख्याऽप्यस्यैव। यस्या व्याख्याया उपर्येव नागोजीभट्टैरुद्योतनाम्नी टीका सम्पादिता। काव्यप्रदीपारम्भसमाप्त्योः पर्यालोचने सर्वं पूर्वोक्तं सम्यक्तयाऽवगतं भवति। तथाहि तत्रारम्भे—

'सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविन्दो रुचिकरकवेः स्नेहपात्रं कनीयान्।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति॥ १॥

समाप्तौ—

'ज्येष्ठे सर्वगुणैः कनीयसि वयोमात्रेण पात्रे धियां
गात्रेण स्मरगर्वखर्वन(ण) परे निष्ठाप्रतिष्ठाश्रये।
श्रीहर्षे त्रिदिवं गते मयि मनोहीने च कः शोधये-
दत्राशुद्धमहो महत्सु विधिना भारोऽयमारोपितः॥ १॥

परिशीलयन्तु सन्तो मनसा सन्तोषशीलेन।
इदमद्भुतं प्रदीपं प्रकाशमपि यः प्रकाशयति॥ २॥

दीपिकाद्वितयं कन्ये प्रदीपद्वितयं सुतौ ।
स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दते ॥ ३ ॥' इति ।

काव्यमालाकर्त्रा म. म. दुर्गाप्रसादेन ह्येतद्विषये इत्थमुक्तम्—'अयं ठक्कुरोपनामको विद्वद्वर—श्रीगोविन्दो मिथिलायां श्रीरविकरवंशे जन्म लेभे इति तद्देशप्रसिद्धपञ्जीकारपुस्तकेषु समुपलभ्यते । अधुनापि गोविन्दवंशोद्भवा मिथिलान्तर्गत 'भटसीमरि'ग्रामे निवासन्तीत्यपि तत्पुस्तकेभ्य एव ज्ञायते । समयस्त्वनिश्चित एव । केवलमेतदनुमीयते यत्काव्यप्रकाशव्याख्या नरसिंहमनीषाभिधा ताराभक्तिसुधार्णवश्चेति ग्रन्थद्वयं नरसिंहठक्कुरप्रणीतमुपलभ्यते । स नरसिंहठक्कुरः १६६८ मिते विक्रमाब्दे निर्णयसिन्धुनिर्मातुः काव्यप्रकाशटीकाकर्त्तुश्च कमलाकरभट्टादर्वाचीन इति तद्ग्रन्थपर्यालोचनया प्रतीयते । एतेन नरसिंहः खिष्टताब्दीयषोडशशतकोत्तर भाग्भूतः स्यादिति । स च नरसिंहो गोविन्दात्पञ्चम इति गोविन्दोऽपि खिष्टाब्दीयपञ्चदशशतकोत्तरभागसद्भूतः स्यादिति । स च नरसिंहो गोविन्दात्पञ्चम इति गोविन्दोऽपि खिष्टाब्दीयपञ्चदशशतकोत्तर (१५००) भागासन्नकाले विद्यमान आसीदिति वक्तुं युज्यते' इत्यादि ।

(२६) अप्पयदीक्षितः ।

भारद्वाजगोत्रोत्पन्नः काञ्च्या निकटे 'अडपप्पल' ग्रामनिवासी वक्षःस्थलाचार्यापरसंज्ञकस्य आचार्यदीक्षितस्य पौत्रः रङ्गराजाध्वरिणः पुत्रः सर्वतन्त्रस्वतन्त्रोऽयं महामनीषी द्वासप्ततिवर्षपर्यन्तं जीवितः शतसंख्यकान् ग्रन्थान् रचयामास । उक्तञ्च स्वयमेव न्यायरक्षामणौ—

आसेतुबन्धतटमा च तुषारशैलादाचार्यदीक्षित इति प्रथिताभिधानम् ।
अद्वैतचित्सुखमहाम्बुधिमग्नभावमस्मत्पितामहमशेषगुरुं प्रपद्ये ॥'

चित्रमीमांसाया 'यथास्मत्कुलकूटस्थवक्षःस्थलाचार्यविरचितवरदराजवसन्तोत्सवे—

'काञ्चित् काञ्चनगौराङ्गीं वीक्ष्य साक्षादिव श्रियम् ।
वरदः संशयापन्नो वक्षःस्थलमवेक्षते ॥'

सिद्धान्तलेशसंग्रहान्ते—

'विद्वद्वरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसुनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलेरस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥'

जीवनादिविषये दीक्षितभ्रातुष्पुत्रनीलकण्ठविरचिते 'शिवलीलार्णव' प्रथमसर्गे चैवं प्रमाणमुपलभ्यते—

'कालेन शम्भुः किल तावताऽपि कलाश्चतुःषष्टिमिताः प्रणिन्ये ।
द्वासप्ततिं प्राप्य समान् प्रबन्धाञ्छतं व्यधादप्पयदीक्षितेन्दुः ॥'

अयं च विजयनगराधीश्वराणां 'चिन्नबोम्मनरसिंहदेव-वेङ्कटपतिराव'संज्ञकानां समकालिक आसीत् । तथा हि—

'हेमाभिषेकसमये परितो निषण्ण-सौवर्णसंहतिमिषाच्चिनबोम्मभूपः ।
अप्पय्यदीक्षितमणेरनवद्यविद्याकल्पद्रुमस्य कुरुते कनकालवालम् ।१

द्विर्भावः पुष्पकेतोर्विबुधविटपिनां पौनरुक्त्यं विकल्प-
श्चिन्तारत्नस्य वीप्सा तपनतनुभवो वासवस्य द्विरुक्तिः ।
द्वैतं देवस्य दैत्याधिपमथनकलाकेलिकारस्य कुर्व-
न्नानन्दं कोविदानां जगति विजयते श्रीनृसिंहः क्षितीन्द्रः ॥ २ ॥

अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।
नियोगाद् व्यङ्कटपतेर्निरुपाधिकृपानिधेः ॥ ३ ॥

एतानि च पद्यानि समरपुङ्गवदीक्षितस्य यात्राप्रबन्धे निजविरचितचित्रमीमांसायां कुवलयानन्दे च समुपलब्धानि भवन्ति । कुवलयानन्दसर्वप्रथमटीकाकर्त्तुर्वैद्यनाथस्य सत्ताकालः १६८३-१७११ ई० वर्षान्तोऽवसीयते । तथा चाप्पयदीक्षितस्य १५२०-१५९३ई० वर्षान्तो जीवनकाल इति सीतारामजोशी एम. ए. महोदयानां मतम् । १५५४-१६२६ ई० वर्षान्तोऽस्य जीवनकाल इति बङ्गभाषामये संस्कृतसाहित्यस्येतिहासे निर्दिष्टम् ।

अयं दीक्षितः स्वपितुः रङ्गराजाध्वरिणः सकाशादेव सर्वविद्या जग्राहेत्यनेकस्थलेषु 'तातचरणव्याख्यावचः ख्यापितान्' 'विद्वद्वरोर्विततविश्वजिदध्वरस्य' इत्यादिना स्वयमेव स्पष्टीकृतवान्। सिद्धान्तकौमुदीकर्त्ता भट्टोजिदीक्षितोऽस्मादेवैकस्माद् गुरोः शिक्षां गृहीतवानिति शब्दकौस्तुभे समुल्लिखितं विद्यते।

यद्यप्यनेन विदुषा शतसंख्याकास्ततोऽधिका वा ग्रन्था विरचिताः परन्तु तेषु 'वृत्तिवार्त्तिकिम्, चित्रमीमांसा, कुवलयानन्द'श्चेत्यलङ्कारशास्त्रग्रन्थत्रयम्। तत्र कुवलयानन्दो ग्रन्थः पीयूषवर्षकृतश्चन्द्रालोकालङ्कारप्रकरणस्य व्याख्यारूप एव। उक्तञ्चात्रैव—

'येषां चन्द्रालोके दृश्यन्ते लक्ष्यलक्षणश्लोकाः।
प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यन्ते॥' इति।

'चन्द्रालोको विजयतां शरदागमसंभवः।
रम्यः कुवलयानन्दो यत्प्रसादादभूदयम्॥' इति च।

अत्र चन्द्रालोको ग्रन्थः, चन्द्रस्य प्रकाशश्च। शरदागमाख्या व्याख्या शरत्कालागमनञ्च कुवलयानन्दो ग्रन्थः, कुवलयस्य कुमुदस्य चानन्द इति, श्लेषः।

अत्र कुवलयानन्दे पञ्चविंशत्यधिकशतमलङ्काराः। अस्य ग्रन्थस्य नव टीकाः समुपलभ्यन्ते। तास्वेका प्राथमिकी रामचन्द्रात्मजतत्सदुपाख्यवैद्यनाथेनालङ्कारचन्द्रिका निर्मिता। यथोक्तम्—

'असौ कुवलयानन्दश्चन्द्रालोकोत्थितोऽपि सन्।
प्रतिष्ठां लभते नैव विनालङ्कारचन्द्रिकाम्॥' इति।

(२७) पण्डिराजजगन्नाथः।

अयं तैलङ्गजनपदीयराजमहेन्द्रप्रान्ताभिजनो वाराणसीवास्तव्यो लक्ष्मीगर्भजः पितुः पेरुभट्टाज्ज्ञानेन्द्रभिक्ष्वादिभ्यश्चाधिगतविविधविद्यागमः। एतच्चैतत्कृतरसगंगाधरप्रारम्भतोऽवगम्यते। तथाहि—

'पाषाणादपि पीयूषं स्यन्दते यस्य लीलया।
तं वन्दे मेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्॥

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमनीयं
शेषाङ्कप्रातशेषामलभणितिरभूत्सर्वविद्याधरो यः॥' इति।

तत्कालीन-हस्तिनापुर्याः (दिल्लयाः) 'शाहजहाँ' नामकेन सम्राजा स्वकीयज्येष्ठात्मजस्य 'दाराशिकोहस्य' संस्कृताध्यापनाय निमन्त्रितस्तदर्थं तत्र गतवानयं महात्मा। अथैतत्सामयिकप्रकर्षपाण्डित्येन नितरां तुष्टो राजा 'पण्डितराज' इत्युपाधिदानेनैनं विभूषयामास। युवावस्थायां दिल्लीपतेरेवाश्रये जीवनं व्यतीत्यान्ते मधुपुर्यां (मथुरायां) स्वकीयां वसतिमकरोदयं पण्डितराजः। तथा चोक्तं स्वयमेव भामिनीविलासे—

'शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि सम्भाविताः
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः॥

सम्प्रत्युज्झितमासनं मधुपुरी-मध्ये हरिः सेव्यते
सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिपम्॥'

'दिल्ली' निवाससमय एव हि 'जगदाभरण'नामिका शाहजहाँपुत्र 'दाराशिकोहस्य' 'आसफ विलास' नामिकाऽपि दारासभासद 'नवाव आसफ खाँ, नाम्नश्च प्रशस्तिमुपनिबद्धवानयं महाभागः। एतदतिरिक्तरसगङ्गाधर-कुचमर्दनी-पीयूषलहरी (गङ्गालहरीसुधालहरी-अमृतलहरी-करुणालहरी-लक्ष्मीलहरी-यमुनावर्णन-चम्पू-रतिमन्मथनाटक-अश्वधा-टीकाव्य-प्राणाभरणकाव्य-भामिनीविलासादीनां प्रणयनञ्चकारेति विश्रुतमस्य पाण्डित्यम्।

तत्रालङ्कारमूर्धन्यग्रन्थे रसगंगाधरे यत्र तत्र शिष्टभाषया खण्डनं चकाराचार्यमम्मटसिद्धान्तानाम्, किन्तु कुवलयानन्दचित्रमीमांसादिकर्त्तुरप्पयदीक्षितस्य तु जातिगतं वैमनस्यमाधाय प्रतिपदं खण्डनं चकार पूर्णपाण्डित्यगर्वेण। यच्चकार

'कुचमर्दनीं' कृत्वा भट्टोजीदीक्षित 'मनोरमा' खण्डनं तत्तु प्रक्रिया-प्रकाशकर्त्तुर्वीरेश्वरगुरोर्मनोरमायां खण्डनं दृष्ट्वैव । यतः स्वयमेव तदारम्भे लिखितम्—

'नामं नामं घनश्यामं धामतामरसेक्षणम् ।
पण्डितेन्द्रो जगन्नाथः स्यति गर्वं गुरुद्रुहाम् ॥' इति ।

साहित्यशास्त्रस्य मर्मप्रकाशनं तु स्फुटतरं रसगंगाधरावलोकनेनैव भवतीति नाविदितं सहृदयधुरीणानाम् । तत्रादिरसनिरूपणावसरेऽभिनवसमीक्षा सर्वतो हृदयग्राहिणी ।

१६२८ खिष्टाब्दात् १६५७ खिष्टाब्दं यावत् 'शाहजहाँ, दिल्लीराज्यसिंहासने अधिष्ठित आसीदिति तदानीन्तन एवैतिहासिका अस्य स्थितिकालनिश्चयं कुर्वन्ति ।

एतेन प्रमुखालङ्कारिकाणां सामान्यपरिचयो दत्तः । इतरेषामिदानीं निर्देशमात्रमेवाधोलिखितक्रमेणावगन्तव्यम् । तत्र (१) राजशेखरः (९१० ई०) । अस्य काव्यमीमांसायां कविशिक्षाया एव प्रधानविषयः प्रतिपादितोऽस्ति । (२) रामचन्द्र-गुणचन्द्रयोः (द्वादशशतकपूर्वार्धस्थितयोः) सम्मितकृतिर्नाट्यदर्पणस्य । तत्र नाटकाङ्गानामुपादेयवर्णनमस्ति । (३) शारदातनयः (१३ शतकस्थितः) एतत्कृतनाट्यशास्त्रग्रन्थो भावप्रकाशनाख्यः । इह दशाधिकरणेषु रसभावयोः पूर्णरोचकरूपेण वर्णनमस्ति । एतदतिरिक्तविद्याभूषण-विद्यानाथ-विश्वेश्वरपण्डिताच्युतराय-प्रभृतीनामलङ्कारशास्त्रस्य ग्रन्थाः सन्ति । अलङ्कारशास्त्रविषये ग्रन्थलेखनस्य प्रवृत्तिरीर्स्वी (१ ई०) प्रारम्भकालादारभ्याष्टादश (१८ ई०) पर्यन्तं येन केनापि रूपेण जागरूकासीदित्यवगन्तव्यम् ।

अलङ्कारशास्त्रप्रणेतारः

अभिनवगुप्तः ।

अभिनवभारत्याख्य भारतीयनाट्यशास्त्रव्याख्या-नाट्यलोचन-ध्वन्यालोकलोचनप्रभृतिनानानिबन्धनिर्माता महामाहेश्वराचार्यवर्योऽभिनवगुप्तपादः कश्मीरेषु बभूव। अस्याचार्यवर्यस्य विषये बहु वर्णयित्वाऽधुना **लोचनं** प्रकृत्य विशिष्टमुच्यते—इदं लोचनं ध्वन्यालोकाय लोचनीभवद् वादिनामपि हृदयदर्पणोऽभूत्। मन्ये तत एव मत्सरतया ध्वनिनिरासाय प्रवर्तमानोऽपि **महिमा** ध्वनिकारे सगौरव एव। किंबहुना, आलोकेन ध्वनिषु विपर्याससंदेहाज्ञानतिमिरोत्करे कवलितेऽपि लोचनसाचिव्येनैव प्रतिभानम्। इत एव द्वितीयोद्योताद् रसस्वरूपे मतभेदसिद्धान्ता मम्मटाचार्येण गृहीताश्चेति स्फुटं सर्वेषाम्।

लोचनस्य प्रारम्भे—

'अपूर्वं यद् वस्तु प्रथयति विना कारणकलां
जगद्भावप्रख्यं निजरसभरात्सारयति च।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति त-
त्सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयतात्॥'

इति। पर्यन्ते तु—

'किं लोचनं निरालोको भाति चन्द्रिकयापि हि।
तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्॥'

इति । श्रीमदभिनवगुप्ताचार्यपादैः प्रणीताः प्रत्यभिज्ञादर्शनानुसारिणो ग्रन्थास्त्वेते—(१) प्रत्यभिज्ञाविमर्षिणी बृहती वृत्तिः, (२) प्रत्यभिज्ञाविमर्षिणी लघुवृत्तिः, (३) तन्त्रालोकः, (४) तन्त्रसारः, (५) परमार्थसारः, (६) मालिनीविजयवार्तिकम्, (७) अनुत्तराष्टिका, (८) क्रमस्तोत्रम्, (९) तन्त्रवटधानिका, (१०) देहस्थदेवताचक्रस्तोत्रम्,(११) परमार्थचर्चा, (१२) परमार्थद्वादशिका, (१३) परात्रिंशिकाविवरणम्, (१४) प्रकरणस्तोत्रम्, (१५) बोधपञ्चदशिका, (१६) महोपदेशविंशतिः, (१७) भैरवस्तोत्रम्, अभिनवगुप्तेन स्वरचनानां विषये—

स्पष्टयुक्तम्—

"तरत तरसा संसाराब्धिं, विधत्त परे
पदे पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ॥"

विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तः समुत्प्लवदायिनम् ॥"

इति तत्पादपयोपजीवि—राजानकश्रीक्षेमराजाचार्यपद्यतोऽवधार्यम् । श्रीमदभिनवगुप्तस्थितिकालस्तु—

'इति नवतितमेऽस्मिन्वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधि(४११५) स्थे मार्गशीर्षावसाने ।'

इति तट्टीकेयं बृहत्प्रत्यभिज्ञाविमर्षिणीपद्यतोऽवगम्यते । तस्य मातापितरौ **विमला-नरसिंहगुप्ता**वित्यादि तदीयग्रन्थटीकाटिप्पणीभ्योऽवसीयते ॥

आनन्दवर्धनः ।

आलोकादिविविधसंदर्भरचयिता राजानकसंज्ञकब्राह्मणकुलोत्पन्न आनन्दवर्धनाचार्यः कश्मीरेषु बभूव । अयं कारिका-वृत्तिविभक्त**मालोकाख्यं** ध्वनिप्रतिपादकं प्रबन्धं निर्ममे । येन च विशिष्यमाणा काव्यमीमांसा परां दर्शनकोटिं निन्ये । सोऽयं काव्यसंसारलोक आलोको ध्वनिप्रदर्शकतया **ध्वन्यालोकनाम्नापि**

राजशेखरादिभिर्व्यवह्रियते । वस्तुतस्तु आलोकाद् ध्वनिकारिकात्वेन व्यवहार्या मूलकारिकाभिन्नकर्तृका एव ।यद्यपि ध्वनिकारिकाकारस्य नाम नोपलभ्यते, तथापि आलोकव्याख्यातु**र्लोचन**निर्मातुरुक्तिभिर्ध्वन्यालोकयोः पार्थक्यव्यवहारो विविक्तः । तथाहि—'अत एव मूलकारिका साक्षात्तन्निराकरणार्था न श्रूयते । वृत्तिकृत्तु निराकृतमपि प्रमेयसंख्यापूरणाय कण्ठेन तत्पक्षमनूद्य निराकरोति' इत्येवमादयो लोचनोक्त्यः । एवं पार्थक्ये सत्यपि यदि काश्चन कारिका वृत्तिकृता आनन्दवर्धनाचार्येण परिष्कृता वर्धिता वा भवेयुर्यन्मूलकश्च ध्वन्यालोक इत्यविविक्तो व्यवहारः प्रथत इत्यपि सम्यगालोच्यते समालोचकैः ।

आलोकस्य चत्वार उद्योताः । तत्र प्रथमे ध्वनिमतभेदप्रदर्शनपूर्वकं ध्वनिस्थापनम्, द्वितीये अविवक्षितवाच्यप्रभेदनिरूपणम्; तृतीये अविवक्षितवाच्यप्रभेदनम्; चतुर्थे ध्वनिव्युत्पादनप्रयोजनान्तरम् । अत्र ध्वनिकारिकायाः प्रारम्भः—'काव्यस्यात्मा ध्वनिरिति—'(छा. १७ पृ.) इति. समाप्तिः—'प्रतायन्तां वाचो निमितविविधार्थातरसा न वादः कर्तव्यः कविभिरनवद्ये स्वविषये । परस्वादानेच्छाविरविविधार्थामृतरसा न वादः कर्तव्यः कविभिरनवद्ये स्वविषये । परस्वादानेच्छाविरतमनसो वस्तु सुकवेः सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥' इति । एवमालोकस्यापि प्रारम्भसमाप्ती द्रष्टव्ये । ध्वनिग्रन्थस्य कारिकात्मकस्य सवृत्तेः, अर्थात् ध्वन्यालोकस्योपरि सहृदयालोकापरसंज्ञं **लोचन**—नामकं प्रौढतरं व्याख्यानमस्ति । तत्र लोचनमिति नामकरणे ध्वन्यालोकस्य **चन्द्रिकाख्या** व्याख्या बीजम् । उक्तं च लोचने—किं लोचनं विना लोको भाति चन्द्रिकयापि हि ।' इति । इमानि ध्वन्यालोकलोचनानि **मम्मटस्य** प्रतिभारूढानि काव्यप्रकाशस्य सर्वोत्कृष्टत्वे बीजमजनि । यत्रकाशेऽनेकेऽलंकारनिबन्धाश्चकाशिरे । आनन्दवर्धनाचार्यस्य समयस्तु—

'मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः ॥'

इति कह्लणस्य राजतरङ्गिणीश्लोकेन (५/३९) अवन्तिवर्मसमकालिकः। अवन्तिवर्मणो राज्यं ८५५ खिस्ताब्दात् ८८४ खिस्ताब्दपर्यन्तं सुप्रसिद्धम्।

उदयनः।

न्यायवार्तिकतात्पर्यपरिशुद्धि-किरणावल्यादिग्रन्थरचयिता न्यायाचार्यपदाङ्कित उदयनाचार्यो मिथिलामण्डले गौडमण्डले वा बभूव। सोऽयं प्रशस्तपादाचार्यप्रणीतस्य पदार्थधर्मसंग्रहस्य न्यायकन्दल्याख्यटीकाकाराद् भट्टश्रीधराद् अधस्तनस्तत्समानकालिको वेति कन्दलीकिरणावल्योः संवादेनावधार्यते। कन्दलीनिर्माणकालस्तु—

'त्र्यधिकदशोत्तरनवशत (९१३) शाकाब्दे न्यायकन्दली रचिता। श्रीपाण्डुदास्ययाचितभट्टश्रीश्रीधरेणैषा॥'

इति। अर्थात् ९१३ + ७८ = ९९१ खिस्ताब्दः। **गोवर्धनाचार्य** आर्यसप्तशत्यन्ते स्वशिष्यत्वेन सादरमुदयनं स्मरति—

'उदयन-बलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे।
द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्मलीकृत्य॥'

इति। गोवर्धनश्च वङ्गाधिपतेर्लक्ष्मणसेनस्य सभायां विद्वत्पञ्चरत्नेष्वन्यतम आसीद् इति तस्यैव सभासद्मनि शिलायामुत्कीर्णादस्माच्छलोकाज्ज्ञायते—

'गोवर्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥'

स बल्लालसेनसूनुर्लक्ष्मणसेनस्तु खिस्तैकादशशताब्द्याश्चरमभागपर्यन्तं वङ्गानशात् वङ्गमैथिलप्रसिद्धो लक्ष्मणसेनभूभुजः संवत्सरोऽपि यस्य त्रिंशदधिकसहस्र (१०३०) शकशताब्द्याम्, अर्थात् ११०८ खिस्ताब्दे प्रवृत्तिर्बभूव।

एवं च श्रीधराद् उदयनस्य अधस्तनत्वे उदयनगोवर्धनादयः समानकालिकाः सिद्ध्यन्ति। तत्र **जयदेवो गीतगो**विन्दकारो न तु प्रसन्नराघवनाटकाकारः, मातापित्रोः

कालस्य च भेदात्। जयदेवेन गीतगोविन्दे स्वसमानकालिकाः कवयोऽस्मारिषत—

"वाचः पल्लवयत्युमापतिधरः, संदर्भशुद्धिं गिरां
जानीते जयदेव एव, शरणः श्लाघ्यो दुरूढद्युतेः।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोपि न, विश्रुतः श्रुतधरो, धोयी कविक्ष्मापतिः॥"

कालिदासः।

आसीत् कश्चित् कालिदासो नाम यशस्वी। यश्चिराय भारते लक्ष्यभूतोऽभूत्। तत एव श्रीपुलकेशिनः शिलालेखेऽन्ते—

'येनाऽयोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्तिः कविताश्रितकालीदासभारविकीर्तिः॥'

इत्युदटङ्कि स च शिलालेखः ३१७९ + ५५६ = ३७३५ इयति कलिगते ५५६ शालिवाहनीये शके, अर्थात् ५५६ + ७८ = ६३४ ख्रिस्ताब्दे उत्कीर्ण इति प्रागपि दर्शितम्। अथ स्वगुणगरिम्णा रामविक्रमभोजादिशब्दात् कालिदासशब्दोऽपि व्यक्त्यन्तरेषु संक्रान्तः। तथा च—

'एकोऽपि जीयते हन्त कालिदासो न केनचित्।
शृङ्गारे ललितोद्गारे कालिदासत्रयी किमु॥'

इति महाकविराजशेखरसूक्तिः। तथा—

'हालेनोत्तमंपूजया कविवृषा श्रीपालितो लालितः,
ख्यातिं कामपि कालिदासकवयो नीताः शकारातिना।
श्रीहर्षो विततार गद्यकवये बाणाय वाणीफलं,
सद्यः सत्क्रिययाभिनन्दमपि च श्रीहारवर्षोऽग्रहीत्॥'

इति रामचरितीयाभिनन्दसूक्तिश्च पप्रथे। इतो ध्वनिकारः—'कालिदास-प्रभृतयो द्वित्राः पञ्चषा वा महाकवयः' इति। काव्यप्रकाशकारः—'कालिदासादीनामिव यशः' इति चावोचत। एवमन्येऽपि कालिदासं पुरस्कुर्वन्ति। एतेन कालिदासस्यानेकत्वम्, तत्कृतीनामनेकत्वं तु रघुवंशादितः प्रत्यक्षम्। एवं च कस्य कतमा कृतिरिति निर्णयो प्रमाणभावे कथं जायेत? एकस्यैव सर्वा कृतिरित्यपि कालिदासानेकत्वे कथं संगच्छेत्? अभिनन्दसूक्तौ कालिदासकवय इत्यादरार्थक-बहुवचनस्वीकारेऽपि राजशेखरात्प्राक् कालिदासत्रयीति कथं संघटेत? इत्येवं विप्रतिपत्तौ प्रतिविधीयते—तत्र रघुवंश—कुमारसंभवयोरेकर्तृकतायां न मनागपि संशयावसरः, एतयोर्बहुत्र श्लोकवाक्यपदांशानामैकरूप्यात्॥ तथाहि—

रघौ—	कुमारे—
(१) धनुष्यामोघं समधत्त सायकम् (३।५६)	(१) धनुष्यमोघं समधत्त बाणम् (३/६६)
(२) ततस्तदालोकनतरत्पराणां सौधेषु चामीकरजालवत्सु। बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकर्माणि विचेष्टितानि॥ (७/५)	(२) तस्मिन्मुहूर्ते पुरसुन्दरीणा मीशानसंदर्शनलालसानाम्। प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि॥ (७/५६)
(३) (७/६—११ श्लो.)	(३) (७/५७—६२ श्लो.)

अलङ्कारशास्त्रस्य सम्प्रदायाः

अलङ्कारशास्त्रग्रन्थानुशीलनेनायमवगतो भवति यत्तत्रानेके सम्प्रदाया आसन्। 'काव्यस्य क आत्मा' इत्यस्मिन् विषये एवालङ्कारिकाणां समक्षे प्रधानतया विवेचनीयं कर्त्तव्यमासीत्। किमिदं तादृशं वस्तु विद्यते यद्विद्यमाने काव्ये काव्यत्वं तिष्ठति तद्रहिते च तदपसरतीति जिज्ञासामवलम्ब्य स्वस्वबुद्ध्यनुसारेणोत्तरदान एव नानाविधसम्प्रदायानामुत्पत्तिरभूदिति समालोचयन्त्यैतिहासिककुशलाः। उक्तजिज्ञासानिवृत्तये एव केचिदलङ्कारं केचिद्रीतिं केचिच्च ध्वनिं काव्यात्मत्वेन प्रमाणयन्ति। भरतमुनित आरभ्य कालक्रमेण समीक्षाभेदे विभिन्नशताब्दीषु बहूनां सम्प्रदायानामुत्पत्तिर्जाता। तथा चेदानीं यावत्प्रसिद्धिमुपगता केवलं प्रतमाः षट्सम्प्रदायाः—

१—भरतमुनेः रससम्प्रदायः।

२—भामहोद्भटरुद्रटानाम् अलङ्कारसम्प्रदायः।

३—दण्डिवामनयोः (रीति) सम्प्रदायः।

४—कुन्तकस्य वक्रोक्तिसम्प्रदायः।

५—आनन्दवर्धनाभिनवगुप्तयोर्ध्वनिसम्प्रदायः।

६—क्षेमेन्द्रस्य-औचित्यसम्प्रदायः।

अलङ्कारसर्वस्वटीकाकर्त्रा समुद्रबन्धनेनाप्युक्तरूपेणैव सम्प्रदायोदयः प्रदर्शितः। तथा चोक्तं तेन—

'इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन वेति त्रयः स्फुटा विचारधाराः। आद्येऽप्यलङ्कारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भाटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन।'

षष्ठसम्प्रदायाविष्कर्त्ता क्षेमेन्द्रः खल्वेतत्परवर्त्त्यतस्तन्मतमेतेन न प्रदर्शितमिति सुविचारकैः स्वयमेवोहनीयम्। तत्र यथाक्रमम्—

(१) रससम्प्रदायः

'रस' शब्दस्योल्लेखः कृतो वर्त्तते सोमरसस्यार्थे—'दधानः कलशे रसम्' (९/६३/१३ ऋग्वेदे) आनन्दार्थोऽपि—'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति' (११/७/१ तैत्तरीयापनिषदि)। यद्यपि वैदिकसाहित्ये रसादिशब्दानामुल्लेखोऽवश्यं दृश्यते किन्तु साहित्यिकसम्प्रदायरूपे चैतत्स्वरूपनिश्चयकरणे सर्वप्रथमं श्रेयोभागिनं नाट्यशास्त्रकर्त्तारं भरतमुनिमेव स्वीकुर्मोवयम्। राजशेखरेण (९१० ई०) तु सर्वप्रथमं रसस्योपदेशो ब्रह्मणा नन्दिकेश्वराय प्रदत्तः इति प्रतिपादितः, परन्तु तत्प्रतिपादितरससिद्धान्त अद्यावधिन् प्राप्यते।

प्रो. जेकोबी महाशयेन ई० पू० षष्ठशतके वाल्मीकीयरामायणस्य समयो निर्धारितस्तन्मतानुसारेणापि भरतमुनेः पूर्वं वाल्मीकीयरामायाणस्य विद्यमानत्वमवश्यं मन्तव्यम्।

तत्रत्यबालकाण्डस्थ (२/९)

'रसैः श्रृङ्गारकरुणरौद्रवीरभयानकैः।'

इति पद्येनाष्टरसानामुल्लेखो वर्त्तते, इति भरतादेव कथमुल्लेख इति शङ्काऽत्र न भवितुं युक्ता, वाल्मीकीयरामायणादिकाण्डस्थबहूनां श्लोकानां प्रक्षिप्तत्वेनैव स्वीकरणात्। एवं सत्यपि—**'निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः।' (१४/२७)**

'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥'(१/५)

'अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुगतः। तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श। आकस्मिकप्रत्यवभासां च देवीं वाचमव्यक्तमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत्।

कालिदासस्य रघुवंशे ध्वनिकारस्य ध्वन्यालोके भवभूतेरुत्तरचरिते च यथाक्रममुपरितनक्रौञ्चवधस्योपलम्भाद् वाल्मीकीयरामायणबालकाण्डस्थ २/४० श्लोकः 'शोकः श्लोकत्वमागतः' इति तु पूर्णतः सम्यगेव तथासति आदिकाव्यस्योदयः करुणरस एव सञ्जात इत्यत्र न मनागपि संशयावकाशः।

वस्तुतस्तु रसपरम्परायाः प्राचीनतायां न कापि विप्रतिपत्तिः। स्वयं भरतेनैव नाट्यशास्त्रषष्ठाध्याये—

'एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना।

इत्यादिना पूर्वाचार्याणां विचाराः प्रकटिताः। परम्पराया उल्लेखोऽपि तत्रैव 'अथानुवंश्ये आर्य भवतः' अथवा 'श्लोकौ भवतः' इत्यादिना स्पष्टरूपेण कृतः।

अथ कोऽयं रस इति जिज्ञासायां 'काव्यपठनेनाथवा श्रवणेनाथ चाभिनयदर्शनिन यादृश आनन्दो भवत्यस्मादृशां स एवानन्दो 'रस' इति सार्वजनीनानुभवः। कानि साधनानि सन्ति यानि रसं निष्पादयन्तीति चेत्? विभावानुभावव्यभिचारिसंयोगादिभिस्तन्निष्पादनस्य प्रतिपादितत्वात्। तथा च भरसूत्रम्—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति। इदमल्पाकारमप्यनेकव्याख्याकर्तृणां तर्कमूलिकां हृदयङ्गमां सारभूतां युक्तियुक्तां व्याख्यामवलोक्यातिमहत्वाधायकमित्यामनन्ति सर्वे। साम्प्रतिकोपलब्धरससिद्धान्तमूलसूत्रमिदं वर्त्तते। यादृशं च भरतनाट्यशास्त्रषष्ठसप्तमाध्यायमध्ये रसभावयोर्निरूपणं दृश्यते न तादृशमन्यत्र क्वचनेति सर्वे सुधियः समामनन्ति।

अथ के ते विभावादय इति चेत् ? शकुन्तलानाटके प्रथमदृश्यदर्शने रङ्गमञ्चे चागत्य दुष्यन्त आश्रमपादपान् सिञ्चन्तीं शकुन्तलां पश्यति । शकुन्तला च प्रकृत्या लावण्यवती, सा हि यदा घटमुत्थाप्य नवमल्लिकां जलं पाययति तदा तदङ्गनामाकुञ्चनप्रसारणे भवतः, येन तस्याः सौन्दर्यमत्यधिकं वर्धते । मुखसौरभलोलुपा भ्रमरास्तां लतामिव परिचिन्त्य भृशमाघ्रातुमाक्रमन्ति, ततस्त्रस्ता सा इतस्ततो धावति कम्पिते नेत्रे परितः सञ्चारयति । दुष्यन्तश्चैनामेवंविधामवलोक्य नितरामाकर्षितो भवति । महर्षिकण्वाश्रमस्यैकान्तोपवनं तथा मालिनीतीरादिकमपि स्वदर्शनेन दुष्यन्तस्य मानसे शकुन्तलां प्रति रतिभावमभिव्यज्य तं शृङ्गाररूपे परिणमयितुं हेतुर्भवति । एवञ्च दुष्यन्तमनसि रसाभिव्यक्तिः सञ्जायतेऽतो दुष्यन्तः शृङ्गाररसस्यास्वादकर्त्ता रतिभावस्याश्रयो वर्त्तते । एतद्भावस्य रसरूपे परिणमयितुं शकुन्तलैव प्रमुखसाधनम्, किन्तु अनेन साकं शकुन्तलायाश्चेष्टास्तथा तद्दृश्यस्य देश-कालादयोऽपि सहायतां कुर्वन्ति । उभावप्येतौ 'विभाव' इत्युच्यते । शकुन्तला चालम्बनं दुष्यन्तरतिभावस्य देशकालादयश्चोद्दीपनानि ।

यदा दुष्यन्तस्य मनसि रतिभावस्याविर्भावो भवति तदा तच्छरीरे प्रसन्नतादयो बह्व्यश्चेष्टाः समुत्पद्यन्ते ता एव पश्चाद्भावित्वेनानुभावत्वंप्राप्नुवन्ति । एतादृशी रतिर्भावानुभूतेरनन्तरं समुत्पद्यते अथवा तादृश 'भाव'स्यानुभवं सामाजिकान् कारयतीति भवति पश्चाद्भावित्वम् ।

दुष्यन्तस्य शकुन्तलां प्रति समुत्पन्ने रतिभावे स कदाचिद्विचारयतीयमृषिपुत्रीति तथासति नेयं परिणययोग्या, ततो निराशायाश्चिन्तायाश्चानुभवं करोति । कदाचित्तस्य स्वमनसि विश्वासो भवति, ततः शकुन्तलेयं विश्वामित्रपुत्रीवृत्तान्तं श्रुत्वातिप्रमोदस्तथाऽऽशायाः सञ्चारो भवति यत्—'असंशयं क्षत्रपरिग्रहक्षमा' इत्यादिना । एतत्पूर्वमेतस्मिन्नुत्सुकता भवति । एवञ्चैताः समस्ता भावानुभूतयः अस्थायिभावाः सन्ति ये किञ्चित्कालमेव तिष्ठन्ति पुनर्दूरे भवन्ति । एकक्षणिको भाव उत्तिष्ठति लुप्तो भवति, द्वितीय उत्तिष्ठति लुप्तो भवति, जलबुद्बुदवत् । अनेन प्रकारेणैकस्थायिभावे कियन्तोऽत्यल्पभावाः संञ्चरणं कुर्वन्ति । एते च भावाः स्थायिभावस्य सहकारिकारिणः सन्ति । तादृशी चैवेतेषां स्थितिर्यादृशी समुद्रे

तरङ्गोदयावसानानाम्। समुद्रस्थानीयः स्थायी भावः। तरङ्गस्थानीयश्च सञ्चारिभावः। यत एते भावाः क्षणिकास्तथा अस्थिरा अतः सञ्चारिणो व्यभिचारिणो वा व्यपदेशभाजो भवन्ति। गणनायामेते च सञ्चारिणस्त्रयस्त्रिंशद्भेदाः।

इत्थञ्च भाव एव रसस्य बीजं मूलरूपमित्युपलब्धं भवति। तत्र क्व तिष्ठति भावः किञ्च स्वरूपमेतस्येति चेत्? सहृदयसामाजिकानां हृदये तिष्ठत्ययं भावः। प्राक्तनजन्मनः संस्कारस्वरूप एव। आधुनिकमनोविज्ञानपद्धत्या भावो हि मानवमानसस्यार्धचेतनभागेऽथवाऽवचेतनभागे प्रच्छन्नस्तिष्ठति। यदा वयं काव्यनाटकादौ तत्तद्भावानां चित्रणं पठामो वा पश्यामस्तदा प्रच्छन्नास्ते भावा समुद्बूय चेतनमनस्तरङ्गेषु समुत्पन्ना भवन्ति। एत एव भावाः काव्येषु वर्णितविभावादिद्वारा पुष्टीभूय रसरूपे परिणता भवन्ति। एते च चेतनाचेतनरूपमानसं किञ्चित्कालपर्यन्तमेकीकृत्य तन्मध्यगतां यवनिकामपहृत्यास्मद्धृदयस्य तच्चरमसोपानसीमापर्यन्तं प्रापयन्ति यत्र वयं मनोराज्ये विचरणं कुर्मः तत्र केवलमानन्द एवानन्दो वर्त्तते, भारतीयरसशास्त्रिणां मते चानन्दोऽयं 'रस' संज्ञया व्यपदिश्यते, लौकिकः सन्नप्यलौकिक एवायम्। तथा दिव्यरूपो ब्रह्मास्वादसहोदरश्चेति।

उक्तभरतसूत्रस्य बहवो व्याख्यातारः सञ्जाताः। तेषु चत्वार एव सर्वतः प्रधानाः। तेषां 'भट्टलोल्लट-शंकुक-भट्टनायक-अभिनवगुप्तपाद'नामानि सर्वसम्मतानि। रससम्प्रदायश्चैतेषामेव मतमादाय साम्प्रतं प्रचलति। तत्र—

(१) भट्टलोल्लटस्योत्पत्तिवादः

अभिनवगुप्तपादाचार्येण स्वकीयाभिनवभारत्यां भट्टलोल्लटसंम्मतः पक्षः प्रस्तुतः। अनेनैव सम्भाव्यते यदेतेनापि नाट्यशास्त्रस्योपरि काचिद्व्याख्या निर्मिता या साम्प्रतं नोपलभ्यते।

रससूत्रस्योपरि अयमेव सर्वप्रथमो व्याख्याता। एतेन हि 'संयोगात्' इत्यस्य 'कार्यकारणभावरूपसम्बन्ध' इत्यर्थः, 'निष्पत्ति'रित्यस्य 'उत्पत्ति'रित्यर्थः' प्रदत्तः। एतस्य समयादिकं सम्यङ् न ज्ञातुं शक्यते तथापि 'लोल्लट' इतिनाम्ना प्रतीयते यदयं काश्मीरनिवासी। व्यञ्जनावादध्वनिवादयोरुदयानन्दतरमेवैतत्समयः। यदि

ध्वनिकारः आनन्दवर्धनादिभ्नस्तदा लोल्लटो ध्वनिकार-आनन्दवर्धनयोर्मध्यसमये एवोत्पन्नः, अन्यथा आनन्दवर्धनस्य समसामयिकः। एवञ्च ईस्वीयनवमशताब्द्यामयमासीदिति निर्णेतुं शक्यते।

रसस्य स्थितिश्च लोल्लटानुसारं रामाद्यनुकार्ये न तु नटेषु सहृदयेषु वा। अयमासीन्मीमांसकोऽभिधावादी च। समस्तकाव्यार्थस्य साधनमभिधाशक्तिरेवेति स्वीकृतवान्। एतस्य मतमासीद् यच्छब्दस्य प्रत्येकार्थप्रतिपत्तिरभिधयैव तथा भवति यथा एक एव बाणः कवचं निर्भिद्य शरीरं प्रविश्य प्राणानपहरतीति। एतन्मतं मम्मटो ह्येवमुद्धृतवान्—'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इति। विश्वनाथेनाऽप्येवमेवक्तम्। लोल्लटमतस्य प्रभावो हि दशरूपककार 'धनञ्जय'स्यावलोककार' धनिक'स्याऽप्युपरि स्पष्टरूपेण दृश्यते।

अथैतन्मतसारांशः—

(१) स्थायीभावस्य सूत्रे उल्लेखो नास्ति किन्तु मतेऽस्मिन् तस्य रसमूलरूपेण पृथगुल्लेखः कृतः। स्थायीभावेन सह संयोगः स्वीकृतः।

(२) अयं च स्थायीभाव आलम्बनविभावेभ्य उत्पन्नो भवति (अत एवैनमुत्पत्तिवादनाम्ना व्यवहरन्ति) एवं व्यभिचारिभावैः पुष्टीभूय अनुभावद्वारा व्यक्तीभूयानुकार्ये रसरूपेण संसरति। सूत्रस्थ 'निष्पत्ति' रित्यस्योत्पत्तिरर्थ इत्युक्तमेवोपरिष्टात्।

(३) नटे नायं स्थायीभावस्तिष्ठति किन्तु रूपसमानताया विद्यमानत्वेन तत्र (नटे) एतस्यारोपो भवति, अत एवैनमारोपवादमपि प्रतिपादयन्ति साहित्याचार्याः।

(४) अभिनयकुशलतयाऽऽरोपितः स्थायीभावः सामाजिकेषु चमत्कारहेतुः सञ्जायते। नटस्यानुकृतिसफलतयोत्पन्नः सामाजिकमनसि चमत्कारजन्य आनन्दात्मकरसो निष्पद्यते।

समीक्षा—स्थायीभावस्य भरतसूत्रे पृथगुल्लेखो न वर्त्तते। भरतेन हि रसात्पृथक्स्थायिभावो न स्वीकृतः, अत एव स्वसूत्रे तदुल्लेखो न कृतः। इदं च

तादृशं वस्तु नास्ति यत्पूर्वमपुष्टरूपेण विद्यमानं सत् पश्चात् पुष्टीभूय रसरूपं धत्ते। विभावादिकं विना मूलाश्रये स्थायीभावो भवितुमेव नार्हति कुतः पुनस्तेन पुष्टिः ?

मतेऽस्मिन् द्वितीयो दोष एवमापतति यत्स्थायीभावोऽयं न कार्यरूपः। यदि कार्यरूपः स्यात्तदा निमित्तकारणक एव स्यात्। तथा च सति निमित्तकारण समाप्तौ घटादिकं कार्यं स्वात्मना तिष्ठति किन्तु न ह्येवं तथा, विभावादिनष्टे सति रसोऽपि न तिष्ठति। अत एव न विभावादिः कारकहेतुर्न वा जनकहेतुः। पूर्वमविद्यमानत्वान्न ज्ञापकहेतुरपि। रस उत्पद्यते इति यद्येतन्मतं तर्हि दर्शके केन प्रकारेण संक्रमितो भवति ? रतिर्यत्र तिष्ठेत्तत्रैव रसोऽपि भवितुं युक्तः, कार्यकारणयोरेकाधिकरणवृत्तित्वनियमात्। यदि दुष्यन्ते शकुन्तलाविषयिणी रतिस्तदा सामाजिके रसः कथमुत्पद्येत ? अनुकरणसफलतया भविष्यतीति चेत् ? अनुकार्यावलोकनाभावेनानुकरणस्य साफल्यं वैफल्यं वा कथं वक्तुं कोऽपि प्रभवेत् ? अनुकार्योऽस्मदृष्टिगोचरात्परः। अनुकर्त्तरि तस्यारोपो भवति। आरोपितो रसो दर्शकेषु कथं चमत्कारमुत्पादयेत् तत्राधारत्वस्य मिथ्यात्वं स्पष्टमेव प्रतीयेत। अनुकार्ये रसस्वीकारे सीमितो रसः स्यात्, न चेष्टापत्तिस्तस्यापरिमितत्वात्। एष एव आशयः एतद्ग्रन्थकृता विश्वनाथेनाऽप्युक्तः—

'पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्॥' इत्यादि।

(२) श्री शङ्कुकस्यानुमितिवादः।

अभिनवभारत्यामेव श्रीशङ्कुकस्यापि मतोल्लेखो विद्यते। एतज्जन्मस्थानादिविचारणायां काश्मीरनिवास्येवेति निर्णीयते। सम्भवतो लोल्लटसमकालिक एवायम्। राजतरङ्गिणीमतानुसारेण शङ्कुकः 'भुवनाभ्युदय' नामकं काव्यं निर्मितवानित्यवगम्यते। तदनुसारेणायं काश्मीरराज 'अजितापीड' राज्यकाले चासीदिति विमृश्यते। तथा हि—

'अथ मम्मोत्पलकयोरुद्भूद्दारुणो रणः ।
रुद्रप्रवाहा यत्रासीद् वितस्ता सुभटैर्हतैः ॥

कविर्बधमनःसिन्धुशशाङ्कः शङ्कुकाभिधः ।
यमुद्दिश्याकरोत्काव्यं भुवनाभ्युदयाभिधम् ॥'

(राजत. ४,७०३—४)

शाङ्र्गधरपद्धतौ सूक्तिमुक्तावल्यां च मयूरस्यात्मजः शङ्कुक इति लिखितमस्ति । निम्नलिखितपद्यं च तन्नाम्ना उद्धृतं कृतमस्ति ।

'दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽप्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् ।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत् कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥'

'मयूरशतक'स्य निर्माता यद्ययमेव तदा सप्तशताब्दाः काल एतस्य । किन्तु नाट्यशास्त्री शङ्कुक एतस्माद्भिन्नः । अनुमितिवादप्रतिष्ठापकस्तथा भुवनाभ्युदयकाव्यकर्त्ता एक एव यस्य स्थितिकालः नवमशताब्द्यां वर्त्तते ।

अनेनाऽपि भरतनाट्यशास्त्रस्योपरि कापि व्याख्या निर्मिता भवेदिति तत एव प्रतीयते । 'अनुमितिवाद' नाम्ना भरतसूत्रव्याख्या चैतस्य प्रसिद्धा । अयं च नैयायिकः सन् विभावादिसाधनेषु रसरूपसाध्येषु चानुमाप्यानुमापकभावं दर्शयति । यथा पर्वते धूमं दृष्ट्वा 'पर्वतोऽयं वह्निमान् यतो धूमवान्' एतत्परामर्शद्वारा पर्वते वह्निस्थितेरनुमितिस्तथैव नटे रामादिवदनुभावादिकं दृष्ट्वा सामाजिकास्तत्र रसस्थितिमनुमिन्वन्ति । एवञ्च रसोऽनुमेयोऽनुमितिगम्यो वेति श्रीशङ्कुको मनुते । अथ चैतदतिरिक्तां 'चित्रतुरगादिन्याय'स्य विचारंमनासे करोति । एतद्विमर्शानुसारेण नटो न वास्तविको दुष्यन्तः, किन्तु 'चित्रे लिखिताश्ववत्' दुष्यन्तः । विचारसरणिमिमां दशरूपककारोऽपि स्वीकारोति । सहृदये सामाजिके वा रसस्य स्थितिं तथैव स्वीकरोति श्रीशङ्कुको यथा 'अश्वस्य चित्रं दृष्ट्वाऽनुभवो

भवति। श्रीशङ्कुक एव हि सर्वप्रथमं लोल्लटस्योत्पत्तिवादं सहृदयेषु रसानुभवाभावसिद्धान्तं खण्डितवान्। एवञ्चैतन्मते सामाजिकेऽपि रसानुभवो भवतीति पूर्वस्माद्विशेषः।

एतन्मतसारांशः—

(१) वास्तविकरूपेण अनुकार्यरूपान् (दुष्यन्त-शकुन्तला-रामादीन्) एव विभावपदव्यदेश्यान् वक्तुं प्रभवामः। तदनुभावान् सञ्चारिणश्चानुभावान् सञ्चारिणः कथयिष्यामः।

(२) नटो ह्येताननुकरोति। सामाजिकास्तु चित्रतुरगन्यायेन नटमेवानुकार्यं बुध्वा तदनुभावादि (क्रोधे दन्तान् संपिष्य मुष्टिदर्शनम्, शोकावेगेन केशाकर्षणम्, वक्षः स्थलताडनम्, भूमौ पतनादिकम्) द्वारा नटे स्थायीभावस्यानुमानं कुर्वन्ति।

समीक्षा—

श्री शङ्कुकेन हि अनुकरणानुमानयोरुपर्य्येवाग्रहः कृतः। तत्र न स्थायीभावस्य न वा सहचारिणः अनुकरणं भवितुमर्हति, वेशभूषानुभावानामेवानुकरणसम्भवात्। समुद्रलङ्घनाद्युत्साहस्य मानसिकप्रत्यक्षं तु साधारणमनुष्यस्य कथं कथमपि न भवितुमर्हति वास्तविकं तु नटः स्ववेशभूषायां तन्नायकस्थितेः साधारणरूपेण धारणं करोति (सम्भवत एतद्विचारधारया भट्टनायकस्य दृष्टिः साधारणीकरणे गता भवेत्)। अनुमाने चित्रतुरगादिन्यानुसरणेनासत्याधारात्सत्यं प्रतिष्ठापयितुकामोऽयं बालकानां यथाकथञ्चित्प्रतीतये भवेन्नान्येषाम्। मृगतृष्णाजलेन न कस्यापि पिपासा शान्तिः स्नानं वा सम्भवितुमर्हति। अथ चानुमानं बुद्धेर्विषयो व्यवहितञ्च। अन्यस्य रतिरन्यं कथं संगच्छेत्? तथाभावे रसानुमितिः कथम्?

(३) भट्टनायकस्य भुक्तिवादः।

रसविषये 'भुक्तिवाद'सिद्धान्तस्य परिपोषकोऽयम्। काव्यादिद्वारा रसनिष्पत्तौ व्यापारत्रयमामनन्ति। तत्र प्रथमाभिधा, यया शब्दार्थयोर्ज्ञानं भवति; द्वितीयो

भावकत्वव्यापारः येन विभावादयो रत्यादिस्थायीभावाश्च साधारणीकृताः सन्तः, 'परस्य न परस्य मम न मम' इत्यादिबन्धनान्मुक्ता उपभोगयोग्या भवन्ति। सीता शकुन्तला च जनकतनया कण्वतनयाऽथवा रामकान्ता दुष्यन्तकान्ताऽभूत्वा साधारणतया रमणीमात्रव्यपदेशयोग्ये भवतः। अयमाचार्यो भोगव्यापारं भोजकत्वमिति कथयति। नाटके च नोक्तव्यापारत्रयं किन्त्वाद्यद्वयमेव। भोजकत्वव्यापारेण हि रजस्तमसी अभिभूय सत्त्वस्याविर्भावः (उद्रेकः) भवति। चित्तवृत्तीनां शान्ततया स एवानन्दस्य कारणं भवति। मतमिदं सांख्यमतस्यानुकूलम्। एवञ्च रससूत्रस्थ 'संयोगात्' इत्यस्य 'भोज्यभोजकभावसम्बन्धात्' 'निष्पत्ति'रित्यस्य 'भुक्ति' रित्यर्थः। तथा चोक्तं काव्यप्रदीपे—

'तस्माद्विभवादिभिः संयोगाद्भोज्यभोजकभावसम्बन्धाद्रसस्य निष्पत्तिर्भुक्तिरिति सूत्रार्थः।' इति।

केचिदेतन्मतानुसारिणस्तु संयोगादित्यस्य साधरणीकृतविभावादिभिः सह सम्यग् योगादित्यर्थं निरूपयन्ति। अथैतन्मतसारांशः—

भट्टनायकस्येयमेव विशेषता यदेतेन स्वमनस्येवं चिन्तितं यद् दुःखेन कथं सुखमिति ? नायिकादिविभावेषु सामाजिकानामानन्दावाप्त्यर्थमभिधादिव्यापारत्रयमङ्गीकृतम्। तत्र भावकत्वद्वारा निजपरादिभेदं दूरीकृत्य तद्भागस्य पूर्त्तिर्भवति। भट्टनायकमतानुसारेण काव्यनाटकादिविभावादयोऽभिधाद्वारा बोधगम्या भवन्ति। तदनन्तरं विभावादयो भावकत्वद्वारा निजपरबन्धनाद्विमुच्यार्थात् साधारणीकृताः सन्तः सहृदयोपभोगयोग्या भवन्तीति।

समीक्षा—

मतेऽस्मिन् भावकत्व-भोजकत्व-व्यापारद्वयकल्पने मानाभावः। व्यापारद्वयमपि व्यञ्जनायामेवान्तर्भावयन्त्यभिनवगुप्तपादाः। तदुक्तं ध्वन्यालोकलोचने—

व्यंशायामपि भावनायां कारणांशे ध्वननमेव निपतति। भोगोऽपि न काव्यशब्दे क्रियते अपि तु...लोकोत्तरो ध्वननव्यापार एव मूर्धाभिषिक्त इति।

(४) अभिनवगुप्तस्याभिव्यक्तिवादः ।

भरतसूत्रव्याख्यानविषये व्यञ्जनावादिनोऽभिनवगुप्तस्यैवान्तिमं मतम् । रसशास्त्रालङ्कारशास्त्रयोर्मध्ये मतमिदं दार्शनिक-मनोवैज्ञानिकाधारभित्तिहेतुनात्यधिकं साहित्यिकाभिमुखमुपगतम् । अयभिनवगुप्तो व्यञ्जनावादी तथा ध्वनिवादी आलङ्कारिकः । आनन्दवर्धनद्वारा प्रतिष्ठापितसिद्धान्तानुसारेणायं रसं ध्वनेरेवैकं प्रमुखभेदं (रसध्वनिं) स्वीकरोति । अत एव रसो व्यङ्ग्यः, अभिधादिवृत्तित्रयागम्यः केवलं व्यञ्जनावृत्तिद्वाराऽभिव्यक्तो भवति । काव्यनाटकादिषु प्रयुक्ता विभावादयो रसव्यञ्जका रसश्चाभिव्यङ्ग्यः । इत्थमभिनवगुप्तपादोऽयं रसविभावादिषु परस्परं व्यङ्ग्यव्यञ्जकभावं स्वीकरोति । एतन्मतस्य सारांशः—

(१) रसनिष्पत्तिः (रसाभिव्यक्तिः) सामाजिकेषु ।

(२) सामाजिकेषु स्थायीभावो वासना (अथवा संस्कार) रूपेण स्थिरतया तिष्ठति । कथितं हि यथा—कालिदासेन "रम्याणिवीक्ष्यमधुरांश्च निशम्य शब्दान् पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः । तच्चेतसा स्मरति नूनमबोधपूर्वं, भावस्थिराणि जननान्तरसौहृदानि ।

(३) साधारणीकृतविभावादिद्वारा स्थायीभाव उद्बुद्धो भवति । विभावादिसंयोगादयव्यक्तरूपेणाभिव्यक्तो भवति, यथा जलबिन्दुपतनेन मृत्तिकायाः गन्धस्याभिव्यक्तिर्भवति तद्वत् ।

(४) काव्यादीनां पाठो नाटकानामभिनयः सहृदयानां स्थायीभावस्य जागृतिसाधनम् । पाठक-दर्शकयोः स्वोद्बुद्धस्थायीभावस्य शुद्धरूपे तन्मयतया चित्तवृत्तीनामेकाग्रत्वाद् ब्रह्मानन्दसहोदराखण्डरसस्यानन्दप्राप्तिर्भवति ।

(५) रससूत्रस्थ 'संयोगात्' इत्यस्य 'व्यङ्ग्यव्यञ्जकभावात्' निष्पत्तिरित्यस्य च 'अभिव्यक्ति'रित्यर्थः । एतन्मतानुसारेण सामाजिकहृदयेषु वासनारूपेण स्थितो रत्यादिस्थायीभावो विभावादिद्वारा व्यङ्ग्य-व्यञ्जकभावे न तथाभिव्यक्तो भवति यथा मृद्गन्धाभिव्यक्तिर्भवति जलबिन्दुसम्पर्कात् । अस्यां दशायां सहृदय आनन्द-

घनस्यानुभवं करोति। योगिवद्रससन्ततिं प्रमिणोति। द्वयोरपि दशयोर्मध्ये पूर्णानन्दस्यानुभवो भवति। अभिनवगुप्तस्येयं तुलना शैववेदान्तस्य विमर्शावस्थया सङ्गायते यत्र साधकः 'शिवोऽहम्' इत्यस्यानुभवं करोति। रसानुभूतिश्चालौकिकी। प्रपाणकरसवदास्वादोऽत्र विभाव्यते। तत्र साधारणीकरणस्यैव प्रभावः। वैयक्तिकरागद्वेषादीनां लोपात् साधारणीकरणकारणेनैव रसानुभूतिर्भवति।

अस्यां दशायामवस्थितये चात्यावश्यकमिदं यद् विभावादयः स्वस्ववैयक्तिकरूपं परित्यजेयुः, अथ च सामाजिका अपि स्वस्य निर्वैयक्तिकत्वमवश्यं धारयेयुः। तस्मिन् समये दुष्यन्तशकुन्तलादयः स्वव्यक्तित्वं परित्यज्य केवलं नायक-नायिकारूपेणास्मत्समक्षे आयान्ति, अथ च वयं तत्र सहृदयत्वाद् रसानुभवकर्त्तारो भवामः। इत्थञ्च विभावादयः केवलं विषयमात्रम्, सामाजिकाश्च केवलं विषयि-मात्रमवतिष्ठन्ते। इदमेव साधारणीकरणम्। एतस्य जन्मदाता भट्टनायक एवेति पूर्वं विमृष्टम्।

काव्यरसो न प्रणालिकया प्रवहति, नापीक्षुरसवन्निष्पीडितो भवति किन्तु काव्यगतविभावादिद्वारोद्बोधितो रजोगुणतमोगुणविमुक्तः सत्त्वगुणप्रधानात्मप्रकाशेन प्रकाशमानः सहृदयवासनागतस्थायीभावस्यास्वादजन्य आनन्दः। व्यक्तिगतसंस्कारो हि साधारणीकृतो भूत्वा शीशकाक्षररूपोऽथवा तदाधाररूपः सञ्जायते। शीशकाक्षरं व्यक्तिसाधारणयोर्मध्यवर्त्ति वस्तु। एतदाधारमिलनहेतुनाखण्डचिन्मयात्मप्रकाशेऽपि वीरश्रृङ्गारादीनां भेदा अवलोक्यन्ते। स चानन्दः यतः प्रसरति चित्तं व्याप्नोत्यतो 'रस' पदव्यपदेश्यो भवतीत्यवधेयम्।

रसादिविषये धनञ्जयधनिकमतम्

दशरूपककर्त्ता 'विष्णु'पुत्रः मालवापरमारवंशमुञ्जराजस्य राजकविः (९७४-९९५ ई०) दशमशतकोत्तरार्धसमये आसीत्। स्वपित्रादीनां नामानि स्वयमेवोक्तानि। तद्यथा—

'विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत्॥' इति।

धनिको हि धनञ्जयानुजो दशरूपकावलोकर्त्ता । तथा चोक्तम्—

'इति श्रीविष्णुसूनोर्धनिकस्य कृतौ दशरूपावलोके रसविचारो नाम चतुर्थः प्रकाशः ।'

अवलोकातिरिक्तमेतस्य साहित्यशास्त्रोपरि 'काव्यनिर्णया'ख्यमेको ग्रन्थः ।

सावलोकदशरूपकवस्तुविभागश्चेत्थम्—पञ्च अर्थप्रकृतयः, पञ्चावास्थास्तथा सन्धीनामङ्गविभाजनम्, अर्थोपक्षेपकवर्णनम्; नायकनायिकयोरवस्थानुरूपमनोवैज्ञानिकविश्लेषणम्, तत्सहकारिवर्णनम्, रसतत्साधनानां विश्लेषणम् । दशरूपकपरवार्त्तिनो ये आचार्यास्तेषामुपर्येतत्प्रभावः पूर्णरूपेण सञ्जात इत्यवधार्यते । तथाहि विद्यानाथस्य प्रतापरुद्रीये ये नायकनायिकयोर्भेदास्ते स्पष्टमेवेत एव गृहीताः सन्ति । किं बहुनना विश्वनाथकृतसाहित्यदर्पणस्य तृतीयपरिच्छेदगतनायकनायिकयोर्भेदसङ्कलने तथा तत्षष्ठपरिच्छेदगतसमस्तदृश्यकाव्यविवेचने च दशरूपकस्यैव पूर्णप्रभावः । एवं भानुदत्तकृत-रसमञ्जर्यां रसतरङ्गिण्याम्, भावमिश्रकृतरससरस्याञ्चैतस्यैव प्रभावः । १२ द्वादशशताब्दीसम्भूतरामचन्द्र-गुणचन्द्रकृतनाट्यदर्पण'स्याप्युपर्येतस्य महान् प्रभावः संपतितः ।

धनञ्जयेन स्वकपोलकल्पितमेवैतत्कृतमिति तु कदापि न भ्रमितव्यम्, प्रमुखनायिकाभेदातिरिक्तं श्रृङ्गाररसविषयातिरिक्तं च समस्तं विषयजालं भरतनाट्यशास्त्रादेवसंक्षेपेणेह गृहीतम् । तथा चोक्तं तेनैव—

'नाट्यानां किन्तु किञ्चित् प्रगुणरचनया लक्षणं संक्षिपामि ।' (दशरूपकम् १)

धनञ्जयस्तथा धनिक उभावपि भाट्टमीमांसकद्वारात्यधिकं प्रभावितौ । एतौ हि अभिधालक्षणतात्पर्याभिधामेव वृत्तिं स्वीकृतौ न तु व्यञ्जनाख्यां तुरीयां वृत्तिम् । भट्टमीमांसका हि व्यञ्जनावृत्तिगम्यप्रतीयमानार्थप्रतीतिं तात्पर्यवृत्त्यैव स्वीकुर्वन्ति । ध्वनिवादिनः 'रसो व्यङ्ग्यः'इति मन्यन्ते तथा तत्प्रतीतये एव व्यञ्जनावृत्तिं कल्पयन्ति । धनिको हि दशरूपकचतुर्थप्रकाशे मतमेनं खण्डयन्-स्थायीभावः (रसोऽपि)

विभावादिद्वारा प्रतीतवाक्यार्थ एव यथा कस्मिन्नपि वाक्यरूपे अभिहिताऽथवा प्रकरणादिना बुद्धिस्था क्रिया कारकैर्युक्ता वाक्यार्थं निष्पादयति तद्वत्। तथाहि—

'वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया।
वाक्यार्थः कारकैर्युक्तः स्थायीभावस्तथेतरैः॥'

वाक्यस्याभिधाशक्तिस्तत्तद्विभावादिप्रतिपादनं करोति तथा तद्द्वारा रस-रूपे पर्यवसिता भवति। काव्यादिशब्दार्थानां पदार्था विभावादयः तथा वाक्यार्थः स्थायीभाव एवं रसस्तात्पर्यार्थः। तथा चोक्तम्—

'तात्पर्यव्यतिरेकाच्च व्यङ्ग्यनीयस्य न ध्वनिः।

X X X

एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम्।
यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम्॥' इति।

रसस्य व्यङ्ग्यत्वं खण्डयन्तौ विभावादौ तथा रसे भाव्यभावकसम्बन्ध इति मन्येते। एतन्मते काव्यं विभावादिर्वा भावकः रसादिर्भाव्यः। भाव्यभावकसंबन्ध-कल्पना च भट्टनायकमतप्रदर्शित'भावकत्वभोजकत्व'व्यापारयोर्मध्ये [भावकत्व-व्यापाराधारेण। पूर्वोक्तनिष्पत्ति'रित्यस्यैतन्मते भावना-अर्थः। भावो हि—सामाजिकान् श्रृङ्गारादिरसानां भावनां कारयत्यतो 'भाव' इत्युच्यते।

'भावाभिनयसम्बन्धान् भावयन्ति रसानिमान्।
यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः॥'

सामाजिकाः नाटकादिषु नटद्वारा अर्जुनाद्यभिनयं दृष्ट्वा तान् अर्जुनादिं मत्वा तेभ्य उत्साहादीनामास्वादानुभवं तथैव कुर्वन्ति यथा मृण्मयगजाश्वादिभिः क्रीडन्तो बालकास्तेभ्यो रसं प्राप्नुवन्ति।

'क्रीडतां मृण्मयैर्यद्वद्बालानां द्विरदादिभिः।
स्वोत्साहः स्वदते तद्वच्छ्रोतृणामर्जुनादिभिः॥'

एतेन रससिद्धान्ते धनिकधनञ्जययोस्त्रीणि वस्तूनि मिलन्ति—

(क) रसोऽव्यङ्ग्यीभूय काव्यस्य तात्पर्यार्थः ।

(ख) रसस्य भावना भवति, रसविभावादौ परस्परं भाव्यभावकभावः ।

(ग) नटादयः सामाजिकनिमित्तं तद्वदेव रामादयो भवन्ति यद्वत् बालकार्थं मृत्तिकाया हस्त्यश्वादयो वास्तविकहस्त्यश्वादयः सञ्जायन्ते ।

अत्रेदं पुनरप्यनुसन्धेयम्—'दीर्घदीर्घतराभिधाव्यापारजन्यो व्यङ्ग्यार्थ इति लोल्लटमतम् । धनञ्जयमते प्रथमांशोपरि लोल्लटस्य प्रभावः । द्वितीयांशे भट्टनायकस्य प्रभावः । यद्यपि स हि 'निष्पत्ति' रित्यस्य 'भुक्तिः' इत्यर्थं करोति न भावनाम्, तथापि तन्मते प्राप्ता भवति भावना । एतन्नवीनीकरणमेव धनञ्जयकार्यम् । तृतीयेंऽशे श्रीशङ्ककस्य प्रभावः । नटद्वारा रामाद्यनुकार्याभिनयं दृष्ट्वा सामाजिकास्तान् रामादीनेव मन्यन्ते । रङ्गमञ्चे चागतनटतुलना चित्रतुरगन्यायेन श्रीशङ्कुना दर्शिता । इत्थं रससम्बन्धे धनिकधनञ्जयोर्न नवीनकल्पना किन्तूक्तत्रयाचार्यमतसंमिश्रणमेव ।

रसगंगाधरे च पूर्वोक्तप्रतिपादितातिरिक्तबहूनां मतानामुल्लेखो दृश्यते । तेष्वेकं मतं यत् 'रज्जौ भुजङ्गवत्संसारमिथ्यात्वमुपपादयतः शाङ्करवेदान्तात्सम्बन्धं स्थापयति'तद्विशेषरूपेणोल्लेखनीयं वर्त्तते । रसस्येयं व्याख्या 'शुक्तौ रजतम्' इति भ्रान्त्यनुभूत्याधारोपरि प्रचलति । पुरोवर्त्तिनीं शुक्तिं यदाऽहं रजतरूपेण पश्यामि तदैव विशेषदोषेण शुक्तेः शुक्तित्वोपरि तिरस्करिणीव प्रपतति तथा तत्र रजतस्यारोपो भवति अर्थान्मदीयचित्तवृत्तिः रजतप्रधाना सञ्जायते । तत्कालीनः स चानुभवः सदसद्विलक्षणोऽनिर्वचनीयो भवति । यदा वयं काव्ये दुष्यन्तशकुन्तलयोः रतिवर्णनं पठामः नाटके वा तदभिनयं पश्यामः तदा वास्तविक-दुष्यन्त-शकुन्तलयोरुपरि तिरस्कारिणीव किञ्चिन्निपतति तथाभिनवाया अनिर्वचनीयरतेः सृष्टिर्भवति याऽस्मच्चित्तं व्याप्नोति, आत्मनः प्रकाशसम्बन्धात् सा रसरूपेण प्रकाशिता भवतीति ।

रससंख्या विषयेऽप्यालङ्कारिकाणां मतभेदः

तत्र भरतः—

'श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसा नाट्ये इति स्मृताः ॥' (नाट्य. शा.)

केषाञ्चिन्मते 'शान्तोऽपि नवमो मतः' इति पाठः ।

शान्तरसस्य सर्वकार्यविरामरूपत्वेन नाटके प्रयोजनाभावान्न स भरतेनोक्तः । दशरूपककारोऽपि तं निषेधत्येव । तथाहि—

'रत्युत्साहजुगुप्साः क्रोधो हासः स्मयो भयं शोकः ।
शममपि केचित्प्राहुः पुष्टिर्नाट्येषु नैतस्य ॥'

(दशरूपकम् ४/३५)

काव्यादिष्वेतत्सत्ताऽवश्यं विद्यामाना तिष्ठति । आनन्दवर्धनानुसारेण महाभारतस्य मूलरसः शान्त एव । नागानन्दनाटके च न शान्तरसः किन्तु वीररस एव । तत्र हि जीमूतवाहन एकतो यदि मलयवत्यां प्रेम करोति तदाऽपरतो विद्याधरचक्रवर्त्तित्वं प्राप्नोति । उभावपि शमभावस्य कृते विरुद्धौ । वस्तुतो जीमूतवाहनो दयावीरः । वीररसस्य च मलयवतीप्रेम्णा विद्याधरचक्रवर्त्तित्वलाभेन सह न कोऽपि विरोधः सम्भवितुमर्हतीति ।

विषयेऽस्मिन्नेवं विप्रतिपत्तयः सन्ति—

(१) भरतमुनिना शान्तरसस्य लक्षणं तथा विभावादीनां प्रतिपादनं न कृतमतो नास्त्ययं रसः ।

(२) अनादिकालादागतानां रागद्वेषादीनां नाशसम्भवाच्छान्तरसस्याभाव एव ।

(३) यदि यथाकथञ्चित्स्वीकृतोऽप्ययं रसः स्यात्तदैतस्य वीरबीभत्सादिरसेष्वन्तर्भविष्यतीति ।

अभिनवगुप्तपादाचार्येणाऽपि शान्तरसस्य युक्तियुक्त्या स्थापनं कृतम् ।

काव्यप्रकाशकृता तु पूर्वमष्टौ स्थायिभावान् प्रदर्श्यानन्तरं निर्वेदप्रधानो नवमो शान्तरसोऽपि परिगणितः । तथाहि—

'निर्वेदः स्थायिभावाख्यः शान्तोऽपि नवमो रसः ।'

(काव्यप्रकाशः ४/३५)

निर्वेदस्य सर्वप्राथम्यं सञ्चारिषु गणनायां हेतुरप्युक्तस्तत्रैव—'निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम् ।' (का. प्र. ४/३४ वृत्तिः)

साहित्यदर्पणकृताऽपि शमलक्षणमेवं विहितम्—
'शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम् ॥' इति ।

एवं स्थितेऽपीदानीं पर्यन्तं सर्वसम्मत्या चैतद्विषये निर्णयो न सञ्जातः ।

रुद्रटेन 'प्रेयान्' रसोऽपि स्वीकृतः । विश्वनाथो दर्पणकारस्तु वासल्यमपि रसत्वेन स्वीकरोति । तथाहि—

'स्फुटं चमत्कारतया वत्सलं च रसं विदुः' इति ।

(सा. द. ३/२५१)

गौडीयवैष्णवादिसम्मतौ तु मधुरसः सर्वश्रेष्ठः सर्वप्रथमोऽस्ति ।

अथ रसानां गौणमुख्यशत्रुमित्रभावविचारः

भरत-दशरूपककारमते अष्टैवेव रसा इति प्रदर्शितम् । तत्र श्रृङ्गार-वीर-बीभत्स-रौद्राणां मुख्यत्वम्, एभ्यो यथाक्रममुत्पन्नानां हास्याद्भुतभयानककरुणानां गौणत्वम् । प्रधानरसेषु चतस्रो मानसिकवृत्तयः, याः प्रधानरसोत्पन्नगौणरसेषु तिष्ठन्ति । इत्थञ्च श्रृङ्गारे-हास्ये च विकासः (यथा कलिका विकसति), वीरेऽद्भुते च विस्तारः (प्रसरणं, यथा धूमो वायुर्वा प्रसरति वीरः स्वसत्तां व्याप्तुमभिवाञ्छति, अद्भुते द्रष्टुश्चित्तमालम्बनमहत्तया व्याप्तं भवति), बीभत्से भयानके च क्षोभः (यथा

जलमुद्वलितं भवति) वीर-रौद्रयोस्तथा करुणे विशेषस्य चाञ्चल्यस्य मनोवृत्तयस्तिष्ठन्ति । अत्र वीरशृङ्गारयोरनुभवे विस्तारविकासहेतुना सुखदः, रौद्रबीभत्सयोरनुभवश्च क्षोभविक्षेपहेतुना दुःखदो वर्त्तत इति विभावनीयम् । युगलयोरनयोर्मध्ये एकस्मिन्नाश्रयस्य प्राधान्यमप्यस्मिन् हीनत्वं दीनत्वं च तिष्ठति ।

कदाचिदेकस्मिन्नेव काव्ये एकाधिकरसानां समावेशो भवति । तत्रावश्यकमिदं वर्त्तते यत्परस्परविरोधिरसा एकत्री मा भूवन्निति, प्रमुखभावरसयोः कदाचित्काऽपि क्षतिस्तु न सञ्जातेति । सजातीयविजातीयभावशून्यः स्थायीभवो भवति, स हि लवणाकर इव सर्वमात्मसात्कृत्य स्वेन रूपेण स्थापयति । तदुक्तं धनञ्जयेन—

'विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः ॥'

भावानां परस्परं विरोधः प्रकारद्वयेन सम्भवितुमर्हति—

(१) सम्भवतः काव्ये विरोधभावा न तिष्ठन्ति, यदि तिष्ठन्ति तंदा परस्परबाध्यबाधकभावेन । व्यभिचारिभावा हि स्थायीभावस्याङ्गानि अतस्तानि विरोधीनि न भवेयुः । रसस्य स्थायीभावस्यालम्बनविरोध एव विरोधो नान्यथा । यथा 'मालतीमाधवे' शृङ्गाररसो वर्त्तते, तत्पञ्चमेऽङ्के बीभत्सस्य चित्रणमपि वर्त्तते, उभयो रसयोरालम्बनभिन्नत्वान्नैकत्र विरोधः । शृङ्गारस्यालम्बनं मालती, बीभत्सस्य श्मशानम् । यत्र माधवक्रोधस्यालम्बनमघोरघंटकापालिकस्तत्रैव रौद्ररसस्योपनिबन्धनम् । इत्थञ्च यदि पृथक् पृथगालम्बनं विधाय विरोधिरसोपनिबन्धनं भवेत्तदा न तयोर्विरोधो नापि बाध्यबाधकभावः ।

विरोधपरिहाराय द्वितीयोपायोऽयं यदुभयविरोधिनोर्मध्ये तादृशरसस्य समावेशः करणीयो यस्तयोर्विरोधी न भवेत् । न चैवं यत्रैक एव मुख्यो रसस्तत्र विरोध्यविरोधिरसानां तदङ्गत्वं स्वीकृत्य विरोधाभावो वक्तुं शक्यते, किन्तु यत्र रसानां समप्राधान्यं तत्र विरोधपरिहारः कथमिति वाच्यम्, एतादृशस्थलेष्वपि प्रधानभावस्तथा प्रधानरस एक एव द्वितीयोपन्यस्तरसस्य भावस्य वा गौणत्वमेवाभ्युपगमेन दोषाभावात् ।

केषां केषां रसानां कैः कैः रसैः सह विरोध इति जिज्ञासायामेवमवगन्तव्यम्—शृङ्गारस्य करुणबीभत्सरौद्रभयानकैः, हास्यस्य करुणेन भयानकेन च, करुणस्य हास्यशृङ्गाराभ्याम्, रौद्रस्य हास्यशृङ्गारभयानकैः, वीरस्य भयानकेन शान्तेन च, भयानकस्य शृङ्गारवीररौद्रहास्यशान्तैः, बीभत्सस्यशृङ्गारेण शान्तस्य वीरशृङ्गाररौद्रहास्यभयानकैर्विरोध इति सर्वत्र योज्यम्। तद्यथा

आद्यः करुणबीमत्सरौद्रवीरभयानकैः।
भयानकेन करुणेनापि हास्यो विरोधभाक्॥
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः।
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि।
भयानकेन शान्तेन तथा वीररसः स्मृतः॥

शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः।
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता॥

सा. दर्पणम्—३-२५४. २५७

पाश्चात्यमनोविज्ञानस्यानुकूल्येन रससिद्धान्तस्य पूर्णरूपेण व्याख्या कथमपि न भवितुमर्हति। अयं च रससिद्धान्तो भारतवर्षस्यैव निधिः, यो हि दार्शनिकविचारैः समन्वितः। रसो हि—तदात्मतत्त्वोपर्यलम्बितो यस्यानन्दः सहजगुणः। अयं चिन्मयः, अखण्डः, प्रकाशमयो वेद्यान्तरस्पर्शशून्यः। इयमवस्था केवलं मनस्तत्त्वस्वीकर्तृणां कल्पनायामागन्तुमनर्हा। आधुनिकमनोविज्ञानं यद्यप्यात्मनो विज्ञानव्यपदेश्यं किन्तु तत्रात्मनस्तथैव दर्शनं न भवति यथा कस्यापि वाणिज्यव्यापारकर्तुः परलोकगमनानन्तरं तन्नाम्ना विज्ञापितव्यापारः प्रचलितः किन्तु तस्य साक्षात्कारो न भवति तद्वदिति शम्।

(२) अलकङ्कारसम्प्रदायः

ऐतिहासिकदृष्ट्या चालङ्कारमतप्रधानप्रवर्त्तकाचार्यो भामहः। एतन्मतपोषकटीकाकारौ उद्भटो रुद्रटश्च। काव्येऽलङ्कारस्य प्राधान्यमपि येन केनापि रूपेण दण्डिनोऽपि स्वीकृतमासीदेव। एतत्सम्प्रदायानुसारेणालङ्कार एव काव्यस्य जीव-

नाधायकः। अलङ्कारहीनं काव्यस्वीकरणं तथैवोपहासास्पदं यथोष्णतारहितमग्नि-स्वीकरणम्। एतदेवोक्तं पीयूषवर्ष-जयदेवेन—

'अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती॥' (चन्द्रलोकः १/८)

अलङ्काराणां विकासः क्रमशः सञ्जातः। वैदिकसाहित्ये चोपमारूपकाद्यल-ङ्काराणां नामानि दृश्यन्ते। तत्रोपमा यथा—'ईयुषीरागमुपमा शाश्वतीनाम्' (ऋग्वेदे १/११३/९५) 'तदप्युपमास्ति' (शतपथब्राह्मणम् १५/५/१/५) 'तद्यथा प्रियया स्त्रिया संपरिष्वक्तो...एनमेवायं पुरुष...(बृहदारण्यकम् ४/३/२१) 'अरा इव रथनाभौ संहता यत्र नाडयः' (मुण्डकोपनिषद् २/६)। साङ्गरूपकं यथा—

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि शरीरं प्रग्रहमेव च॥"

(कठोपनिषत् १/३/३)

अलङ्काराणां विधिवन्निरूपणं सर्वप्रथमं भरतमुनिप्रणीतनाट्यशास्त्रे। तत्रै-वमस्ति—

'उपमारूपकं चैव दीपकं यमकं तथा।
अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः॥'

(ना. शा. १/७/४३)

अष्टमशताब्द्यां विद्यमानेनोद्भटेन निज'काव्यालङ्कारसारसंग्रहे' एकचत्वा-रिंशदलङ्काराणां वर्णनं कृतम्। नवशताब्दीसंभूतेन रुद्रटेन वास्तवौदार्यातिशयश्ले-षानामलङ्कारमूलत्वं निरूप्य तेषु तारतम्यस्य वर्गीकरणस्य चाभिनवः प्रयासः कृतः। एतदनन्तरं कुवलयानन्दादिग्रन्थेषु पञ्चविंशत्यधिकशतमलङ्कारा भेदोपभेदैर्निरू-पिताः सन्ति परन्त्वेतेषु अलङ्कारसंख्याया वर्धनं परिभाषायाः परिवर्तनपर्यन्तमेव सीमितमासीत्।

एतत्सम्प्रदायप्रथमप्रवर्त्तक आचार्यो हि 'वक्रोक्ति' नामकमलङ्कारं यादृशं निरूपितवान् एतत्परवर्त्त्याचार्यो वामनस्तु तमेव किञ्चित्परिवृत्य स्वीकृतवान्। अलङ्कारविभजनाय कतिपयसिद्धान्ता अपि मूलरूपेण निर्णीताः कृताः सन्ति। विषयेऽस्मिन्नेकावलीकर्त्तुर्विद्याधरस्यातियुक्तियुक्तं वैज्ञानिकं निरूपणमस्ति एतेन महानुभावेन हि औपम्यविरोधतर्कान् अलङ्कारमूलविभेदकान् मत्वाऽस्मिन्नेव विषयेऽतिसुन्दररूपेण समीक्षा विहिता। अलङअकारविकासानुसन्धानाय स्वतन्त्ररूपेणानुशीलनस्य महत्यावश्यकता विद्यते।

अलङ्कारा अपि शैल्या उत्कृष्टतायां सहायका भवन्ति : लौकिककटककुण्डलादयोऽलङ्कारा यथा शारीरादिकं भूषयन्ति तथा काव्यगतकानुप्रासादयः शब्दार्थरूपं बाह्यकाव्यशरीरमेवालङ्कुर्वन्तीति न भ्रमितव्यम् ते खलु काव्यात्मभूतरसमप्युपकुर्वन्तीत्यवश्यमस्ति तेन सम्बन्धः।

यस्माद्धृदयप्रदेशात्काव्यमात्रस्योत्पत्तिर्भवति, तद्धृदयोल्लासादेवालङ्काराणमप्युत्पत्तिर्भवति (स्त्रीणामपि भौतिकालङ्कारधारणे मानसिके एक उल्लासस्तिष्ठति, तदुल्लासाभाव एवं विधवानार्योऽलङ्कारधारणं न कुर्वन्ति) अतएव हृदयस्यौज उल्लासो वा अलङ्काराणां मूले माननीयो भविष्यति। रसानुभूतावप्यलङ्काराः सहायका भवन्ति। उपमारूपकादयो हि मानसिकचित्रद्वारा स्पष्टताप्रदानमेव न कुर्वन्ति प्रत्युत-अर्थान्तरन्यास-दृष्टान्त-प्रतिवस्तूपमा-उदाहरणाद्यलङ्कारद्वारा विचाराणां पुष्टिमपि कुर्वन्ति। भ्रान्तिसन्देह-स्मरणोत्प्रेक्षाद्यलङ्कारद्वारा नानारूपैः सादृश्यस्योपस्थापनं क्रियमाणा भवन्ति। एवमेव क्रमालङ्कारेण यथासंख्यालङ्कारेण वा रचनायां क्रमोपस्थितिर्भवति, व्यतिरेक—विभावनासङ्गति-विषम-व्याघातद्वारा विरोधस्य चमत्कारा उत्पन्नीकृता भवन्ति तथा दर्शिता भवन्ति यद् ब्रह्मणः सृष्टेः कविसृष्टौ विलक्षणता वर्त्तत इति। अन्योक्ति-समासोक्ति-सूक्ष्मातिशयोक्तिद्वारा उक्तिवैचित्र्यवचनचातुर्ययोश्चमत्कारः प्रदर्शितो भवति। कारणमाला-एकावली-मालादीपक-सारादिश्रृङ्खलामूलकालङ्कारद्वारा प्रभावस्य वर्धनं कृतं भवति। लोकोक्तिद्वारा भाषायां सजीवता प्रापिता भवति। शब्दालङ्कारद्वारा शब्दमाधुर्यस्य सृष्टिः कृता भवति। एतेन रसादिभिरालङ्कारिकाः पूर्णपरिचिता एव भवन्तीति विज्ञायते।

अत्रेदं विचारणीयम्—रसाद्यलङ्कारमध्ये आलङ्कारिकाः केषां प्राधान्यं स्वीकुर्वन्तीति। तत्र भामहाचार्यो हि रसवत्प्रेय-ऊर्जस्वि-समाहिताभिधचतुर्ष्वलङ्कारेषु मध्य एव रसभावानां समग्रविषयानन्तर्भावयति। रसवदलङ्कारेण दण्डयाचार्योऽपि पूर्णपरिचितो वर्त्तते। इत्थञ्चालङ्कारिकाचार्या रसतत्त्वं सम्यग्रूपेणावजानन्ति किन्तु सत्यप्येवमेकं प्राधान्यमलङ्कारस्यै वेति समुद्घोषयति। ये च ध्वनिवादिन आचार्याः प्रतीयमानमर्थमेव महत्वरूपमङ्गीकुर्वन्ति तेषां मतादप्यालङ्कारिकाः पूर्णपरिचिताः सन्ति, ते हि प्रतीयमानार्थं समासोक्त्याक्षेपाद्यलङ्कारेष्वेवान्तर्भावयन्ति। अलङ्काराणां विशिष्टानुशीलनेन व्याख्याकरणेन च वक्रोक्तेध्वनेः कल्पना प्रादुर्भूता। अलङ्कारमतस्य चैतच्छास्त्रेतिहासे महती विशेषता विद्यते।

(३) रीतिसम्प्रदायः

रीतिमतस्य प्रतिपादकः प्रधानाचार्यो वामनः। एतन्मते रीतिरेव काव्यस्यात्मा 'रीतिरात्मा काव्यस्य' (काव्यालंकारसूत्रम् १/२/६)। का च सा रीतिरिति जिज्ञासायां 'विशिष्टा पदरचना रीतिः' (काव्यालङ्कारसूत्रम् १/२/७) इति हि लक्षणं प्रतिपादितम्। इयमेव शैलीत्युच्यते। रचनायां चेयं विशिष्टता गुणानामवस्थित्या उत्पन्ना भवति, अत एव गुणोपरिरीतिरबलम्बिता तिष्ठतीति। इदं च रीतिमतं गुणसम्प्रदायनाम्ना व्यवहृतं भवति। 'ओजःकान्तिमती गौडीया' (काव्याल. सू. १/२/१२) 'समग्रगुणा वैदर्भी' (काव्याल. सू. १/२/१२० 'माधुर्यसौकुमार्योपपन्ना पाञ्चाली' (काव्याल. सू. १/२/१३) वैदर्भी-गौडीरीत्योः स्पष्टरूपेण विभेदप्रतिपादनस्य श्रेय आचार्यदण्डिन एवोपरि वर्त्तते। प्रारम्भकाले रीतीनां सम्बन्धो देशविशेषेणैवासीत्। यत्प्रान्तिनो यादृश्यां शैल्यां विशिष्टतां प्राप्तवन्तस्तत्प्रान्त (देश) नाम्ना तादृशशैल्याः प्रसिद्धिरभूत्। तत्र वैदर्भ्या विदर्भदेशेन वराराभिधेन गौड्या वङ्गप्रदेशेन, पाञ्चाल्याः पाञ्चाल (पञ्जाब) प्रदेशेन, लाट्या लाट (गुजरात) प्रदेशोनाभिधेयेन सम्बन्ध आसीत्। गुणालङ्कारयोः परस्परं स्फुटं भेद इत्यस्य सर्वप्राथम्येन प्रतिपादनं वामनेनैव कृतम्।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥' (रसगंगाधरः)

भरतनाट्यप्रतिपादिता य एते दश गुणास्तानेव वामनः शब्दार्थगतत्वेन द्विगुणितान् करोत्। वैदर्भीरीतेः स्पष्टप्रतिपत्तये उक्तदशगुणानामत्यधिकावश्यकता प्रदर्शिता तेन, गौडीरीतिप्रतीतये ओजः कान्त्योः पाञ्चालीप्रतीतये माधुर्यप्रसादयोः सत्ताया 'विद्यमानत्वावश्यकता प्रदर्शिता। दण्डिनाऽपि वैदर्भमार्गस्य प्राणभूताश्चोक्तदशगुणा इति स्पष्टमुक्तम्।

'इति वैदर्भमार्गस्य प्राणा दश गुणा मताः।' (काव्यादर्शः १४२)

एवञ्च गुणालङ्कारयोः पार्थक्यं प्रदर्श्य रीतिसम्प्रदायोऽयं स्फुटं साहित्यशास्त्रस्य महानुपकारो विहितः। वामनो हि गुणालङ्कारयोर्भेद इत्थमाह—'काव्यशोभायाः कर्त्तारो धर्मा गुणाः, तदतिशयहेतवोऽलङ्काराः।

अलङ्कारसम्प्रदायापेक्षया चैतत्सम्प्रदायस्यालोचना दृष्टिः सूक्ष्मातिगहना च प्रतीता भवति। भामहादयो हि रसमलङ्कारं मत्वा तं काव्यस्य बहिरङ्गसाधनमेव स्वीकृतवन्तः, किन्तु वामनेन तु कान्तिगुणान्तर्गतं ('दीप्तिरसत्वं कान्तिः' का. ल. ३/२/११४) रसं मत्वा काव्ये रसस्य महत्ता समधिका वर्त्तते इत्यत्र विशेषाग्रहो दर्शितः। ध्वनिश्च वक्रोक्तावेवान्तर्भावितः। इत्थञ्च वामनेन कार्यद्वयं सम्पादितम्—(१) काव्यपरिभाषायामात्मनो मुख्यत्वम्, (२) गुणानां मुख्यत्वं प्रयच्छताऽलङ्काराणां गौणत्वम्।

शब्दार्थौ शरीरं रसश्च तदात्मा, इति स्वीकारादेव वैदर्भ्यादिरीतीनां गुणाश्रितत्वमङ्गीकृतम्। गुणानामपि रसधर्मत्वमङ्गीकृत्य तेषां काव्यात्मनः सम्बन्धः स्थापित आचार्यैः।

मम्मटाचार्यस्तु वृत्तिं रीतिं चैकमेव स्वीकरोति। तथा हि 'एतास्तिस्रो वृत्तयः वामनादीनां वैदर्भीगौडीपाञ्चाल्याख्या रीतयो मताः' काव्यप्रकाशः ९/८१ पूर्वार्धवृत्तिः। साधरणतया वृत्तिरीतिषु भेदः कर्त्तुं न शक्यते तथापि सूक्ष्मेक्षिकया किञ्चित्पार्थक्यमस्त्येव। तथा हि वृत्तीनां विभाजनं रचनाया गुणोपरि वर्त्तते। रीतिनां

वर्गीकरणं देशस्य प्रान्तस्य वाधारेण भवति । यद्यपि गुणैः सह रीतिनां सम्बन्धोऽस्ति तथापि तासु रचनाया बाह्यरूपोपर्येवाधिकाग्रहो दत्तो वर्त्तते । रुय्यकेन भेदमेनमधिकस्पष्टतया प्रदर्शितम् ।

आचार्यराजशेखरेण त्वित्थमत्र निर्दिष्टम्—'तत्र वेशविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः ।' इति ।

भोजदेवेन तु सरस्वतीकण्ठाभरणे रीतिनां साहित्यमार्गेण—अर्थाद् रचनायाः क्रमेण वा सम्बन्धः प्रदर्शितः । रीतिशब्दो हि रीङ्धातुना निष्पन्नः, यदर्थश्च चलनं निर्माणम् । यथा चोक्तम्—

'रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ।'

तेनैव वृत्तेः सम्बन्धः विकास-विक्षेप-संकोच-विस्तार-मनोदशाभिः (अर्थात् चित्तोपरिपतितप्रभावैः) रीतिनां सम्बन्धो बाह्य-वर्ण-विन्यासैरधिको वर्त्तते इति प्रदर्शितः । एतन्मते चतुर्विंशतिगुणाः सन्तिः ।

भरत-वामनादिभिः शब्दार्थयोः ये दश गुणा उक्ताः, मम्मटादिभिस्तु माधुर्यौजःप्रसादेष्वेव तानन्तर्भाव्य गुणानां त्रैविध्यमेव स्थापितम् । यथायथमन्तर्भावस्त्वेतद्ग्रन्थस्याप्यष्टमपरिच्छेदतोऽवगन्तव्यः । गुणाश्च शौर्यादिवत् काव्यात्मभूतरसस्योत्कर्षहेतुभूताः सन्तः स्थायिधर्मा इत्युच्यन्ते । अलङ्कारा अपि तदुत्कर्षहेतवः सन्ति किन्त्वस्थायिरूपेणेति तत्र तत्र भूरिशः प्रदर्शिता एव विद्यन्ते ।

(४) वक्रोक्तिसम्प्रदायः

वक्रोक्तेर्महनीयभावनाया बीजरूपेण सूचनकरणस्य श्रेयोभागी आचार्यभामहः । तमेव बीजमदाय पूर्णरूपेणाङ्कुरित—पल्लवितकरणस्य सम्मानमाचार्यकुन्तकस्यैव वर्त्तते । यद्यपि भामहग्रन्थपर्यालोचनयाऽलङ्कारणामेव भामहेन प्राधान्यं दत्तम्, तथापि रसा-वक्रोक्तिरीतिसम्प्रदायानां बीजमपि प्रदर्शितं मिलति । अनेन महात्मना हि वक्रोक्तिर्व्यापकत्वं प्रदर्शयकाव्यार्थमावश्कत्वमेतस्या इति प्रदर्शितम् । तथा हि—

'युक्तं स्वभावोक्तया सर्वमेतदिष्यते।' (काव्यालङ्कारः १/३०)

एनामेवाधारशिलामादाय कुन्तलेन 'वक्रोक्तिजीवित' नामको ग्रन्थो विनिर्मितः।

अयमेव अतिशयोक्ति च वक्रोक्तिनाम्ना व्यवहरति, तां च सर्वालङ्काराणां जीवनाधायकत्वं व्यवस्थापितवान्। तथा च स्पष्टमेवोक्तिः—

'सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥'

(काव्यादर्शः)

भामहसम्मत्या वक्रार्थप्रतिपादकशब्दानां प्रयोगो हि काव्येऽलङ्कारमुत्पादयति। तथाहि-

'वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते।' (का. ल. ५/६६)

हेतोरलङ्कारानङ्गीकारे वक्रोक्तिशून्यत्वमेव कारणं वर्त्तते। लोचनकारेणापि भामहमुद्धृत्य स्पष्टमेवोक्तं लोचने—'शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानम्।' दण्डिना तु वक्रोक्ति स्वाभावोक्ति-रूपाभ्यां वाङ्मयस्य द्वैविध्यं प्रदर्शितम्। तथाहि—

'श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा समासोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥'

(काव्यादर्शः २/३६३)

दण्डिनः सूत्रमादायैव वामनः अग्रे वृद्धिं प्रापेति केचिद्वदन्ति। प्रायो भामहादर्वाचीनाः सर्वेऽप्यालङ्कारिका वक्रोक्तिं समाद्रियन्ते।

वक्रोक्तिशब्दस्यार्थः वक्रा = सर्वसाधारणजनकथनभिन्नालौकिकचमत्कारयुक्ता उक्तिः कथनम्। कुन्तकशब्दे तु 'वक्रोक्तिः = वैदग्ध्यभङ्गीभणितिः'। साधारणजनो हि भावाभिव्यक्त्ये साधारणरूपेणैव शब्दप्रयोगं करोति, किन्तु

पृथक्चमत्कारिकथनस्य प्रकार एव 'वक्रोक्ति' नाम्नाभिहितो भवति। तथा चोक्तम्—

'वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।'

वक्रोक्तिः प्रसिद्धाभिधानव्यक्तिरेकिणी विचित्रैवाभिधो वैदग्ध्यं कविकौशलं तस्य भङ्गी विच्छित्तिः।' (वक्रोक्तिजीवितम् १/११) संक्षेपतया वक्रोक्तेरेकप्रकारेण सौन्दर्यमर्थः।

कुन्तकाचार्येण हि गुणरीत्यलङ्काराणां सर्वेषामपि वक्रोक्तावेवान्तर्भावो दर्शितः। अनेन महानुभावेन हि शब्दार्थयोः शब्दशब्दयोः अर्थार्थयोः सामञ्जस्योपरि समधिकं बलं प्रकटितम्। सहितयोर्भाव एव साहित्यमित्यस्य समन्वयो दर्शितः।

इत्थमेव शैल्या मार्गा अपि त्रयः प्रदर्शिताः। तत्र प्रथमः सुकुमारो द्वितीयं विचित्रं तथा तृतीयो मध्यममार्गो यो हि पूर्वोक्तयोर्मध्यवर्त्ती सुकुमारमार्गे—रसभावयोः प्राधान्यं तिष्ठति। विचित्रमार्गे—उक्तलङ्कारयोर्मुख्यता तिष्ठति। तत्र सुकुमारमार्गे स्वल्पानि मनोहराणि च विभूषणानि भवन्ति। एवं तानि यत्नपूर्वकं नानीतानि भवन्ति। सहजमेतत्सौन्दर्यम्। अत्र माधुर्यगुणानां प्राधान्यं तिष्ठति यत्समासरहितपदद्वारा व्यञ्जितानि भवन्ति, समासाधिक्यकरण एव ग्रसादगुणानां बाधा समापतति। एतन्मार्गस्य द्वितीयो गुणः प्रसादाख्यः, एतद्वारार्थावबोधोऽनायासेनैव सम्पन्नो भवति, तदर्थावगमेनैव रसा अप्यभिव्यञ्जिता भवन्ति। प्रसादने सह वक्रता तावन्मात्रेणैव स्थातुं शक्नोति यावत्सार्थावबोधे वाधिका न स्यात्। तृतीयो गुणो लावण्यम्, अस्य सम्बन्धः शब्दार्थैः सह। अनुप्रासाद्यलङ्कारा ह्येतद्गुणानयने सहायका भवन्ति। एतन्मार्गस्य चपुर्थो गुणः आभिजात्यम्, अत्र शब्दानां सुकुमारत्व-शालीनत्वाभ्यां सह सम्यग्योजनयस्यापि सौष्ठवं तिष्ठति।

विचित्रमार्गे—अलङ्काराणां प्राधान्यं भवति। एकोऽलङ्कारो द्वितीयेन गुम्फितस्तिष्ठति। सुकुमारशैल्यां स्वकीयानायिकावत् सहजमलङ्करणं भवति। विचित्रशैल्यां गणिकानायिकावत् कृत्रिमसज्जितशृङ्गाराणां तथालङ्काराणां प्रदर्शनं प्राप्तं भवति।

उपरोक्तयोर्द्वयोर्मध्ये द्वाभ्यामपि सादृश्यमनुभवन् मार्गो मध्यममार्ग इति व्यपदेश्यो भवति ।

त्रिविधशैलीनामुदाहरणेषु कालिदासस्य रचना सुकुमारमार्गे कथयितुं शक्यते । बाणभट्ट—भवभूति—राजशेखरादीनां रचना विचित्रमार्गे सञ्जातेति भणितुं शक्यते । मातृगुप्तमायूराजाद्याचार्याणां रचना मध्यममार्गेऽस्तीति वक्तुं शक्यते ।

समीक्षा—विभाजनमेतदधिकं सुन्दरं तु वरीवर्त्ति किन्तु पूर्णमिदमिति प्रतिपादयितुं न शक्यते । विभागेनानेन द्विविधमनोवृत्तीनामभिव्यञ्जनं भवति । यद्यपि सुकुमारमार्गो वैदर्भ्याः समानतां विचित्रमार्गश्च गौड्या आनुकूल्यं धारयतस्तथापि नैतानि सादृश्यानि पूर्ण-पूर्णरूपाणि सन्ति । गौड्यामोजोगुणस्य मात्रा तिष्ठति तस्या विचित्रमार्गे आवश्यकता नास्ति ।

ध्वनितमतादप्ययं कुन्तकः पूर्णपरिचितः । स्वग्रन्थे ध्वन्यालोकपद्यान्यपि सञ्जग्राह, किन्तु ध्वनेः समस्तप्रपञ्चस्यान्तर्भावः वक्रोक्तेः कल्पनाया उदात्तत्वम्, व्यापकत्वम्, बहुमुखीत्वञ्चाभिधाय तत्रैव कृतवान् । वक्रोक्तेर्व्यापकत्वाय (१) वर्णविन्यासवक्रता, (२) पदपूर्वार्धवक्रता, (३) परार्द्धवक्रता, (४) वाक्यवक्रता, (५) प्रकरणवक्रता, (६) प्रबन्धवक्रता । आसुमध्ये वाक्यवक्रतायां सर्वेषामेवालङ्काराणामन्तर्भावं दर्शयामास । तथा चोक्तं तत्र—

'वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालङ्कारवर्गोऽसौ सर्वोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥

(वक्रोक्तिजीवितम् १/२१)

यद्यपि रसानां प्रेयः ऊर्जस्विन्नलङ्कारयोर्मध्येऽन्तरर्भावं दर्शितवान् तथापि तेषां प्राधान्यमदत्वाऽपि नितान्तगौणत्वमपि नाङ्गीकृतवान् ।

उपचारवक्रतायाञ्च ध्वनितत्प्रचुरभेदांश्चान्तर्भावयामास । यादृशी भावनासीत्कुन्तकस्य तादृश्यमेव यद्युत्तरवर्त्याचार्याणां समभविष्यत्तदैतत्पराकाष्ठां नूनमे-

वावगमिष्यत्। परवर्त्तिन आचार्या हि रुद्रटप्रदर्शितदिशा वक्रोक्तिमेकं सामान्यं शब्दालङ्कारमात्रमेव स्वीचक्रुः।

(५) ध्वनिसम्प्रदायः

ध्वनिमतं रसमतस्यैव विस्तृतीकरणम्। रससिद्धान्तस्याध्ययनं मुख्यतया नाटकस्य सम्बन्ध एव सर्वप्रथमं भवति। अयं रसो न कदापि वाच्यः किन्तु व्यङ्ग्य एव सर्वदा भवति। एतत्स्वरूपादिकं प्रथमप्रघट्टक एव प्रदर्शितम्। रसस्य व्यङ्ग्यत्वमेव मनसि निधाय काव्ये व्यङ्ग्यस्यैव प्राधान्यं प्रदर्शितवानान्दवर्धनः। इत्थञ्च यदि काव्यस्यात्मा रसस्तदा ध्वनिः काव्यशरीरस्य बलप्रदायकप्राणशक्तिः। ध्वनिशब्दस्यार्थः अनुरणनम्(घण्टानादे जाते सति-प्रथमाघातानन्तरं बहुकालपर्यन्तं भूयमानझङ्कारशब्दः) तथाहि—'एवं घण्टानादस्थानीयः अनुरणनमात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः।' (ध्वन्यालोक ४/६७) लोचनटीका)। एकप्रकारेण ध्वनिरयमर्थस्याप्यर्थः, अत एवैनं शरीरमात्रात्किञ्चित्प्राधान्यं दीयते। वैदर्भ्यादिरीतिद्वारा वाक्यानां परस्परं सुसंबद्धत्वे जातेऽपि काव्ये कञ्चिदेकं विशेषवस्तु भवति तदेव मुक्तायाः कान्त्येव सौन्दर्यस्य प्रतीतिमुत्पादयति एतच्च प्रतीयमानमिति व्यपदिष्टं भवति। महाकवीनां वाणीष्वेवेदमङ्गनायाः प्रसिद्धावयावातिरिक्तं लावण्यमिव तिष्ठति। तथा चोक्तम्—

'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥'

(ध्वन्यालोकः १/४)

इदं च लावण्यं व्यञ्जनावृत्तिद्वारा समाधिगतं भवति। यत्र व्यङ्ग्यार्थो वाच्यार्थपिक्षया प्रधानमधिकचमत्कारि भवति तत्रैव स (व्यङ्ग्यार्थः) ध्वनेः स्वरूपधारणं करोति। साधारणव्यङ्ग्यार्थे ध्वनौ चेयमेव विशेषता भवति। सर्वे च व्यङ्ग्यार्था वाच्यार्थपिक्षया प्रधानभूता न भवन्ति। अत्र हि वाच्यार्थो गौणो भूत्वा पश्चादेव तिष्ठति। अर्थः अथवा शब्दः स्वस्यार्थम् (अभिधार्थम्) परित्यज्यं यं

विशेषार्थं (व्यङ्ग्यार्थं) प्रकटयति तमेव विद्वांसो ध्वनिमिति व्यपदिशन्ति । एतदेवोक्तम्—

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥'

(ध्वन्यालोकः १/१३)

रसादीनां प्रतीतिर्नाभिधया नापि शृङ्गारादीनामभिधानेन नापि लक्षणानुमानतात्पर्यस्मृतिभिः, किन्तु व्यञ्जनया, अभिधादिषु मुख्यार्थाभावात् ।

ध्वनिशब्दाय आलङ्कारिका वैयाकरणानामृणिनः सन्ति । वैयाकरणैर्हि स्फोटरूपमुख्यार्थाभिव्यक्तिविधायकशब्दाय ध्वनेः प्रयोगः कृतः । आलङ्कारिकैस्तु अस्मिन्नेव साम्ये ध्वनिशब्दं गृहीत्वा एतस्य विस्तृतो व्यापकश्चार्थो विहितः ।

तत्र वैयाकरणैर्हि 'परा, पश्यन्ती, मध्यमा, वैखरी' इति चतुर्विधां वाणीमभिधाय तिसृणां नियत्वमखण्डत्वं च व्यवस्थाप्य तुरीयां वाचं मनुष्या वदन्ति, इति प्रतिपादितं स्वशास्त्रे । यां वाचमस्माभिः श्रूयते सा वैखरीति व्यपदिश्यते । वैखरीशब्द एव व्यक्तशब्दः । स खलु व्यक्तशब्दो यं वयं शृणुमः, तस्य योऽर्थस्तन्मध्ये चैकस्फोटस्य कल्पना क्रियते यस्यार्थेन सह सम्बन्धस्तिष्ठति, अयं च सहैव प्रस्फुटितो भवत्यतः 'स्फुटति अर्थः अभिव्यक्तीभवत्यस्मादिति' व्युत्पत्त्या स्फोटपदव्यपदेश्यो भवति । अर्थव्यक्तिश्च स्फोटेन भवति । तथा चोक्तम्—

'पूर्वपूर्ववर्णानुभवाहितसंस्कारसचिवेनान्त्यवर्णानुभवेनाभिव्यज्यते स्फोटः' इति ।

यथा वर्णैः शब्दस्यार्थः प्रस्फुटितो भवति तथैवैकेनार्थेनान्यार्थोऽपि प्रस्फुटितो भवति । यथा भेरीदण्डसंयोगावियोगाभ्यां मुहुर्मुहुराघाते जनिते शब्द उपद्यते, एवं क्रमागततरङ्गैः । स शब्दोऽस्मत्कर्णगोचरो भवति तथैव शब्दस्य चरमेन ध्वनिना (Sound) शब्दस्यार्थव्यक्तिकारकः स्फोटो भवति एवं काव्ये अर्थस्यार्थव्यक्तिकारको ध्वनिर्भवति । स हि घण्टानादे जातेऽन्तिमः कर्मे गुञ्जायमानो झङ्कारवद्भ-

वति । यथा च व्यक्तशब्दोऽव्यक्तस्फोटं व्यक्तीकरोति तथैव शब्दार्थौ व्यञ्जनाद्वाराभ्यन्तरिकव्यङ्ग्यार्थं बहिर्भावमानयतः । तथा चोक्तं भर्तृहरिणा—

'यः संयोगवियोगाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः ॥' इति ।

ध्वनीनां येऽभिधामूलकलक्षणामूलकभेदास्ते तु प्रकृतग्रन्थस्य चतुर्थपरिच्छेद एव द्रष्टव्याः । मुख्यो भेदस्तु रसवस्त्वलङ्कारात्मकः ।

आनन्दवर्धनसमयपर्यन्तं (नवमशताब्द्या मध्यमभागपर्यन्तं) 'अमरुकशतक—आर्यासप्तशत्यादिमुक्तकग्रन्थानामेव वृद्धिरासीत्सर्वत्र राजसभादिषु । प्रबन्धकाव्येषु यादृशो रसपरिपाको भवति न तादृशो मुक्तककाव्येषु । समयेऽस्मिन् ध्वनिविचारस्यावश्यकतामनुभूयानन्दवर्धनो वाच्यात्पृथक् व्यङ्ग्यसत्तायाः व्यवस्थापनाय युक्तियुक्तपूर्वकं ध्वन्यालोकं प्रणिनाय । ध्वनेः प्रवर्त्तको ह्यमेवाचार्य इति कदापि न मन्तव्यम्, स्वग्रन्थप्रथमश्लोक एव प्रबलमतत्रयस्योपनिबन्धनं चकारायं ग्रन्थकारः । तेनैतत्पूर्वं केचिद् ध्वनेरभावं ब्रुवते, केचिच्च लक्षणायामन्तर्भावयन्ति, अपरे चानिर्वचनीयमेव प्रतिपादयन्ति । तत्रायमाचार्यो हि मतत्रयं खण्डयित्वा ध्वनिस्थापनां युक्तियुक्ताञ्चकार ।

आनन्दवर्धनस्य मतप्रचारे विरोधिनः समर्थकाश्चोभयरूपेणासन् । तत्र विरोधिषु मुख्यतमा आचार्याः—(१) वक्रोक्तिजीवितकारः कुन्तलः, (२) व्यक्तिविवेककारो महिमभट्टः, (३) दशरूपककारो धनञ्जयः । एते हि मुख्यतया ध्वनिखण्डनायैव स्वस्वग्रन्थं रचया । मासुः । तत्र यथायथमेतेषां मतं तत्तत्प्रकरण एव प्रदर्शितम् । ध्वनिसमर्थकेषु प्रधानाचार्याः—(१) ध्वन्यालोकस्य 'काव्यालोकलोचन' नामकटीकाकर्त्ता—अभिनवगुप्तपादाचार्यः, (२) काव्यप्रकाशकारो मम्मटः, (३) साहित्यदर्पणाद्यनेकग्रन्थकर्त्ता—श्रीविश्वनाथकविराजः ।

ध्वनिकारो यद्यपि ध्वन्यतर्गतमेव रसं स्वीकृतवान्, तथापि रसध्वनेः प्रधानतां प्रदत्तवानेव । इत्थञ्चालङ्कारभारेण भाराकुलं रससम्प्रदायं ध्वनिसम्प्रदायेनोन्मुच्य रस-सिद्धान्तोद्धारे समुचितं साहाय्यं प्रदत्तवानयमिति विभावनीयम् ।

अलङ्कारस्येतिहासे 'ध्वनि' कल्पना ह्यतिसूक्ष्मबुद्धिपरिचायिकाऽस्ति। ध्वनिचमत्कारं पाश्चात्यालङ्कारिका अपि मन्यन्ते। ध्वनिवादिनः सिद्धान्तानां व्यवस्थापकाः सन्तीत्यवधार्यते, यतस्तैः स्वपद्धत्यनुसारेण रस-दोषगुण-रीतीनां समस्तकाव्यतत्त्वानां सम्यक्सन्तुलितव्यवस्था विहिता। एतन्मतास्वीकारे परवर्त्तिदिग्गजविदुषामपि न काचन विप्रतिपत्तिरद्याप्यवलोक्यते।

(६) औचित्यसम्प्रदाया

औचित्यस्य भावना ध्वन्यादिसमस्तकाव्यतत्त्वानां मूलभावना। समस्तप्राचीनालङ्कारिका हि स्वस्वग्रन्थे चौचित्यरक्षायै सङ्केतं निर्दिर्दष्टवन्तः। तानेव पूर्वग्रन्थानालोच्य काव्यतत्त्वस्य व्यापकरूपमादातुं क्षेमेन्द्रेण 'औचित्यविचारचर्चा'नामको ग्रन्थो ग्रथितः। 'रसस्य जीवनभूतः प्राणः औचित्यमेव' इति स्पष्टं समुद्घोषितं तेन। तथाहि—

'औचित्यस्य चमत्कारकारिणश्चारुचर्वणे।
रसजीवितभूतस्य विचारं कुरुतेऽधुना॥' (का. ३)

किमिदमौचित्यमिति जिज्ञासायां 'यो यत्सदृशः, येन परस्परं सम्मिलनं भवेत् तदेवोचितम्। अथ चोचितस्य भाव औचित्यम्। तथा चोक्तमनेनैव—

'उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च गो भावस्तदौचित्यं प्रचक्षते॥' (का. ७)

अस्यौचित्यस्य पद-वाक्यार्थ-रस-कारक-लिङ्ग-वचनाद्यनेकस्थलेपूदाहरणानि प्रदर्श्य एतदभावस्यान्यत्र स्थितिञ्च प्रदर्श्य साहित्यरसिकानां महानुपकारः कृतः क्षेमेन्द्रेण। औचित्यस्य मूलतत्त्वमानन्देनैवोद्घाटितं ध्वन्यालोके—

'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा॥'

काव्यस्येदं मूलतत्त्वमिति ध्वन्यालोककारात्पूर्वमेव सिद्धान्तरूपेणाङ्गीकृतमासीत्। भरतेन नाटये पात्रेभ्यः देशस्यावस्थायाश्चानुरूपेण वेशविन्यास्योपदेशं दत्वैतत्तत्त्वोपर्य्येव विशेषाग्रहः प्रदर्शितः। तथाहि—

'अदेशजो हि वेशस्तु न शोभां जनयिष्यतिष।
मेखलोरसि बन्धे च हास्यायैवोपजायते॥' (ना. शा. २३/६९)

एत्कारिकाया भाष्यरूपमेव क्षेमेन्द्रस्याधोलिखितपद्यं दृश्यते—

'कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणः॥'

इतः पूर्ववर्त्तिभिरालङ्कारिकैः तत्त्वमेनमादायैव स्वस्वग्रन्थप्रणयनं चक्रुः। अतः क्षेमेन्द्रस्यैव नैवेयमुद्भावना किन्तु पूर्वपूर्वाचार्यैः सूचिता या भावना तामेव स्वग्रन्थे स्पष्टरूपेण प्रदर्शयामास तत्र भवानाचार्यः क्षेमेन्द्रः।

अयं च महानुभावः काश्मीरस्थो धनाढयब्राह्मणकुले समुत्पन्न आसीत्। सिन्धोः पौत्रः प्रकाशेन्द्रस्य पुत्रश्चायम्। एतत्पिताऽतिदानी आसीदिति च तद्ग्रन्थतो ज्ञायते। आचार्य 'अभिनवगुप्तपादा'त् साहित्यविद्यामधीतवान्। तथाचोक्तवान् बृहत्कथामञ्जर्याम्—

'श्रुत्वाऽभिवगुप्ताख्यात् साहित्यं बोधवारिधेः।
आचार्यशेखरमणेः विद्या विवृतिकारिणः॥'

काश्मीरराज्ञो डवन्तिवर्मणः (१०२८ ई० तः १०६३ पर्यन्तं) राज्यकाले विद्यमान आसीत्। शैवमण्डले विद्यमानोऽपि परमवैष्णव आसीत्। एतद्रचिताः—(१) रामायणमञ्जरी, (२) भारत-मञ्जरी, (३) बृहत्कथा-मञ्जरी, (४) दशावतारचरितम्, (५) बोधिसत्त्वावदानकल्पलता, (६) कलाविलासः, (७) चतुर्वर्गसंग्रहः, (८) औचित्यविचारचारुचर्या, (९) नीतिकल्पतरूः, (१०) समयमातृका, (११) सेव्यसेवकोपदेशः, इत्येते ग्रन्थाः साम्प्रतमनुसन्धानकुशलाः प्रदर्शयन्ति।

साहित्यदर्पणकर्तृत्वम्

साहित्यदर्पणकारो विश्वनाथः । अयं स्वकृतेः दर्पणस्य चतुर्थे परिच्छेदे । (२४४ पृ.) अलावद्दीनं निर्दिशति । 'यः कौमारहरः—' इति काव्यप्रकाशोदाहरण-विचारे जयन्तं स्मरति । काव्यप्रकाशस्य दर्पणव्याख्याने 'यदाहुः श्रीकलिङ्गभूमण्ड-लाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां **धर्मदत्तं** स्थगयन्तः सकलहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्री**मन्नारायण**दासपादाः' इत्युद्धि-रति । तत्र **अलावद्दीनः** (अलाउद्दीन मसऊद) दिल्लीपरिवृढः, यः ख्रिस्ताब्दे १२४६ मारितः । **जयन्तः** काव्यप्रकाशस्य दीपिकाव्याख्यान्ते संवत् १३५० अर्थात् ख्रिस्ताब्दं १३५०-५७ = १२९३ विलिखति । एवमेताभ्यामधस्तनो दर्पणकारो **विश्वनाथः** ख्रिस्ताब्दीयचतुर्दशशतकस्य पूर्वभागेऽवश्यं भवितुमर्हति । यस्मादयं कलिङ्गेश्वरस्य नरसिंहदेवस्य सभायां स्वपितामहं नारायणं निर्दिशति । स च नरसिंहदेवः 'अस्ति सप्तदशोत्तरद्वादशशतकवत्सरे (१२१७) चतुर्दशभुवनाधिप-त्यादिबिरुदावलीविराजमानः श्रीवीरनरसिंहदेवमहीपतिः स्वराज्यस्यैकत्रिंश-त्यङ्केऽभिलिख्यमाने सिंहशुक्लषष्ठ्यां सोमवारे' इत्यैतिहासिकफक्किकया ख्रिस्ताब्दे ११६० सिध्यति । यद्यपि १२९३-११६० = १३३ उक्तख्रिस्ताब्दयो-रन्तरं पुरुषत्रयपर्याप्तेः किंचिदधिकं प्रतीयते तथापि दर्पणे नारायणस्य वृद्धप्रपिता-महत्वेन लेखात्तन्नासमीचीनम् । प्रकाशदर्पणे नारायणस्य अन्ते दास-दर्शनात्, साहित्यदर्पणे दासादर्शनाद् व्यक्तिभेदस्तु नाशङ्क्यः । विश्वनाथात्मजस्य **अन-न्तदास**नामोपलम्भाद् विश्वनाथपितामहानुजस्य **चण्डीदास**स्यापि तथानामनिर्दे-शाच्च । दर्पणे विश्वनाथपित्रा **चन्द्रशेखरेण** वर्णितावुमाभानुदेवावपि नरसिंहमहीपतेरेवानुबन्धिनौ ज्ञायेते ।

विश्वनाथस्य नाम सांधिविग्रहिक-महापात्र-कविराजेत्युपाधिभिर्घटितं दृश्यते। तत्र सांधिविग्रहिक इति राज्याधिकारविशेषः। तदानीं विद्याप्रणयिनां कलिङ्गपार्थिवानां राज्याधिकारे विश्वनाथस्य पूर्वपुरुषास्तदनुबन्धिनः **श्रीधर-राघवानन्द-कृष्णानन्दप्रभृतयश्चासन्**। अत एतन्नामापि सांधिविग्रहिक-महापात्र-विशेषणाभ्यां भूषितम्। अत्र श्रीधर-राघवानन्दौ काव्यप्रकाशस्य टीका कृतावपि। **कृष्णानन्द**स्तु वैदर्भरीतिप्रधानस्य सहृदयानन्दाख्यस्य नलचरितमहाकाव्यस्य रचयिता। राघवानन्दनाम दर्पणस्य प्रथमपरिच्छेदे; सहृदयानन्दस्य 'सूचीमुखेन—' इति पद्यं सप्तमपरिच्छेदे वर्तते। सांधिविग्रहिक इति संधिविग्रहाधिकृतः। 'तत्र नियुक्तः—' (पा. सू. ४/४/६९) इति ठक्। एष उपाधी **राजतरङ्गिण्यादौ** सुप्रसिद्धः। महापात्रो ब्राह्मणविशेष इति केचित्, संज्ञेत्यपरे। ननु महामात्र इति संभावनीयम्। कविराज इति महाकविसमानार्थकम्। नतु अवध (अयोध्या) प्रान्तीयप्रधानहिंदीभाषायां 'भाट' इति प्रसिद्धब्राह्मणजातेरवगमकम्। श्रीनारायणचरणारविन्देत्यादि तु आस्तिक्यादिप्रदर्शनार्थम्। काव्यप्रकाश**दर्पणे** तु '...संगीतविद्याविद्याधर-कलाविध्यामालतीमधुकर-विविध-विद्यार्णवकर्णधार...' इति विश्वनाथस्य त्रीणि विशेषणान्यधिकानि। वस्तुतोऽयं महाकुलप्रसूतो बहुज्ञः सहृदयश्चेति। एतत्प्रणीतग्रन्थास्त्वेते ज्ञायन्ते—(१) राघवविलासमहाकाव्यम् (२) कुवलयाश्वचरितप्राकृतमहाकाव्यम् (३) चन्द्रकला नाटिका (४) प्रभावती नाटिका (५) षोडशभाषामयी प्रशस्तिरत्नावली (एतेषां निर्माणोत्तरं) (६) साहित्यदर्पणः (७) नरसिंहविजयम् (८) काव्यप्रकाशदर्पणः। एतत्पितुश्**चन्द्रशेखर**स्य पुष्पमाला नाटिका, भाषार्णव इति ग्रन्थद्वयी दर्पणतो व्यक्ता। तत्र—

'भाषामध्यमपात्राणां नाटकोक्तौ विशेषतः।
महाराष्ट्री सौरसेनीत्युक्ता भाषा द्विधा बुधैः॥

हीनैर्भाष्या विभाषा स्यात्सा च सप्तविधा स्मृता।
प्राच्यावन्ती मागधी च शाकारी च तथापरा॥

चाण्डाली शाबरी चापि तथाऽऽभीरीति भेदतः।'

इत्येतत्पुत्रस्य **अनन्तदा**सस्य लेखेन भाषार्णवस्वरूपमवसीयते । प्रशस्ति-रत्नावल्याः षोडशधा भाषाविभागो नावसीयत इति भूयान्खेदविषयः ।

विश्वनाथपूर्वपुरुषाणां कलिङ्गराज्यसंबन्धः स्फुट एव । किंच । "कुरु-रुचिम् इति पादयोर्वैपरीत्ये" इति काव्यप्रकाशप्रतीकमुपादाय तदीयदर्पणे "वैपरीत्यं रुचिं कुरु" इति पाठः । अत्र चिङ्कु—पदं काश्मीरादिभाषायामश्लीलार्थबोधकम्, उत्कलादिभाषायां 'घृतवाण्डकद्रव' इत्यादि" इति लेखाद् उत्कलदेशनिवासोपि वक्तुं सुशकः । आल्ब्रेट बेवरसाहिबास्तु ख्रिस्ताब्दीयपञ्चदशशतकमध्ये पूर्ववङ्गे ब्रह्मपुत्रतटे साहित्यदर्पणो व्यरचीति **जगन्मो**हनशर्मसंदृब्धचण्डकौशिकनाटकभू-मिकातोऽवसेयमिति विलिखन्ति ।

साहित्यदर्पणस्य हस्तलिखितानि त्रीणि मूलपुस्तकानि संकलितानि । तत्र प्रथममस्माकं पुस्तकालयस्थं शुद्धप्रायं १८१६ वैक्रमाब्दे लिखितम् ।

द्वितीय-तृतीये पुस्तके जयपुरराजगुरु-**श्रीनारायण**शास्त्रिणां पर्वणीकरोपा-ख्यानाम् । इमे प्राचीने पञ्चमपरिच्छेदपर्यन्ते, तदुत्तरं तु भिन्नलिप्या पूर्णीकृते ।

अथ चतुर्थं पुस्तकं रामचरणतर्कवागीशभट्टाचार्यकृतविवृतिसमेतं **श्रीच-ण्डी**चरणस्मृतिभूषणश्री**भूतनाथ**विद्यारत्नाभ्यां परिशोधितं कलिकाताराजधान्यां १९४२ वैक्रमाब्देमुद्रितम् इदं विश्वनाथेन प्राग् विप्रकीर्णानां विषयाणां संकलनार्थं लिखितं भवेत् । स च लेखनावसरः पञ्चमपरिच्छेदान्तग्रन्थस्यैव संभाव्यते, तदानी-मेतत्पूर्वार्धविषयाणां **काव्यप्रकाश**मपहाय परत्र संकलनाभावात्, काव्यप्रकाशेऽपि नायिकाभेदादिविषयसंकलनादर्शनात् । एतत्परार्धविषयेषु तु प्रायो **दशरूपक—काव्यप्रकाशा**वेव सहायभूताविति **न** विशेषतो लेखनपरिवर्तनावसर आपतित इति नातितिरोहितम् । तदेतद्वृत्तं **ग**-संज्ञकपुस्तकपाठान्तराण्यपि विचार्यमाणान्यवबोध-यन्ति । काव्यप्रकाशस्य आप्यायितप्रतिकृतितया साहित्यशास्त्रेऽप्रतिमोऽप्ययं **दर्पणः** स्वानुरूपया टीकया असंश्लिष्ट इति मन्यामहे ।

दर्पणस्य टीकाद्वयमस्माभिरुपलब्धम् । तत्र प्रथमा दर्पणकारस्यैव पुत्रेण **अनन्तदा**सेन कृता दर्पण**लोचना**ख्या सेयं प्रौढा संक्षिप्ता च । 'अत्ता एत्थ—'इत्यु-

दाहरणव्याख्यांशमादाय सप्तमपरिच्छेदान्तमेव नात्यशुद्धम्। अत्र सप्तमपरिच्छेदान्ते एवम्—'इत्यालंकारिकचक्रवर्तिध्वनिप्रस्थापनपरमाचार्यमहापात्रश्रीविश्वनाथात्मजश्रीमदनन्तदासकृतौ साहित्यदर्पणलोचने दोषनिरूपणो नाम सप्तमः परिच्छेदः समाप्तः।' द्वितीया, **रामचरण**तर्कवागीशभट्टाचार्यकृता दर्पणविवृतिः। अस्या निर्माणकालः—'अक्षिपक्षरसचन्द्र (१६२२) संमिते हायने शकवसुंधरापतेः' इति विवृतावेव निर्दष्टः। इयं विवृतिग्रन्थं योजयन्ती प्रमेयांशविचारे प्रौढिं प्रकटयन्ती सच्छात्राणामुपकर्त्रीति न संदेहः। किंतु बहुत्रात्र प्रतीकविकलो विरलार्थप्रतिपादकश्च लेखो मूलं च नियन्त्रयतीति मूलानुपूर्वीगवेषणे महान् क्लेशः। क्वचित् क्वचिच्च श्लोकानां संक्षिप्त व्याख्यानं व्याकरणांशशून्यं चेति। अस्या विवृतेर्हस्तलिखितानि त्रीणि पुस्तकान्यासादितानि। तत्र प्रथममस्माकं पुस्कालयस्थं शुद्धप्रायं नवीनम्। एतत्पत्राणि ३०४ प्रतित्रं पङ्क्त्यः १२। द्वितीयं पुस्तकं पूना-डेक्कनकालेजस्थं नात्यशुद्धं द्विशतीवर्षलिखितमिवोपलक्ष्यामाणम्। तृतीयमपि पूना-डेक्कनकालेजस्थं शुद्धं प्राचीनम्। इदं पुस्तकं तु प्रथमतः १५० पत्रैः खण्डितं किंचिदूनसप्तमपरिच्छेदाद् दशमपरिच्छेदान्तमेव। इमे द्वितीयतृतीयपुस्तके डाक्टर एस्. के. बेलवलकर एम्. ए. महाशयैः गवेषिते। इदं पुस्तकत्रयं पुस्तकान्तरनाम्ना व्यवहृतम्। प्रागुक्तं मूलेन सह मुद्रितं चतुर्थं विवृतिपुस्कं तु मुद्रितनाम्नैव व्यवहृतम्। तदेतन्मुद्रितपुस्तकं वङ्गक्रोडपत्रलेखमिश्रम्।

इत्थं मूलस्य विवृतेश्च पुस्तकचतुष्टयाधारेण प्राक् १९०२ ख्रिस्ताब्दे मुम्बापुर्या निर्णयसागराख्ये यन्त्रालये मुद्रितस्यैव साहित्यदर्पणस्य विवृत्या विवृतिपूर्त्या च सहितं द्वितीयसंस्करणं प्राप्यते।

रामचरणतर्कवागीशभट्टाचार्यैर्विरचिता विवृतिरेव बहुगुणसंपन्नेति मन्यमानेन मयका तदाराधनाय विशेषानेव विचिन्वता **छायाख्या** विवृतिपूर्तिर्व्यधायि। इह प्राचामर्वाचां चालंकारिकाणां संदर्भेभ्यो विशिष्टभागं शब्दतस्तात्पर्यतश्चानूद्य मांसलीकृतो दर्पणविवृत्यनुक्तविषयो यत्नतो न्यासि। अनुक्तत्वेन ज्ञायमाना अपि नातिप्रयोजनीया उक्तिमुद्रादिकाः। क्वचित्क्वचित्तु नातिप्रयोजनीया अपि सूक्त्यः संवादसौष्ठवाय। किं बहूक्त्या विवृतिपूर्तिटीकाविषये प्राप्यते एष श्लोकः।

'मूलं वा व्याकृतिं वा किमपि विरचयेत्पूर्वतोहारि पूर्वं
किंवा पूर्वानुरूपं सहृदयहृदयावर्जकं संग्रहं वा।
भ्रातर्भूयस्त्वपङ्काः परकृतिकलनापिच्छिला ये प्रबन्धा
ग्रथ्यन्ते तैरिदानीं समयगमनिकामन्तरा कोऽस्ति लाभः ॥'

अथैका नूतना, बी.ए. उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण विरचिता साहित्यदर्पणस्य विमलाख्या व्याख्या कलिकाताराजधान्यां मुद्रिता। द्वितीया नूतनतरा, काव्यतीर्थविशेषणान्तरश्रीगुरुनाथविद्यानिधिभट्टाचार्येण संपादित हित्यदर्पणमूलविवृतिसंस्कृतिः। यत्र १९०२ खिस्ताब्दे मुम्बापुर्यां मुद्रितस्य अस्मत्साहित्यदर्पणपुस्तकस्य भूमिका-टिप्पणीभागावपहृताविति ज्ञेयम्। तृतीया नूतनतमा, गौडशिवदत्त—कविरत्नेन संपादिता रुचिराख्यटीका।

अथ साहित्यदर्पणे प्रसंगादुद्धृतानां ग्रन्थकाराणां समयादिकमकारादिवर्णक्रमेण एवं निरूपयितुं शक्यते—

इहेयं गउडवहस्य गाहा न विस्मरणीया—

'कालवसा णासमुवागयस्स सप्पुरिस-जस-सरीरस्स।
अट्ठि-लवायन्ति कहिं पि विरल-विरला गुणुग्गारा ॥ ९४५ ॥'

साहित्यदर्पणः

विश्वनाथस्य। जम्बुराजधान्यां १४४० शकाब्दे १३८४ खीष्टाब्दे लिखितः साहित्यदर्पणः समुपलभ्यते। अतोऽयं ग्रन्थस्ततः प्रागेव रचित इत्यत्र नास्ति विचिकित्सालेशोऽपि।

"सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
अल्लावद्दीननृपतौ न सन्धिर्नच विग्रहः ॥"

एतस्मिन् साहित्यदर्पणीयश्लोके यवनराजस्य आल्लावद्दीनस्य नामोल्लेखो वर्त्तते। "सुलतान् आल्लाउद्दीन् खिल्जि" इति नाम्ना प्रसिद्धिं गतो यवन-

राज एव। अयं च यवनराजो विषप्रयोगेण १३१६ खीष्टाब्दे एव व्यापादितः। "सुलतान्" शब्दस्तावत् सुरत्राणरूपेण संस्कृतभाषायामत्र व्यवहृतः। गङ्गाम्भसि सुरत्राण" इत्यस्मिन् श्लोकव्याख्याने तदेव प्रदर्शितं टीकाकारैः। "सन्धौ सर्वस्वहरणम्" इत्यादिसाहित्यदर्पणश्लोके आल्लावद्दीननृपस्य नामोल्लेखनाद् विश्वनाथस्य तत्समकालीनत्वं त्रयोदशशततम (१३००) खीष्टाब्दोद्भवत्वं तत्परवर्त्तित्वं वा समापतति।

१३८४ खीष्टाब्दे लिखितस्य ग्रन्थस्य समुपलम्भाद् विश्वनाथ आल्लावद्दीनसमकालीन इत्यनुमीयते। साहित्यदर्पणकरणादनन्तरमनेन नरसिंहविजयाख्यं खण्डकाव्यं व्यरचि।

तत्रत्याः कतिपये श्लोका लोचनटीकायां विश्वनाथकृतायां काव्यप्रकाशस्य दर्पणाख्यायां व्याख्यायां चोद्धृता दृश्यन्ते।

उत्कृष्टकलाजालसमुद्भासितत्वादुत्कल इत्यन्वर्थं नाम भजमाने कलिङ्ग इत्यपरेण नाम्नापि सर्वत्र प्रसिद्धिमासादिते देशे नरसिंहनामानो बहवो राजानो जननं भेजिरे। तेषु कस्यचिन्नरसिंहस्य सभायामेतस्य कवेः पितामहो नारायणः परां प्रतिष्ठां सम्प्राप्यासीदिति।

"श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां धर्म्मदत्तं स्थगयन्तः सकलसहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीमन्नारायणपादाः" इति पाठादवगम्यते काव्यप्रकाशटीकायां दर्पणाभिधायां स्वकृतायां तादृशोऽपि पाठः समुल्लसति।

परं तु मुद्रितानां साहित्यदर्पणानां तृतीये परिच्छेदे "तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम्" इत्येवंविधः पाठो दृश्यते। अत्र वृद्धप्रपितामह इति पाठस्तु भ्रममूलक एव। यदि नारायणस्तस्य पञ्चमपुरुषः वृद्धप्रपितामहः स्यात्तर्हि विश्वनाथः कस्यापि नरसिंहनृपतेः सभायां नैव सम्भवेत्। तस्य जनिस्तु पञ्चदशशताब्द्यां समापतेत्।

साहित्यदर्पणशेषे "श्रीमन्नारायणचरणारविन्दमधुव्रत" इत्याद्युक्त्या चन्द्रकलायाः प्रारम्भे "नारायणचरणारविन्दमधुकरीभूतः इत्युक्त्या च पितामह एव स्मृतः कविनेत्यप्यायाति । विश्वनाथेन विजयनरसिंहाख्यं काव्यमेकं विरचितम् । तदुक्तं तस्य पुत्रेणानन्तदासेन लोचन्याम् । यथा मम तातपादानां विजयनरसिंहे ।

निःश्वासोद्धातवातप्रसरधुतकुलाहार्य्यमुद्धातदंष्ट्रा-
जातज्योतिः स्फुलिङ्गप्रकरविरचितोल्कानिकायाभिशङ्काः ।
अर्धे पारीन्द्रमर्धे नरमहह महालोकमालोक्य लोकाः
स्तोकास्तोकावशेषाः शरणमुपययुर्वारिधिं वारिधिं वा ॥ इति ।

आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे ॥ इति च ।

अतो विश्वनाथेन कस्यापि नरसिंहपतेः प्रशस्ती रचिता । अतएव ज्ञायते विश्वनाथः कस्यापि नरसिंहाख्यस्य राज्ञः सभायामासीदिति ।

परं विश्वनाथस्य पिता चन्द्रशेखरो भानुदेवनृपतेः सान्धिविग्रहिक आसीदिति । यथा तातपादानां चतुर्दशभाषाविलासिनीभुजङ्ग महाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम्—

दुर्गालङ्घितविग्रहो_राजत्युमावल्लभ इत्यत्र प्रकरणेनाभिधेये उमावल्लभशब्दस्य उमानाम्नी महादेवी तद् वल्लभे भानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोद्धयते । भानुदेवनृपतेः प्राकरणिकत्वात्तस्यैव राज्ञः प्रशस्तिपरोऽयं श्लोकः ।

परं भानुदेवनामानो बहवो नृपतय उत्कलस्य सिंहासनमलञ्चक्रुः । अतस्तेष्वन्यतमस्य भानुदेवस्य सान्धिविग्रहिकोऽयम् । तत एवानेन महापात्रोपाधिर्लब्धः । चन्द्रशेखरश्चतुर्दशसु भाषासु पण्डितः महाकविश्चासीत् । अनेन भाषार्णवो नाम भाषाप्रतिपादको ग्रन्थः कृतः । पुष्पमालाभिधाना नाटिका चास्यैव कृतिः । तत्कृतग्रन्थोक्ता बहवः श्लोकाः साहित्यदर्पणे उदाहरणत्वेनोपन्यस्ताः समुपलभ्यन्ते । विश्वनाथेन पितुरेवाष्टादशसु भाषासु पाण्डित्यं समासादितमिति "निजजनकसम-

धिगत साहित्यतत्वस्य" इति चन्द्रकलानाटिकान्तःपातिनी स्वकीयैवोक्तिः प्रतिपादयति। महापात्रोपाधिस्तु न तत्कुलपारम्पर्य्यक्रमागतः किन्तु लोकोत्तरपाण्डित्यबललब्धः स एव उपाधिर्विश्वनाथस्य तदीयजनकस्य च। तस्य पितामहादयो दाससंज्ञका एवासन्। ते च नारायणदासचण्डीदासानन्तदासादयः। अतो विश्वनाथेनैव पिता महापात्रोपाधिकत्वेन पितामहस्तद् भ्राता च नारायणचण्डयभिधानौ दासोपाधिकत्वेन संकीर्त्तिताः। अधुनाप्युत्कलप्रदेशे महापात्र इति राजप्रदत्तोपाधिभूषिता ब्राह्मणा दृश्यन्ते, परं तदुपाधिस्तु एतेषामिदानीं कौलिकः संजातः। साम्प्रतं सामन्तापरनामानो महापात्रोपाधिभूषिताः कौशिकदासा उत्कलप्रदेशे वर्त्तन्ते। परमयन्तु कपिञ्जलदास आसीत्। तदुक्तं तत्पुत्रेणानन्तदासेन

"आसीत्कपिञ्जलकुलक्षीराकूपारचन्द्रमाः।
त्रिकलिङ्गाधिपधराधामधीसचिवः कृती॥ इति।

अधुनाप्येतस्मिन्प्रदेशे कपिञ्जलसगोत्रा दाससंज्ञका ब्राह्मणा वर्त्तन्ते।

विश्वनाथो निश्शङ्कभानुदेवनरपतेः सान्धिविग्रहिक आसीदिति तदीयचन्द्रकलानाटिकातः सुस्पष्टं विज्ञायते। तद्यथा

"आर्य्ये! पश्य पश्य—अयमिदानीं यवनपुरन्ध्रीवर्गनिर्गलदविरलनयनजलधारानिर्धौतगिरिकन्दरो निजभुजप्रतापतपनसमुत्सादितारातितिमिरनिकरश्चोलकोशललवङ्गट्टावङ्गकोचकाञ्चीगौडकालमच्छम्लेच्छनटकर्णाटप्रमुखराजराजीवराजिरजनीकरः सकलगुणरत्नरत्नाकरो निखिलानवद्यविद्यानिधिरर्थिकुलकल्पद्रुमः सभामध्यास्ते गजपतिर्महाराजाधिराजस्त्रिकलिङ्गभूमण्डलाखण्डलः श्रीमान् निश्शङ्कभानुदेवः

आच्छन्ने धर्मधाम्नि प्रखरहयखुरक्षुण्णपृथ्वीरजोभिः
क्षिप्ते नक्षत्रलक्षे नभसि करिवरोद्धूतगङ्गापयोभिः।
ज्योत्स्नाभिः कीर्त्तिचन्द्रे धवलयति जगज्जैत्रयात्रावकाशे
गौडक्ष्मापाललक्ष्मीर्व्यरचयदचिरादेव यस्याभिसारम्॥

तस्मादस्माकमिदानीं चतुर्दशभाषाविलासिनीभुजङ्गमहाकविनिखिलानवद्यविद्यामहोदधिराजहंसमहापात्रश्रीचन्द्रशेखरतनूजन्मनः श्रीमन्नारायणचरणारविन्दमधुकरीभूतचेतसो निजजनकसमधिगतनिखिलसाहित्यतत्त्वस्य नाट्यवेददीक्षागुरोः सहृदयैकबान्धवस्य गजपतिमहाराजसान्धिविग्रहिकमहापात्रश्रीविश्वनाथकविराजस्य कृतिमभिनवां चन्द्रकलानामनाटिकामभिनेतुमुचितोऽयं समयः।" इति।

निश्शङ्कोपाधिको भानुदेवनृपतिर्विश्वनाथस्य परिपोषक आसीत्। तत्पुत्रेणानन्तदासेनापि निश्शङ्कभानुदेवनृपतेः प्रशस्तिवर्णनं कृतम्। तदुक्तं सप्तमपरिच्छेदे लोचनेयथा मम—

प्रौढामादाय भीतिं मनसि सरभसं प्राप्य लोकापकीर्त्तिं
नैव स्तोकाऽप्यपेक्षाऽक्रियत पथि पथि प्राक्तनासु प्रियासु।
श्रीमन्निश्शङ्कभानोः समरपरिसराद्भीमनिस्सीमसेना-
निश्शाणस्वानशङ्काकुलमपसरता पञ्चगौडेश्वरेण॥

इति दशमपरिच्छेदे रूपकालङ्कारव्याख्यानेऽपि—

अस्ति स्वस्त्ययनं श्रियः सुचरितं द्राघीयसः श्रेयसः
सौन्दर्यस्य रसायनं निरवधेः शीलस्य लीलायितम्।

विद्यानामधिदैवतं निरुपधेः शौर्यस्य विस्फूर्जितं
श्रीभानुस्त्रिकलिङ्गमङ्गलपदं गङ्गान्वये भूपतिः॥

इति च विश्वनाथेन तत्पुत्रेणान्तदासेन च नृपतिनिश्शङ्कभानुदेवस्य प्रतापो वर्णितः। तस्य गौडराजपराजयस्तूभाभ्यामेव प्रदर्शितः। कलिङ्गनृपतेर्निश्शङ्कभानुदेवस्य गौडेन्द्रविजयं विषयीकृत्य राजा कण्टकं शोधयति इत्यस्यमेव प्रवादस्तदानीं प्रादुरभूत्। अतस्तेन राज्ञः कीदृशी प्रसिद्धिरभूदितीत्यत एवावगम्यते। किञ्च रूढौ सारोपगौण्या लक्षणलक्षणाया उदाहरणत्वेन तदेव वाक्यमुपन्यस्तं विश्वनाथेन।

कलिङ्गाः साहसिकाः इत्यपि प्रवादो यवनराजविजयमूलक एव। एतदपि वाक्यं रूढौ लक्षणाया उदाहरणत्वेन तेनैवोपन्यस्तम्। तदानीं गौडदेशो यवननृपतिभिः शासितोऽभूत्। यवनानां कलिङ्गे प्रवेशो नासीत्। कलिङ्गस्तदा स्वाधीनानां हिन्दुनृपतीनां छत्रच्छायाश्रित एवावर्त्तति। अतः कलिङ्गस्य स्वाधीनताहरणे यवननृपतीनां यत्नस्तु गरीयानासीत्। कलिङ्गनृपतिभिरपि बाहुबलेनैव स्वाधीनता रक्षिता। परं यवननृपतिभिः साकं कलिङ्गानां सर्वदैव विग्रहोऽभूत्, अतो गौडदेशशासितारो नृपतयः कण्टकत्वेनैव व्यपदिष्टाः कलिङ्गनृपतिभिः।

अतएव तद्विजेतुः कलिङ्गनृपतेर्निश्शङ्कभानुदेवस्य गौडेन्द्रविजयं विषयीकृत्य, 'राजा कण्टकं शोधयति' इत्ययमेव प्रवादस्तदानीं प्रादुश्भूत्। इत्यत एव भानुदेवस्य यवनराजजयेन कीदृशी प्रतिष्ठाभूदिति सुस्पष्टं ज्ञायते।

किञ्च रूढौ सारोपगौण्या उदाहरणत्वेन तदेव वाक्यमुपन्यस्तं विश्वनाथेन। 'कलिङ्गाः साहसिकाः' इत्यपि प्रवादो यवनराजजयमूलक एव। एतदपि वाक्यं रूढौ लक्षणायां उदाहरणत्वेन तेनैवोपन्यस्तम्।

विश्वनाथेन नरसिंहस्य निश्शङ्कभानुदेवस्य चोभयो राज्ञोर्वर्णनात्स तयोः सान्धिविग्रहिको महापात्र आसीत्।

द्वितीयनरसिंहस्य नृपतेः पुत्रो द्वितीयो भानुदेवः निश्शङ्कभानुनाम्नाऽपदिश्यते। द्वितीयनरसिंहस्तु १३०६ ख्रीष्टाब्दं यावद् राजाभूत्। ततः परं तस्य पुत्रो द्वितीयो भानुदेवो राजाऽभूत्। उभयो राज्ञोर्बहूनि दानपत्रादीन्युपलभ्यन्ते। तदानीं सुलतान् अल्लाउदीन् महम्मदसाखिलजि" यवननपतिरासीत्। तदानीं नरसिंहेन नरपतिना गौडेन्द्रो यवनराजः पराजितः। 'चतुर्थनरसिंहनृपतेर्दानपत्राज् ज्ञायते यद् द्वितीयभानुदेवेन गियास्उद्दीन्यवनराजः पराजितः। यवनराजोऽयं 'गियासउद्दीन्नामा तदानीं गौडेन्द्र आसीत्। अतो विश्वनाथेन तत्पुत्रेणाऽपि' निश्शङ्कभानुदेवस्य गौडविजयो यवनराजजयश्च दर्शितः। अयं द्वितीयो भानुदेवः पराक्रमेण निश्शङ्क आसीदिति तस्य निश्शङ्क इति सार्थक उपाधिरासीत्।

अतो विश्वनाथस्त्रयोदशशताब्द्या अन्तिमे भागे द्वितीयनरसिंहनृपतेः चतुर्दशशताब्द्याः प्रथमे भागे द्वितीयभानुदेवस्य निःशङ्कोपाधिकस्य च सान्धिविग्रहिकमहापात्र आसीदिति नास्ति शङ्कावकाशः ।

तस्य पित्रा चन्द्रशेखरेणापि भानुदेवस्य वर्णनं कृतम् ।

स तु प्रथमो भानुदेवः १२६४ शताब्द्याः परं बभूव । विश्वनाथस्य पितामहो नारायणदासः प्रथमनरसिंहस्य सभायामासीत् ।

स च १२६४ खीष्टाब्दं यावदुत्कलप्रदेशस्य नृपतिरासीत् ।

तेन सुप्रसिद्धं कारुकलोद्भासितं कोणार्के सूर्य्यमन्दिरं निर्मितम् । स तु लोके लाङ्गुलानरसिंह इति ख्यातः । तेनापि बहवो यवननृपतयः पराजिताः ।

एतेषां चतुर्णामुत्कलनरपतीनां प्रशस्तिर्वर्णिता वासुदेवरथसोमयाजिना गङ्गवंशानुचरितचम्पूकाव्ये यथा—

तस्मादासीन्नृसिंहो नृपतिरतिकृती कोपनो यत्र दुष्टे
स्पष्टं लांगूलमाविर्भवति स च ततो नाम तत्पूर्वमाप ।
यस्यारीणां चरोक्तेर्महमभि सरुषो गाढमापीड्यमानं
'मुष्टिद्वन्द्वं न्यमज्जत्किल भुजवलिनोट्टङ्कितं राजपट्टे ॥

श्रीशप्रासादबन्धाद्भुतकृतिकृतिनाऽनङ्गभीमेन राज्ञा
बद्धस्पर्द्धोऽतिमात्रोऽपरमवनितले कीर्त्तिसम्पत्तिलिप्सुः ।
कोणार्कक्षेत्रपृष्ठे विपुलतमपृथूच्छायमुत्साहशाली
सौरं प्रासादमेकं व्यरचयदचिरान्नारसिंहोऽवतारः ॥

दृप्यद्दुर्जनसंघसंहृतिपटुः प्रत्यर्थिनिग्रन्थने
'दक्षो दक्षिणसत्तमो गुणिगणे सम्भूतसम्भावनः ।
पुत्रान् प्राणपणं पितेव परमप्रेम्णा प्रजाः पालयन्
क्षमापृष्ठेसमाः समाः समतनोत्साम्राज्यमत्यूर्जितम् ॥

पादं कुर्वन् क्षमाभृत्कुलशिरसि वहन् मण्डलं रज्यमानं
दोःशुष्मोष्मातिरेकी दिशि दिशि जनयन् यः करोदञ्चानानि।
सोऽसौ भुक्त्वैव भोगानृतुननयनमितान् वत्सरान् साङ्कमासान्
चण्डिम्ना स्वेन पङ्कानिव रिपुकुभुजोऽशोषयद् वीरभानुः ॥

तस्मादुद्दामबाहुद्रविणविदलितानन्तसामन्तनारी-
शुम्भद्वक्षोजकुम्भप्रसृमरमकरीप्रोञ्छनप्रौढलीलः।
लिम्पन् दिक्चक्रवालं धवलतरयशश्चन्दनाम्भश्छटाभि-
र्भूपृष्टं तातपादैः समसयमशाद् भीमपूर्वो नृसिंहः ॥

'पक्षं कञ्चन नेक्षते रणमुखे चापं च नापेक्षते
नैवाशंसति दंशनं वितनुते सेनारसे नादरम्।
उद्यद्दुर्दमदोर्द्वयीस्फुटतरास्फोटावधूतद्विषो
यस्यासीदुपयोगशून्यमखिलं साङ्ग्रामिकं वस्तु यत् ॥

तस्मान्निःशङ्कभानुः परमुदयमधाद् दानशौण्डाधिकारे
यश्चासीदग्रगण्यो गुणिगणगणने यं पुरो भावयन्ति।
यद्दोर्दण्डप्रतापादवनितलमभूत्सर्वथा निष्प्रकम्पं
गायत्रीवर्णसंख्याः स जगति शरदश्चक्रवर्त्तित्वमार्च्छत् ॥

श्रीहर्षस्य नैषधचरिताद्धवः श्लोकाः, प्रसन्नराघवरचयितुर्जयदेवस्य 'कदली कदली' इत्यादिश्लोकः, गीतगोविन्दकारस्य जयदेवस्यापि 'हृदि बिसलताहारो नायं भुजङ्गमनायकः' इति श्लोकोऽप्येतेनोदाहरणत्वेन प्रदर्शिताः। एते सर्वेऽपि कवयो द्वादशशताब्द्यामेवासन्। पञ्चदशशताब्द्याः प्रारम्भकाले सम्भूतेन कुमारस्वामिना नामोल्लेखनपूर्वकं साहित्यदर्पणात्पाठ उद्धृतः। अतो विश्वनाथकविराजश्चतुर्दशशताब्द्यामासीदिति नास्त्यत्र शङ्कालेशोऽपि। 'यावत्प्रसन्नेन्दुनिभानना' इत्यन्तिमश्लोकस्य 'श्रीमन्नारायणचरणारविन्दमधुव्रत' इत्यस्य च दर्शनाद् विश्वनाथकविराजं वैष्णव इति केचित् सम्भावयन्ति। परमसौ यथार्थतो न सम्प्र-

दायभुक्तो वैष्णवः । उत्कले ब्राह्मणाः प्रायशः पञ्चानां देवानामुपासकाः । विश्वनाथकविराजोऽपि तथैवासीत् ।

अतस्तेन 'मूर्धव्याधूयमान' इति श्लोके शिवस्य स्तुतिः कृता । चन्द्रकलारम्भेऽपि—

जीयासुः शफरायमाणशशभृल्लेखास्खलत्कैरव-
व्रातोद्भ्रान्तमधुव्रतव्रजमिषादुत्क्षिप्तनीलांशुकाः ।
बिभ्रत्यो गिरिजाकटाक्षपतनादादित्यजासङ्गमं
नृत्यद्भर्गकिरीटकोटिचपलाः स्वर्गापगावीचयः ॥

इत्यस्मिन् श्लोके शिवस्य वर्णनं कृतम् ।

विश्वनाथकविराजादर्वाचीना बहवोऽलङ्कारनिबन्धकारास्तद्व्याख्यातारश्च दृश्यन्ते । तेषु तावत्केशवमिश्रः अप्पय्यदीक्षितः जगन्नाथश्च प्रधानाः ।

केशवमिश्रस्तु माणिक्यचन्द्रनृपतेरनुरोधेनैव अलङ्कारशेखराख्यं ग्रन्थं प्रणीतवान् । अयं केशवमिश्रः शौद्धोदनिकृतानि कारिकारूपाणि सूत्राणि मूलत्वेनोपसंगृह्य तदुपरि वृत्तिं निर्बबन्ध । तदुक्तमलङ्कारशेखरे तेनैव—'अलङ्कारविद्यासूत्रकारो भगवान् शौद्धोदनिः परमकारुणिकः स्वशास्त्रे प्रवर्तयिष्यन् प्रथमं काव्यस्वरूपमाह' इति ।

माणिक्यचन्द्रस्तावत् १५६३ ख्रीष्टाब्दे कलिङ्गदेशे नृपतिरासीत् । अतः षोडशशताब्द्या अन्तिमभागे रचितोऽयं ग्रन्थः केशवमिश्रेण । अप्पय्यदीक्षितेन संस्कृतभाषायां परःशता ग्रन्था विरचिताः । तेन वृत्तिवार्त्तिकं, कुवलयानन्दः, चित्रमीमांसा चेति निबन्धत्रयमलङ्कारे कृतम्, तेन कुवलयानन्दे वेङ्कटपतिर्वर्णितः । विजयनगरस्य प्रथमवेङ्कटपतिना १६०१ ख्रीष्टाब्दे प्रदत्तं दानपत्रमुपलभ्यते । अतोऽयं दाक्षिणात्यः षोडशशताब्द्याः प्रान्तभागे सप्तदशशताब्द्याः प्रथमभागे चासीत् । अप्पय्यदीक्षितस्य कनीयान् भ्राता अच्चादीक्षितस्य नप्ता नीलकण्ठदीक्षितः ४७३८ गतकलिकाले १६३७—१६३८ ख्रीष्टाब्दे नीलकण्ठविजयकाव्यमरचयत् । एते-

नापि अप्पय्यदीक्षितः सप्तदशशताब्द्याः प्रथमार्द्धे आसीदिति प्रतीयते । अप्पय्यदीक्षितेन सिद्धान्तलेशाख्यग्रन्थसमाप्ताविदं लिखितम् ।

विद्वद्धुरोर्विश्वजिदध्वरस्य श्रीसर्वतोमुखमहाजितयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रिचतचन्द्रमौलिरप्पय्यदीक्षित इति प्रथितस्तनूजः ॥

साहित्यदर्पणोऽतीव सुगमः । ध्वन्यालोककाव्यप्रकाशादिषु प्रतिपादितानामर्थानां प्रतिपादकेष्वस्मिन् साहित्यदर्पणे बहुषु स्थलेषु नवीनत्वमनुभूयते । 'अत्रैव साहित्यराज्यसम्राजो मम्मटस्य मतखण्डनेन रसस्य काव्यात्मत्वं प्रतिपादितम् । इतः प्राचीनेषु भरतशास्त्रदशरूपकभिन्नेष्वलङ्कारशास्त्रेषु दृश्यकाव्यस्य चर्चापि नासीत् । परमत्र दृश्यकाव्यं तथा नायकनायकादिकमपि विस्तरेणैव प्रपञ्चितम् । काव्यप्रकाशवत् साहित्यदर्पणोपि कारिकावृत्त्युदाहृतिभिस्त्रिधा विभक्तो निरूपितः । तत्र कारिकावृत्तयश्च स्वीया एव । उदाहृतयस्तु स्वीयाः परकीयाश्च । अत्र प्रमेयाणामुपपादनं प्रायेण प्राञ्जलमेव । यत्तु क्वचिद् गहनं तद्विषयनिबन्धमूलकं । नतु लेखकाठिन्यमूलकम् । साहित्यशास्त्रस्य दुरधिगमा दुर्बोधाश्चापि विषया अत्र तथा प्राञ्जलं प्रकटीकृता यथा सुकुमारमतीनामपि विद्यार्थिनां सुबोधाः सुगमाश्च भवेयुः । अतोऽलङ्कारशास्त्रे व्युत्पित्सूनामेकमेवालम्बनमेतच्छास्त्रम् । ग्रन्थावसाने कविनापि तथोक्तम्—

साहित्यदर्पणममुं सुधियो विलोक्य ।
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥

तस्य पुत्रेणानन्तदासेन लोचनारम्भे एतदेवोक्तम्—

आसीत् कपिञ्जलकुलक्षीराकूपारचन्द्रमाः ।
त्रिकलिङ्गाधिपधराधामधीसचिवः कृती ।

अशेषभाषारमणीभुजङ्गः साहित्यविद्यार्णवकर्णधारः ।
वन्यध्वनिप्रौढधियां पुरोगः श्रीविश्वनाथः कविचक्रवर्ती ॥

स्वल्पाक्षरः सुबोधार्थः प्रध्वस्ताशेषदूषणः ।
साहित्यदर्पणो नाम ग्रन्थस्तेन विनिर्मितः ॥

पारं साहित्यविद्याब्धेर्गन्तुं वाञ्छन्ति ये क्षितौ ।
कृतिरेषा तरिस्तेषां विश्वनाथमहाकवेः ॥

श्रव्याभिनेयालङ्कारतत्त्वं सत्कविसम्मतम् ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

सकलप्रयोजनमौलिभूतः समनन्तरमेव रसास्वादसमुद्भूत आनन्द एव काव्यस्य प्रयोजनम् । तत्र प्रयोजनं नाट्यशास्त्रे भरतेन सम्यक् प्रतिपादितम् । तथाहि—

वेदविद्येतिहासानामर्थानां परिकल्पनम् ।
विनोदकरणं लोके नाट्यमेतद् भविष्यति ॥ (नाट्यशास्त्रे)

"तथापि प्रीतिरेव प्रधानम् । प्राधान्येन आनन्द एवोक्तः, प्रीत्यात्मा च रसस्तदेव नाट्यम् । नाट्यमेव च वेद इत्यस्मदुपाध्यायः" (ध्वन्यालोकलोचने) अत एवानन्दः काव्यस्य मुख्यं फलम् । अवान्तरप्रयोजनानि तु ग्रन्थकारैस्तत्तत्स्थलेषु प्रतिपादितानि । साहित्यदर्पणेऽपि चतुर्वर्गफलावाप्त्यादिकं तत्फलमिति सम्यक् सिद्धान्तितम् । 'काव्यप्रयोजने कस्यापि निबन्धकारस्य विमतिर्नैव दृश्यते । सर्वेषामेवालङ्कारशास्त्राणां काव्यप्रतिपाद्यमिति तदुपयोगितया सर्वत्रैव दोषगुणालङ्काराः निरूपिताः । रसादयस्तु क्वचिन्निरूपिताः क्वचिच्च न । तथाहि वाग्भटालङ्कारादौ रसो निरूपितः वामनवृत्त्यादौ तु न । वामनवृत्तौ शब्दशुद्धिर्निरूपिता परं नान्यत्रालङ्कारशास्त्रे । वाग्भटालङ्कारे काव्यप्रकरणप्रणाली लिखिता, नान्यत्र । चन्द्रालोके काव्यधर्मो न्यरुपि, नान्यत्र ।काव्यप्रकाशादौ अभिधालक्षणाव्यञ्जनावृत्तयो निरूपिताः, न तु वाग्भटालङ्कारादौ ।' साहित्यदर्पणे दृश्यकाव्यादिकं न्यरूपि, नान्यत्र कुत्रचित् । दोषगुणालङ्काराश्च सर्व एव न सर्वत्र समानाः । वामनोभोजादिमते अलङ्कारदोषा नैव स्वतन्त्राः वर्त्तन्ते । मम्मटादिमते तद्वैपरीत्यमेव । दण्डितमते दोषा दशैव । भोजमते पदवाक्यवाक्यार्थगता दोषाः प्रत्येकं षोडश ।

वामनमते गुणाः शब्दगता अर्थगताश्च प्रत्येकं दश । भोजमते चतुर्विंशतिः । एवं दोषा भावरूपा वैशेषिकनामानो बहवः ।

मम्मटविश्वनाथादिमते न शब्दार्थगता गुणाः किन्तु रसगतास्त्रय एव । दण्डिभोजादिमते प्रहेलिकादयोऽलङ्काराः । न वक्रोक्त्यादयः । मम्मटविश्वनाथादिमते तु तद्वैपरीत्यमेव ।

काव्यलक्षणे निबन्धकाराणां विप्रतिपत्तिर्दृश्यते । यथैव येन काव्यस्यात्मा निरूपितस्तथैव तेन काव्यस्य लक्षणं कृतम् । तेषु कानिचिल्लक्षणानि केवलं काव्यस्य स्वरूपवर्णनपराण्येव । केषाञ्चिदालङ्कारिकाणां काव्यलक्षणानि प्रदर्श्यन्तेऽत्र ।

(१) शब्दार्थौ सहितौ काव्यम् । (भामहः)

(२) ननु शब्दार्थौ काव्यम् । (रुद्रटः)

(३) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि । (मम्मटः)

(४) शब्दार्थौ निर्दोषौ प्रायः सालङ्कारौ काव्यम् । (वाग्भटः)

(५) अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम् । (हेमचन्द्रः)

(६) शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली । (दण्डी)

(७) इष्टार्थव्यवच्छिन्ना पदावली काव्यम् । (अग्निपुराणम्)

(८) वाक्यं रसात्मकं काव्यम् । (विश्वनाथकविराजः)

(९) निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिञ्च विन्दति ॥

(१०) काव्यं रसादिमद्वाक्यं श्रुतम् । (भोजः)

(११) सुखविशेषकृत्तत् । (शौद्धोदनिः)
रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥ (जगन्नाथः)

इत एव काव्यलक्षणे आलङ्कारिकाणां मतानि विभिन्नानीति स्फुटं प्रतीयते। अलङ्कारशास्त्रेऽपि विभिन्नानि मतानि वर्त्तन्ते। तेषु पञ्चमतानि समुद्रबन्धे प्रदत्तानि।

यथा—

इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन व्यापारमुखेन व्यङ्ग्यमुखेन चेति त्रयः पक्षाः। आद्येप्यलङ्कारतो वेति द्वैविध्यम्। इह पञ्चसु पक्षेषु आद्य उद्भटादिभिः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चमश्चानन्दवर्द्धनेन स्वीकृतः।

अत्र रसस्योल्लेखो नास्ति ध्वनेरन्तर्भूतत्वात्तस्य पञ्चमान्तः पातित्वमेव स्वतः समापतति। जयरथेन विमर्शिन्यां द्वादशध्वनेः प्रतिपक्षा दर्शिताः। यथा—

"तात्पर्यशक्तिभिधालक्षणानुमिती द्विधा।
अर्थापत्तिः क्वचित्तन्त्रं समासोक्त्याद्यलङ्कृतिः॥

रसस्य कार्यता योगो व्यापारन्तरबोधनम्।
द्वादशेत्थं ध्वनेरस्य स्थिता विप्रतिपत्तयः॥"

तदेतत्सर्वमालङ्कारिकाणां मतमलङ्कारसर्वस्वे प्रदर्शितम्। यथा—

'इह हि तावद् भामहोद्भट्टप्रभृतयश्चिरन्तनालङ्कारिकाः प्रतीयमानमर्थं वाच्योपस्कारतयाऽलङ्कारपक्षनिक्षिप्तं मन्यन्ते। तथाहि पर्य्यायोक्ताप्रस्तुतप्रशंसासमांसोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयादौ वस्तुमात्रं वाच्योपस्कारकत्वेन 'स्वसिद्धयेपराक्षेपः परार्थं स्वसमर्पणम्' इति यथायोगं द्विविधया भङ्ग्या प्रतिपादितं तैः। रुद्रटेन तु भावालङ्कारो द्विधैवोक्तः। रूपकदीपकापह्नुतितुल्ययोगितानामुपमाद्यलङ्कारे वाच्योपस्कारत्वेनोक्तेः। उत्प्रेक्षा तु स्वयमेव प्रतीयमाना कथिता। रसवत्प्रेयः प्रभृतौ रसवदादिर्वाच्यशोभाहेतुत्वेनोक्तेः। तदित्थं त्रिविधमपि प्रतीयमानमलङ्कारतया ख्यापितमेव। वामनेन तु सादृश्यनिबन्धनाया लक्षणाया वक्रोक्त्यलङ्कारं ब्रुवता कश्चिद् ध्वनिभेदोऽलङ्कारतयैवोक्तः। केवलं गुणविशिष्टपदरचनात्मिका रीतिः काव्यात्मत्वे नोक्ता। उद्भटादिभिस्तु गुणालङ्काराणां प्रायशः

साम्यमेव सूचितम्। विषयमात्रेण भेदप्रतिपादनात्संघटनाधर्मत्वेन चेष्टेः। तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम्।

वक्रोक्तिजीवितकारः पुनर्वैदग्ध्यभङ्गिभणितिस्वभावां बहुविद्यां वक्रोक्तिमेव प्राधान्यात्काव्यजीवितमुक्तवान्, व्यापारस्य प्राधान्यञ्च काव्यस्य प्रतिपेदे। केवलमुक्तिवैचित्र्यजीवितं काव्यं न व्यङ्ग्यजीवितमिति तदीयं दर्शनं व्यवस्थितम्। भट्टनायकेन तु व्यङ्ग्यव्यापारस्य प्रौढोक्त्याऽभ्युपगतस्य काव्यांशत्वं ब्रुवता न्यग्भावितशब्दार्थस्वरूपस्य व्यापारस्यैव प्राधान्यमुक्तम्। तत्राप्यभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णो रसचर्वणात्मा भोगापरपर्यायो व्यापारः। प्राधान्येन विश्रान्तिधामतयाऽङ्गीकृतः। ध्वनिकारः पुनरभिधातात्पर्य्यलक्षणाख्यव्यापारमत्वाद् ध्वननद्योतनादिशब्दाभिधेयस्य व्यञ्जनव्यापारस्यावश्याभ्युपगमत्वाद् व्यापारस्य च वाक्यार्थत्वाभावाद् वाक्यार्थस्यैव च व्यङ्ग्यरूपस्य गुणालङ्कारोपस्कर्त्तव्यत्वेन प्राधान्याद् विश्रान्तिधामत्वाद् आत्मत्वं सिद्धान्तितवान्। व्यापारस्य विषयमुखेन स्वरूपप्रतिलम्भात्तत्प्राधान्येन प्राधान्यात् स्वरूपेण जीवितत्वेन वक्तव्यः, यस्य गुणालङ्कारचारुत्वप्रतिग्रहसाम्राज्यम्। रसादयस्तु जीवितभूता नालङ्कारत्वेन वाच्याः।

अलङ्काराणामुपस्कारकत्वाद् रसानां च प्राधान्येनोपस्कार्यत्वाद् व्यङ्ग्य एव वाक्यार्थीभूतः काव्यजीवितम् इत्येष पक्षो वाक्यविदां सहृदयानामावर्जकः। व्यञ्जनव्यापारस्य सर्वैरपह्नुतत्वात्तदाश्रयेण च पक्षान्तरस्याप्रतिष्ठानात्। यत्तु व्यक्तिविवेककारो वाच्यस्य व्यङ्ग्यं प्रति लिङ्गतया व्यञ्जनस्यानुमानान्तर्भावमाख्यत्तद्वाच्यस्य प्रतीयमानेन सह तादात्म्यतदुत्पत्त्यभावादविचारिताभिधानम्। तदेतत्कुशाग्रधिषणैः क्षोदनीयमतिगहनमिति नेह प्रतन्यते। इत्येवं विभिन्नानि प्राचीनानां मतानि निरस्य काव्यस्यात्मा ध्वनिरिति व्यवस्थापितं ध्वनिकारेण। परं कविराजेन विश्वनाथेन ध्वनिवादमवालम्ब्य ध्वनेः प्रकाशविशेषस्य रसस्यात्मत्वं प्राधान्यं च काव्ये निर्णीतम्।

प्रथममेव भरतेन नाट्यशास्त्रे रसस्य प्राधान्यमात्मत्वं च प्रतिपादितम्। "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इत्यनेनाग्निपुराणेऽपि काव्ये रसस्यात्मत्वमङ्गीकृतम्। "रस आत्मा" इत्यनेन काव्यमीमांसायां राजशेखरेण स्वीकृतम्।

"अलङ्कारस्तु शोभायै रस आत्मा परं मनः।" इत्यादिना शौद्धोदनिनापि रसस्यात्मत्वमङ्गीकृतम्। प्राचीनैरलङ्कारमार्गप्रवर्त्तकैरपि काव्ये रसस्य प्राधान्यमुपवर्णितम्। यथा—

"युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।" इति महाकाव्यलक्षणे भामहः।

"कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति।" इति दण्डी। "तस्मात्कर्त्तव्यं यत्नेन महीयसा रसैर्युतमि" ति रुद्रटः। तेन रस एव वस्तुत आत्मा। वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्य्यवस्येत इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येनोक्तम्।

'प्राथमिकानामभ्यासार्थिनां यदि चित्रेण व्यवहारः। प्राप्तपरिणतीनां तु ध्वनिरेव काव्यमिति स्थितमेतत्।' (ध्वन्यालोकलोचने)

अतो बहुभिरालङ्कारिकैः काव्ये रसस्य प्राधान्यमङ्गीकृतं, परं न केनापि प्राचीनालङ्कारिकेण काव्ये रसस्य प्राधान्यं प्रतिपादितम्। विश्वनाथकविराजेन साहित्यदर्पणे प्रथममेव ध्वनेः प्रकारविशेषस्य रसस्य काव्ये प्राधान्यमात्मत्वं च व्यवस्थापितम्।

"एतच्च चित्रं कवीनां विशुद्धलगिरां रसादितात्पर्य्यमपेक्ष्यैव काव्यप्रवृत्तिदर्शनादस्माभिः परिकल्पितम्। इदानीन्तनानां तु न्याय्ये काव्यनयव्यवस्थापने क्रियमाणो नास्त्येव ध्वनिव्यतिरिक्तः काव्यप्रकारः। यतः परिपाकवतां कवीनां रसादितात्पर्य्यविरहे व्यापार एव न शोभते।" (ध्वन्यालोकः)

अतो विश्वनाथेन कविराजेन रसादितात्पर्य्यविरहात्काव्यस्य भेदोऽपि चित्राख्यो नैव परिकल्पितः। इयांस्तु विशेषो ग्रन्थस्यास्य।

यद्यपि विशिवनाथकविराजस्य नाखिलाः प्रबन्धा अस्माभिरवलोकितास्तथापि विद्यते एतदेव प्रबन्धरत्नं यदतिभीषणेन समयपरिवर्त्तनक्रकचेन विदारितप्रायायामपि संस्कृतभाषाकल्पलतिकायामेकमात्रमप्यवशिष्टं समुद्भासयत्यशेषान् साहित्यानुशासनप्रबन्धान्, प्रत्याययति बुद्धिवैशद्यं सान्धिविग्रहिकमहापात्रस्य श्रीविश्वनाथकविराजस्यानुबोधयति च सौभाग्यं संस्कृतभाषायाः, प्रकाममानन्दयति च तदेकतानमनसः सुविमलयशसः कविप्रवरान्। यच्चैकमप्यनवरतं हृदयसन्निहितं संस्कृतभाषायां सम्यक् प्रवेशयेच्छात्रं प्रापयेत्प्रावीण्यं प्रकृतकठिनायां साहित्यचर्चायाम्।

ततः किलास्य पूर्वजानामप्रतिहता पाण्डित्यशक्तिरप्रतिमा प्रतिभा निरुपमा च काव्यसम्पदनुमातुं शक्या। अयं किलात्मनः "कविराजः सान्धिविग्रहिकमहापात्र"श्चेत्युपाधिद्वयं प्रयुङ्क्ते। स चोपाधिरस्य काव्यमवलोक्य सुप्रीतमनसा त्रिकलिङ्गेश्वरेण प्रादयीति निश्चीयते। न किल कोऽप्यात्मनः स्वयमुपाधिं प्रयोक्तुं वाञ्छति। विशिष्टतरप्रदत्तस्यैव तस्य प्रयोगः प्रशंसास्पदत्वमवगमयति। अस्य पितुरपि सान्धिविग्रहिकमहापात्रोपाधिः परिदृश्यते।

लब्धकविराजोपाधिस्त्वयं विश्वनाथो नूनमसामान्यः कविः। अस्मादेकस्मादेव ग्रन्थादस्य कविराजस्य व्याकरणे तथा न्यायशास्त्रे च समधिकः परिचय आसीदित्यनुमीयते।

कविशिरोमणिना ह्येतेन साहित्यदर्पणस्य पञ्चमपरिच्छेदेऽनुमान एव व्यञ्जनावृत्तिमन्तर्भावयतां नैयायिकानां मतमनूद्य सम्यक् खण्डितम्। परिनिष्णाता मतिरस्य वेदान्तशास्त्रेऽपीति साहित्यदर्पणे तत्र तत्रोपन्यस्तैर्वेदान्तप्रबन्धवचनैरवगम्यते। यथा वेदान्तादिदर्शनेषु कविराजस्यास्य प्रवेशस्ततोऽपि समधिको नाट्यादिषु कलाशास्त्रेषु। तत्र साहित्यदर्पणमेव प्रमाणम्। तत्र च षष्ठपरिच्छेदे दृश्यकाव्यस्य लक्षणानि तदुपयोगीनि नाट्यालङ्कारादीनि सम्यक् निरूपितानि। यत्तु कैश्चित् साहित्यदर्पणे षष्ठः परिच्छेदः श्रीधनञ्जयप्रणीतस्य दशरूपकस्य संक्षिप्तोऽनुवाद इत्यभिधीयते, तदसत्। दशरूपकेऽप्रतिपादितानामपि विषयाणां तत्र स्फुटं परिदृश्यमानत्वात्। तथाहि उपरूपकलक्षणानि दशरूपकेऽवर्त्तमानानि

तत्र सप्रपञ्चं निरूपितानि वर्त्तन्ते । किञ्च तत्रापि धनञ्जयस्य मतं बहुशः खण्डितम् । नान्दीलक्षणे चैतिहासिकरीत्या भरतमुनेराधुनिकानां च मतं सम्यक् परिदर्शितम् ।

अतोऽनेन "नाट्यशास्त्रदीक्षागुरुः" इति पदवी समासादितेति चन्द्रकलाया उपलभ्यते । अलङ्कारशास्त्रे त्वस्य मतिः परामेव काष्ठामापन्ना । अलङ्कारग्रन्थाश्चानेन बहवः समालोकिताः समालोचिताश्च । अलङ्कारशास्त्रपर्य्यालोचनं चास्य पितृपितामहादिभिः परम्परया कृतम् ।

एवमनेकशास्त्रपरिनिष्णातपरिणतप्रतिभावतः श्रीविश्वनाथस्यासामान्यं भूषणं कविभावः । अयं जयदेवकृष्णानन्दादिवत्सरसकोमलपदावलीविन्यासचतुरः, प्रसन्नवाग्वैभवः पथितपाण्डित्यश्चासीदिति साहित्यदर्पणोदाहृतस्वकीयाशेषपद्यैरवबोद्धुं शक्यम् ।

भवन्ति किल भूयांसः पण्डिता ये तु एकामेव संस्कृतभाषां साकल्येनावबुध्यन्ते । विरलास्तु संस्कृतभाषापारङ्गमा ये च द्वित्रा अपि अन्या भाषाः समवगच्छन्ति । विशालमतिवैभवस्तु श्रीविश्वनाथकविराजो न केवलां संस्कृतभाषां नापि वा द्वित्रा अन्या भाषाः परन्तु अष्टादशापि भाषास्तथा बुबोध यथा तासु तास्वपि भाषासु मनोहरान् भाषापाटवपरिचायकान्, प्रबन्धान् निर्मातुं प्रबभूव । अतएवासौ "अष्टादशभाषावारविलासिनीभुजङ्ग" इत जेगीयते विपश्चिद्भिः ।

"मञ्जुलमणिमञ्जीरे" एष च श्लोकः संस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रंशेषु एकविध एव । एवमप्येतत्पद्यं प्रत्यायेत् कवेरस्य । विविधासु भाषासु प्रावीण्यम् । प्रथमं तावदनेकभाषावगम एव दुष्करस्तत्र पद्यप्रणयनं, तत्र च सरसतापादनम्, तत्रापि एकस्यैव पद्यस्यानेकास्वपि भाषासु समानत्वम् । कविराजेनानेन प्रणीता प्रशस्तिरत्नावली षोडशभिर्भाषाभिरुपनिबद्धा ।

एतेन प्रथमतः काव्यनाटकादयः संग्रहीताः । ततश्च साहित्यदर्पणो नाम शास्त्रीयः प्रबन्धः । ततश्च काव्यप्रकाशस्य व्याख्यानाम् । बहूनामेतत्प्रणीतानां काव्यप्रबन्धानां नामानि साहित्यदर्पण उपलभ्यन्ते । एतत्प्रणीतेषु ग्रन्थेषु कतमः कदा

विरचित इति निश्चित्यावबोद्धुं नास्ति किल कोऽप्युपायः तत्केवलं नामत एव ते प्रबन्धा रसिकेभ्यः समर्प्यन्ते ।

१. प्रभावतीपरिणयम् (नाटकम्)

२. चन्द्रकला (नाटिका)

३. कुवलयाश्वचरितम् (प्राकृतकाव्यम्)

४. प्रशस्तिरत्नावली (षोडशभिर्भाषाभिरुपनिबद्धं करम्भकम्)

५. राघवविलासः (महाकाव्यम्)

६. नरसिंहविजयः (खण्डकाव्यम्)

७. काव्यप्रकाशदर्पणः (काव्यप्रकाशटीका)

८. कंसवधम् (काव्यम्)

एतद्भिन्ना अपि प्रबन्धाः कविराजेन रचिता इति प्रतीयते । साहित्यदर्पणे बहुषु पद्येषु नोपलभ्यते नाम प्रबन्धस्य । केवलमिदं ममेत्यादिना स्वीयत्वेन निर्दिश्यन्ते पद्यानि । किन्तु महदिदं दौर्भाग्यं भारतवर्षस्य यदेतत्प्रणीता ग्रन्थाः कस्यापि देशहितबद्धादरस्य नयनसरणिमद्यापि नारूढाः ।

कविराजस्यास्य पद्येषु रसानुगुमा शय्या, ललितानि प्रसन्नानि च पदानि, समुदारतरं कल्पनाजालम्, अतिपरिप्लुतो मनोहरो रसश्च सर्वत्र गोचरीभवति । किमधिकं, वंशवदैव समभूदेतस्य भगवती देवगवीत्युक्तिरपि नात्युक्तिदोषायेति दिक् । तदानीन्तनैरपि । कविभिरसौ तथात्वेनैव प्रतिपन्नः ।

साहित्यदर्पणस्य पञ्च प्राचीना व्याख्या दृश्यन्ते । अनन्तदासस्य लोचनम्, महेश्वरभट्टाचार्यस्तु विज्ञप्रिया, रामचरणतर्कवागीशस्य टीका, गोपीनाथस्य प्रभा, तच्छिष्यस्य प्रभास्फूर्त्तिश्च । तासु तावद् रामचरणतर्कवागीशस्य व्याख्या प्रकाशिता वर्त्तते । अनन्तकदासस्तु विश्वनाथकविराजस्य पुत्रो लोचनाख्यं व्याख्यान-

मकरोत् । तस्य लोचने बहुशो "यथा मम पितु" रित्यादिना विश्वनाथकविराजस्य श्लोकानामुद्धरणानि प्राप्यन्ते । ग्रन्थावसाने च—

आस्तामनन्तकृतिना कृत एष धीरै-
रासाद्य तातचरणाम्बुरुहप्रसादम् ।
आचन्द्रमातरणिकोविदवृन्दवन्द्यः
साहित्यदर्पणविवेकवचः प्रपञ्चः ॥

श्रीविश्वनाथकविराजात्मजश्रीमदनन्तदासकृतौ इति कथनाद् विश्वनाथकविराजस्य पुत्रोऽनन्तदास इति ज्ञायते । एतट्टीका तु नातीव विस्तृताऽपि प्रमेयांशविचारे प्रौढिं प्रकटयति ग्रन्थं च सम्यग् योजयति । कवेरभिप्रायस्तु यथार्थतो ज्ञायतेऽस्माद् व्याख्यानात् । एतद् व्याख्यानमतीव सुबोधम् । अतस्तु "लोचनेन विहीनस्य दर्पणः किं करिष्यति" इति प्रवादस्यार्थं लोचनाख्यव्याख्यानपरतया योजयन्ति प्राचीना विद्वांसः । अनन्तदासेन ध्वन्यालोके लोचनव्याख्यानवत् साहित्यदर्पणस्य लोचनाभिधं व्याख्यानं रचितम् । अनन्तदासस्य भानुदेवप्रशस्त्या स चतुर्दशशताब्द्या मध्यभागे आसीदिति प्रागेव प्रतिपादितम् । पञ्चानां तालीपत्रपुस्तकानां साहचर्य्येण मया व्याख्यानस्यैतस्य मूलशुद्धिर्विहिता ।

तर्कालङ्कारमहेश्वरभट्टाचार्यस्य विज्ञप्रिया टिप्पणी तु अतीव विस्तृता । काव्यप्रकाशपक्षपातिनानेन सम्यग् ग्रन्थार्थं प्रकटय्य बहुषु स्थलेषु काव्यप्रकाशस्य मतं समर्थितम् । परं ग्रन्थस्यालोचनं सम्यक् कृतम् । अस्य भाषा तु सुबोध्या । अनेन काव्यप्रकाशस्यापि व्याख्यानं कृतम् । षष्ठपरिच्छेदे स्वस्य ग्रन्थस्य नामोल्लेखादयमपि तारावतीचन्द्रशेखरनाटकस्य कर्त्ता । साहित्यदर्पणस्यापि बहवोऽशा दुर्बोधाः संवृत्ताः । अतोऽत्र मया प्राचीनं व्याख्यानद्वयं समावेशितम् । तयोः साहचर्य्येण सर्वं तावत् छात्राणामपि सुबोध्यं भविष्यति । विज्ञप्रियाव्याख्यानस्य प्रयोजनं ग्रन्थावसाने सम्यक् प्रतिपादितं महेश्वरभट्टाचार्य्येण यथा—

सुश्लिष्टसंस्कृतवशेन सुखाधिरोहा
वैषम्यदुस्तरतरङ्गविभेददक्षा ।

साहित्यदर्पणमहार्णवमुत्तरीतुं
टीकेयमस्ति तरणिर्न बिभीत धीराः ॥

दर्पणे प्रतिबिम्बन्ते पदार्था इति नाद्भुतम् ।
चित्रं ममैतद् व्याख्याने दर्पणः प्रतिबिम्बिते ॥

व्याख्यानकारेण व्याख्यानस्य यादृशी प्रौढिर्दर्शिता व्याख्याने तादृशी प्रौढिर्यथार्थतो वर्त्तते । तत्सर्वं पाठात् परतः सुधीभिरवधारणीयम् । एतस्य व्याख्यानकर्त्तुः कालनिर्णयः कर्त्तुं नैव शक्यते । परमसौ रामचरणात्प्राचीन एव । रामचरणेन प्रथमपरिच्छेदे केचित्तु (१२ पृ) इत्यादिना महेश्वरस्य व्याख्यान मुद्धृत्यदूषितम् । रामचरणेन १७०१ खीष्टाब्दे व्याख्या कृतेति ग्रन्थान्तिमश्लोके लिखितम् । उदाहरणचन्द्रिकाकारेण वैद्यनाथेन नाम्ना महेश्वरमुल्लिख्य तत्कृतात् काव्यप्रकाशदर्पणाद् बहुशस्तस्य मतमुद्धृत्य निराकृतम् । वैद्यनाथेन 'वियद्वेदमुनिक्ष्माभिर्मिते' १७४० विक्रमाब्दे १६८४ खीष्टाब्दे उदाहरणचन्द्रिका रचिता । अतस्तर्कालङ्कारो महेश्वरभट्टाचार्यः सप्तदशशताब्द्या मध्यभागे आसीदिति प्रतीयते ।

एवं साहित्यदर्पणस्यास्य यानि यानि संस्करणानि प्राप्यन्ते, तेषां सम्बन्धे मया विचारो विहितः स्वमत्यनुसारेण ।

विश्वनाथस्य साहित्यक्षेत्रे योगदानम्

प्रथमपरिच्छेदे— काव्यफलनिरूपणं, काव्यस्वरूपवर्णने प्रमाणानि, मम्मटस्य काव्यलक्षणस्य सयुक्तिकं निरसनम्।

द्वितायपरिच्छेदे— अभिधाया: सङ्केतस्य च गभीरं लक्षणं, लक्षणाभेदानां च सविस्तरं निरूपणम्। यद्यपि केचिद् भेदा मन्दप्रयोजनास्तथापि विशेषतो मननीया:।

तृतीयपरिच्छेदे— रसस्योत्पत्ति (अभिव्यक्ति) विषये गभीरमध्ययनं, नायकस्योत्तमादिभेदा:, अन्त:पुरसहायानां भेदा:, नायिकाप्रकरणे स्वदारगुप्त्यर्थमनुरागेङ्गितानां निरूपणं, शृङ्गारादिरसनिरूपणं च।

पञ्चमे परिच्छेदे— व्यञ्जनावृत्ते: स्थापनं मम्मटादपि स्फीतं प्राञ्जलं च।

षष्ठे परिच्छेदे— नाटकादीनां दशानां रूपकाणां नाटिकादीनामष्टादशोपरूपकाणां, तद्गतविशेषणविशिष्टानामन्येषामनेकेषां विषयाणां सविशदं निरूपणं विशेषतोऽध्ययनपरम्। एतेषां सर्वेषां भेदानामध्ययन समलोचकानां कृतेऽतीवोपयोगी। ये च ग्रन्था नामतोऽस्मिन् परिच्छेदे प्रदर्शिता: तेषां पाण्डुलिपयोऽन्वेषणीया:।

सप्तमे परिच्छेदे— अत्र दोषप्रकरणे बहूनि उदाहरणानि विकलत्वेन प्रदर्शितानि तेषां मूलानि पूर्णरूपाणि चान्वेषणीयानि।

अष्टमे परिच्छेदे— वामनोक्तानां शब्दार्थगुणानां सम्यङ्निरसनं, तेषां माधुर्यौज प्रसादेषु स्थिति: सोपपद्यं प्रदर्शिता।

नवमे परिच्छेदे— रीतीनां वैशिष्ट्य प्रतिपादनेन, तासां स्वरूपाकलनेन भारतवर्षस्य प्राक्तनी चिरन्तनी विद्यासमृद्धिर्विश्वनाथेन सप्रमाणं निरूपिता। तासां सर्वासां रीतीनामुदाहरणानि लेखकेनोपजीव्यग्रन्थेषु प्रदर्शितानि।

दशमे परिच्छेदे— महाकाव्योपयुक्तानां शब्दालङ्काराणां चमत्कारोपपादकानामुपमाभेदानां निरूपणं, इतरेषामितरेषामलङ्काराणं परस्परं तुलनात्मकमध्ययनं साहित्यिकानां काव्यप्रणेतृणां च कृते विशेषत उपयोगि।

एवं साहित्यिकजिज्ञासान्वितानां, मुमुक्षूणां कृते साहित्यदर्पणस्याध्ययनं वस्तुतः चतुर्वर्गफलप्राप्तेरनन्तरं मोक्षप्रदमेव।

सहायकग्रन्थसूची

	ग्रन्थनाम	ग्रन्थकर्ता	प्रकाशक:
१.	अग्निपुराणम्	महर्षिव्यास:	चौखम्बा संस्कृत सीरीज़ १९६४ ख्रि.
२.	अभिधावृत्तिमात्रिका	मुकुलभट्ट:	निर्णायसागर प्रैस, १९६४ ख्रि.
३.	अर्थविज्ञान और व्याकरण दर्शन	डा. कपिलदेव द्विवेदी	हिन्दुस्तानी एकेडेमी उत्तर प्रदेश इलाहाबाद, १९५१
४.	अलंकारशेखर:	काव्यामाला (५०)	निर्णयसागर प्रेस, १९२० ख्रि.
५.	अलंकारसर्वस्वम्	रूय्यक:	चौ. सं. सीरिज़
६.	अष्टाध्यायी	पाणिनि:	लक्ष्मीवेंकटेश्वर प्रेस मुंबई, संवत् १९८५
७.	आपिशलिव्याकरणम् संस्कृत व्याकरणशास्त्र के इतिहास में उद्धृत	आपिशलि:—	
८.	एकावली	विद्याधर:	निर्णय सागर प्रेस, १९३४ ख्रि.
९.	ऋक्प्रातिशाख्यम्	शौनक:	काशी हिन्दू विश्वविद्यालय
१०.	कात्यायनीय शिक्षा	कात्यायन:	—

११. कारिकावली	विश्वनाथ पंचानन:	चौखम्बा संस्कृत सीरीज़, सन् १९५१
१२. काव्यप्रकाश:	मम्मडट:	वही
१३. काव्यप्रकाश:	वामनाचार्यो झलकीकर:	भण्डारकर प्राच्य विद्यासंशोधनस्थानम्, १९६५ ख्रि.
१४. काव्यप्रकाश:	मम्मट:	भण्डारकर रिसर्च इन्स्टीट्यूट पूना, १९६५ ख्रि.
१५. काव्यप्रकाश:	विश्वेश्वर:	ज्ञानमण्डलग्रन्थमाला, प्रथम संस्करणम्, संवत् २०१७
१६. काव्यप्रदीप	गोविन्द:	निर्णय सागर प्रेस, १९३३ ख्रि.
१७. काव्यमीमांसा	राजशेखर:	ओरियन्टल इन्स्टीट्युच बड़ौदा, १९३४ ख्रि.
१८. काव्यादर्श:	दण्डी	विद्या भवन संस्कृत ग्रन्थमाला (३७) १९५८ ख्रि.
१९. काव्यानुशासनम्	हेमचन्द्र:	श्री महावीर जैन विद्यालय बम्बई १९३८ ख्रि.
२०. काव्यालंकार:	भामह:	हरिदास संस्कृत ग्रन्थमाला, ६१
२१. काव्यालंकार:	रुद्रट:	वासुदेव प्रकाशन, दिल्ली, १९६५ ख्रि.
२२. काव्यालंकारसारसंग्रह:	उद्भट:	निर्णयसागर, १९१५ ख्रि.
२३. काव्यालंकारसूत्रम्	वामन:	आत्माराम एण्ड सन्स, दिल्ली, १९५४ ख्रि.

२४. काव्यालंकारसूत्रम्	आचार्यविश्वेश्वरः	आत्माराम एण्ट सन्स, दिल्ली, १९५४ ख्रि.
२५. काशिका	वामनजयादित्यः	प्राच्य भारती प्रकाशन, वाराणसी, १९६५ ख्रि.
२६. चन्द्रालोकः	पीयूषवर्षो जयदेवः	चौखम्बा संस्कृत ग्रन्थमाला ग्रन्थ संख्या ८३, संवत् १९९५
२७. चन्द्रालोकः	सुबोधचन्द्र पन्त एम.ए	हरिदास संस्कृत सीरीज़ ५७, १९४५ ख्रि.
२८. चन्द्रालोकः	गागभट्टः	—
२९. चित्सुखी	चित्सुखाचार्यः	निर्णय सागर प्रेस,
३०. तत्त्वचिन्तामणिः	गंगेशः	—
३१. तन्त्रवार्त्तिकम्	कुमारिलभट्टः	चौखम्बा प्रकाशन, वाराणसी
३२. तन्त्रवार्त्तिकम्	जैमिनः	—
३३. तर्कभाषा	केशवमिश्रः	काशी संस्कृत ग्रन्थमाला, चौखम्बा संस्कृत सीरीज़, १९६३ ख्रि.
३४. त्रिवेणिका	आशाधरभट्टः	जयकृष्णदास गुप्ता, विद्याविलास प्रेस १९२५ ख्रि.
३५. ध्वनिसम्प्रदाय और उसके सिद्धान्त	डा. भोलाशंकर व्यास	नागरी प्रचारिणी सभा, काशी, संवत् २०१३
३६. ध्वन्यालोकः	बदरीनाथ शर्मा	हरिदास ग्रन्थमाला ६६ १९६४
३७. ध्वन्यालोकः	डा. रामसागर त्रिपाठी	१९६३ ख्रि.

३८. ध्वन्यालोकलोचनम्	अभिनवगुप्तः	मोतीलाल बनारसी दास, प्रथम संस्करणम्, १९६३ ख्रि.
३९. निरुक्तम्	यास्कः	निर्णय सागर प्रेस, १९३०
४०. निरुक्तटीका	लक्ष्मणस्वरूपः	पंजाब विश्वविद्यालयः लवपुरम् १९२८ ख्रि.
४१. निरुक्तटीका	दुर्गाचार्यः	निर्णय सागर प्रेस, १९३०
४२. निरुक्तटीका	स्कन्दमाहेश्वरः	पंजाब विश्वविद्यालय, लवपुरम् १९२८ ख्रि.
४३. नैषधीयचरितम् (नारायणी टीका)	श्रीहर्षः	निर्णय सागर प्रेस, १९५२ ख्रि.
४४. न्यायमञ्जरी	जयन्तभट्टः	चौखम्बा संस्कृत सीरीज़
४५. न्यायरत्नमाला	विश्वनाथः	निर्णय सागर प्रेस
४६. न्यायरत्नमाला	पार्थसारथिमिश्रः	ओरियण्टल इन्स्टीट्यूट, बड़ौदा १९६७ ख्रि.
४७. न्यायवार्त्तिकम्	उद्योतकरः	चौखम्बा प्रकाशन वाराणसी
४८. न्यायसिद्धान्तमुक्तावली	विश्वनाथसंचाननः	चौखम्बा संस्कृत सीरीज़ सन् १९५१
४९. न्यायसूत्रम्	महर्षिगौतमः	गुजराती मुद्रणालयः, १९२२ ख्रि.
५०. न्यायसूत्रभाष्यम्	वात्स्यायनः	गुजराती मुद्रणालय, १९२२ ख्रि.
५१. परमलघुमंजूषा	नागेशभट्टः	महाराजसयाजि विश्वविद्यालय, बड़ौदा
५२. प्रतापरुदीयम्	विद्यानाथः	१९६६ ख्रि.

५३. बृहद्देवता	शौनकः	चौखम्बा संस्कृत सीरीज़ १९६३ ख्रि.
५४. भारतीय साहित्यशास्त्र भाग १	बलदेव उपाध्याय	शारदा मन्दिर बनारस, १९५३
५५. भारतीय साहित्यशास्त्र भाग २	बलदेव उपाध्याय	शारदा मन्दिर बनारस, १९५३
५६. भारतीय साहित्यशास्त्र	गणेश त्रयम्बक देशपाण्डे	पापुलर बुक डिपो, बम्बई १९५८ ख्रि.
५७. भाषातत्त्व और वाक्य पदीय	डा. सत्यकाम वर्मा	भारतीय प्रकाशन, दिल्ली १९६८ ख्रि.
५८. मनुस्मृतिः	मनुः	हिन्दी पुस्तक एजेन्सी, कलकत्ता, संवत् १९९४
५९. महाभाष्यम्	पतंजलिः	मोतीलाल बनारसीदास, १९६७ ख्रि.
६०. महाभाष्यम् (प्रदीपः)	कैयटः	मोतीलाल बनारसी दास, १९६७ ख्रि.
६१. महाभाष्यम्	नागेशभट्टः	मोतीलाल बनारसीदास
६२. महिमभट्ट	डा. ब्रजमोहनचतुर्वेदी १९६९ ख्रि.	
६३. मीमांसाभाष्यम्	प्रभाकरमिश्रः	
६४. मीमांसासूत्रम्	जैमिनिः	पाणिनि आफिस, बहादुर गंज, १९३४ ख्रि.
६५. मीमांसा-शबरभाष्यम्	शबरस्वामी	ओरियण्टल इंस्टीट्यूट, बड़ौदा १९३४ ख्रि.
६६. रत्नापणम्	कुमारस्वामी	—

६७. रसगंगाधरः	पण्डितराज-जगन्नाथः	निर्णयसागर, प्रेस १९४७ खि.
६८. रसगंगाधरः	मधूसूदन शास्त्री	वाराणसी हिन्दू विश्वविद्यालय वि. सं. २०२०
६९. रसगंगाधर का शास्त्रीय अध्ययन	प्रेमस्वरूप गुप्त	भारत प्रकाशन मन्दिर, अलीगढ़, सन् १९६२
७०. रामायणम्	वाल्मीकिः	गीता प्रेस, गोरखपुर सं. १९६८
७१. वक्रोक्तिजीवितम्	कुंतकः	कलकत्ता ओरियन्टल सीरीज़ १९२८ खि.
७२. वाक्यपदीयम्	चारुदेवशास्त्री	रामलालकपूरः लवपुरम् १९९१
७३. वाक्यपदीयम्	भर्तृहरिः	पुष्पपत्तनविद्यापीठ—पुरस्कृता संस्कृत ग्रन्थमालाद्वितीयग्रन्थः—१९६५
७४. वाक्यपदीयम् (टीका)	हेलाराजः	अनन्तशयन संस्कृतग्रन्थावलिः ग्रन्थाङ्क-११६
७५. वाक्यपदीयम् (टीका)	पुण्यराजः	—
७६. वाग्भटालंकारः	वाग्भटः	काव्यमाला, निर्णयसागर प्रेस, १९६३ खि.
७७. वाजसनेयप्रातिशाख्यम्	कात्यायनः	चौखम्बा प्रकाशन वाराणसी
७८. वृत्तिवार्त्तिकम्	अप्पयदीक्षितः	निर्णसागर प्रेस, १९४० खि.
७९. वैयाकरणभूषणसारः	कौण्डभट्टः	काशी संस्कृत सीरीज़ पुस्तकमाला व्याकरण विभागे (१८) १९३८ खि.

८०. वैयाकरणभूषणसार:	भीमसेन शास्त्री	दिल्ली से प्रकाशित
८१. वैयाकरणसिद्धान्त-लघुमञ्जूषा	नागेशभट्ट:	चौखम्बा संस्कृत सीरीज़
८२. वैशेषिकसूत्रम्	महर्षिकणाद:	
८३. व्यक्तिविवेक:	पं. रेवाप्रसाद द्विवेदी	चौखम्बा संस्कृत सीरीज़ सन् १९२८ ख्रि.
८४. व्यक्तिविवेक:	महिमभट्ट:	चौखम्बा संस्कृत सीरिज़ सन् १९६४
८५. व्यक्तिविवेकविचार:	राजानकरुय्यक:	निर्णय सागर प्रेस,
८६. व्युत्पत्तिवाद:	गदाधरभट्ट:	चौखम्बा संस्कृत सीरीज़
८७. सरस्वतीकण्ठाभरणम्	भोज:	निर्णय सागर प्रेस, काव्य-माला (९४) १९३४ ख्रि.
८८. सर्वदर्शनसंग्रह:	अभ्यंकर:	पुण्यपत्तनस्थ प्राच्यविद्याम-न्दिर (१९५६) ख्रि.
८९. संस्कृत साहित्य का इतिहास	सेठ कन्हैयालाल पोद्दार	नागरी प्रचारिणी सभा, काशी, संवत् २०१९
९०. संस्कृत साहित्य का इतिहास	वी. वरदाचार्य, एम. ए.	नागरी प्रचारिणी सभा,
९१. संस्कृत साहित्यशास्त्र का इतिहास	डा. पी. वी. काणे	मोतीलाल बनारसीदास हिन्दी संस्करण, १९६६ ख्रि.
९२. साहित्यदर्पणम्	विश्वनाथ:	निर्णसागर प्रेस, १९३६
९३. साहित्यदर्पण टीका	शालग्रामशास्त्री	मोतीलाल बनारसीदास १९६७
९४. सांख्यकारिका	ईश्वरकृष्ण:	मुंशी नवलकिशोर (सी. आई. ई. (यन्त्रालय: १९०० ख्रि.

९५. स्फोटसिद्धिः	ऋषिपुत्रपरमेश्वरः	—
९६. शक्तिवादः	गदाधरः	चौखम्बा संस्कृत सीरीज़
९७. शब्दकौस्तुभः	श्रीभट्टोजिदीक्षितः	चौखम्बा संस्कृत ग्रन्थमाला संवत् १९९०
९८. शब्दशक्तिप्रकाशिका	जगदीशतर्कालङ्कारः	काशी संस्कृत सीरीज़ पुस्तकमाला १०९ न्यायविभागे, षोडशं पुष्पम्, १९९१
९९. शब्दशक्तिविवेकः (लेखः)	पशुपति झा	विश्वसंस्कृतम्
१००. श्लोकवार्त्तिकम्	कुमारिलः	चौखम्बाप्रकाशन वाराणसी
१०१. हृदयदर्पमम्	भट्टनायकः	—



जन्म—६-११-१९३७

जन्मस्थानम्—ग्रामः—रोहटः, मण्डलम् सोनीपतः (हरियाणा)।

शिक्षा—शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम. ए. १९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी. १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम्—साहित्यशास्त्रम्, व्याकरणम् च।

प्रकाशितानि शोधपत्राणि—दिल्ली विश्वविद्यालयदक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकाकारेषु प्रकाशनेषु बहवो लेखाः।

प्रकाशितो ग्रन्थः—अभिधाविमर्शः, दिल्ली १९८० आचार्यो दण्डी, (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः) ब्रह्मसूत्रशांकरभाष्यम्, एकादशटीकासंयुतम् अष्टसु भागेषु, साहित्यदर्पणम् चतुर्थ भागेषु, काव्यदर्शः पञ्चभागेषु।

कार्यक्षेत्रम्—दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,

प्राध्यापकः—१९६९-१९८६

प्रवाचकः—१९८७-१९८८

गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो

विभागाध्यक्षश्च—१९८८-१९८९

वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।



राष्ट्रिय-संस्कृत-संस्थानम्

५६-५७, इन्स्टिट्यूशनल एरिया, जनकपुरी,

नई दिल्ली - ११००५८